उत्तररामचरिते पात्राणां परिचयः

- पुमांसः -

सूत्रधारः—प्रधानो नटः
नटः—सूत्रधारेण समं संभाषणकारी नटः
कञ्चुकिन्—द्वारपालः
गृष्टिः—दशरथस्यान्तःपुरचरो दूतः
अष्टावक्रः—कहोडमुनेः पुत्रः
रामः—अयोध्याया नृपः, अत्र प्रधानो नायकश्च
लक्ष्मणः—सौमित्रीतनयः, रामानुजश्च
लव-कुशौ—रामस्य युगलौ तनयौ
जनकः—विदेहाधिपतिः, सीतायाः पिता च
दुर्मुखः—रामस्यासन्नपरिचारको गूढचरः
शम्बूकः—शूद्रतपस्वी
दाण्डायनः } सौधातकिः } वाल्मीकिमहर्षेरन्तेवासिनौ
दिव्यपुरुषः—शापोपहतः प्राक्शंबूकस्वरूपः
चन्द्रकेतुः—लक्ष्मणात्मजः
सुमन्त्रः—चन्द्रकेतोः सारथिः
वाल्मीकिः—महर्षिः, रामायणप्रणेताऽऽद्यकविश्च
विद्याधरः—देवताविशेषः
वटवः—वाल्मीकिमहर्षेराश्रमस्थाश्छात्राः
पुरुषः—चन्द्रकेतुचमूगतः सैनिकः

- स्त्रियः -

सीता—रामचन्द्रस्य भार्या, विदेहाधिपतेः कन्या, अत्र च नायिका
कौसल्या—रामजननी, दशरथभार्या
अरुन्धती—वसिष्ठमुनेर्भार्या
आत्रेयी (तापसी) } तपस्विनी
वासन्ती (वनदेवता) } देवता
मुरला } तमसा } सरितौ (मानुषदेहभाजौ)
पृथिवी—सीताया जननी, भूमिश्च
गङ्गा } भागीरथी } रघुकुलपावनी सुरसरित् (मानुषदेहधरा)
विद्याधरी—विद्याधरस्य दयिता
प्रतिहारी—द्वारपालिका

—:०:—

प्रथमाङ्कस्य कथावस्तु

अत्र नान्दीपठनादनन्तरं सूत्रधारः प्रविश्य कथं नामाधिकारिपुरुषा निवृत्तव्यापाराः सन्तः पट्टाभिषेकसमये चत्वरेषु विश्राम्यन्तीति सकुतूहलं पृच्छति। नटश्च निवेदयति कथानायकस्य श्रीरामचंद्रस्य यौवराज्याभिषेकोत्सवः समवसितः, तत्रोपस्थितानां लङ्कासमरसुहृदां प्लवंगमराक्षसानां नानादिगन्तपावनब्रह्मर्षि-राजर्षिवृन्दाना स्वदेशगमनादेव विश्रांतचारचत्वराणि चत्वरस्थानानीति। गुरुजनो दशरथभार्याभिः सह ऋष्यशृङ्गस्य द्वादशवार्षिके सत्रे समुपस्थातुमासन्नप्रसवां जानकीं विमुच्य ययौ। जनकोऽपि यौवराज्याभिषेकोत्सवादि सुखेन नीत्वा विदेहान् गतश्च। तद्वियोगाद्विमनस्कां सीता परिसान्त्वयितुं रामचन्द्रो धर्मासनाद्वासगृहं प्रविशतीति कथांशोऽत्र प्रस्तुतः। एतस्मिन्नेवांतरे ऋष्याश्रमादष्टावक्रो 'जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि, नवं च राज्यम्। युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत् परमं धनं व.॥' इति वसिष्ठमुनेः संदेशमादायाजगाम। रामचन्द्रोऽपि-'स्नेहं दया च सौख्यं च यदि वा जानकीमपि। आराधनाय लोकानां मुञ्चतो नास्ति मे व्यथा॥' इति भगवन्मैत्रावरुणिसमादेशानुगुणं करोमीत्युक्त्वा वसिष्ठसंदेशमुपादत्तवान्। ततश्च विचेतस्कां सीतां समनुरञ्जयितुं लक्ष्मणचित्रितालेख्यदर्शने प्रस्तुते पूर्वानुभूतानन्दवियोगादिभावयुक्तेन श्रीरामचंद्रेण 'दुःखाग्निर्मनसि पुनर्विपच्यमानो हृन्मर्मव्रण इव वेदनां तनोति।' इत्यादिना कृतं पुन:संवेदनाविष्करणम्। आलेख्यदर्शनकौतुकेन सीता चापि 'प्रसन्नगंभीरासु वनराजिषु पवित्रनिर्मलशिशिरसलिलां भागीरथीं पुनरप्यवगाहिष्ये' इति प्रत्युत्पन्नातदोहदा ह्यभवत्। तस्या दोहदपूर्त्यर्थं रामः 'सत्वरं रथमुपस्थापय' इति लक्ष्मणं समादिष्टवान्। एतस्मिन्नेवांतरे रामेण पूर्वं प्रेषितो दुर्मुखाख्यो गूढचरो रामं समुपेत्य लङ्कायां रावणगृहे निवासाद्यधिकृत्य सीताविषयकं यत्कौलीनं श्रुतं तद्यथावद्रामं रहसि न्यवेदयत्। स तेन लोकापवादेन दूनचेतस्त्वाद्गतसंज्ञोऽभवत्। लब्धचेतनश्चाथ सीताया वने त्याग एवात्र निष्कृतिरिति मन्यमानो रामः सुनिर्भरं विलप्य लक्ष्मणाय तदनुष्ठातुं रहसि समादिशत्। एवं सीतालक्ष्मणौ रथारूढौ भूत्वा वनप्रयाणायोपस्थितवन्तौ।

महाकविभवभूतिविरचितम्

उत्तररामचरितम्

— प्रथमोऽङ्कः —

इदं कविभ्यः पूर्वेभ्यो नमोवाकं प्रशास्महे ।
वन्देमहि च तां वाणीममृतामात्मनः कलाम् ॥ १ ॥

तत्त्वस्पर्शिनी ।

धुरि भुवि महितायां भूमिसाराभिधायामधिमुनिमृगुतीर्थोपान्तमाबद्धखेलम् ।
किमपि भवशरण्यं मङ्गलं मङ्गवल्लीजगदधिपतिसंज्ञं द्वन्द्वमानन्दयेन्नः ॥

ज्ञानं सर्वपराधीनं तद्धेतुश्चेद्धयाननः ।
स चेद्भक्तपराधीनस्तं विना कं व्रजाम्यहम् ॥
भूसारपुरवास्तव्यो वाधूलो वीरराघवः ।
भवभूतिकृतिं हृद्यां व्याचष्टे करुणामयीम् ॥
भवभूतेः कवीन्द्रस्य क्व गम्भीरो गिरां भरः ।
क्व मन्मतिरतिस्थूला सहायोऽत्र हयाननः ॥
चापल्यमथवा बाल्यं कृतावस्थां प्रवर्तकम् ।
तथापि कृपया सन्तः संतन्वन्तां शुभां दशाम् ॥

अथ तत्रभवान्भवभूतिर्नाम कविकण्ठीरवः 'एकः शब्दः सम्यग्ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके कामधुग्भवति' इत्यादिश्रुत्या परिनिष्ठितशब्दप्रयोगस्य धर्मत्वमवगच्छन् 'काव्यं यशसेऽर्थकृते' इत्यादिना काव्यरूपस्य तस्य प्रकर्षं विभाव्य, 'शैवा वयं न खलु तत्र विचारणीयं पञ्चाक्षरीजपपरा नितरां तथापि । चेतो मदीयमतसीकुसुमावभासं स्मेराननं स्मरति गोपवधूकिशोरम् ॥' इत्यादिन्यायेन अङ्कुरितभगवद्भक्तिकतया 'स वाग्विसर्गो जनताघविप्लवो यस्मिन्प्रतिश्लोकमबद्धवत्यपि । नामान्यनन्तस्य यशोऽङ्कितानि यच्छृण्वन्ति गायन्ति गृणन्ति साधवः ॥' इत्यादिन्यायेन 'प्रबन्धानां प्रबन्धॄणामपि कीर्तिप्रतिष्ठयोः । मूलं विषयभूतस्य नेतुर्गुणनिरूपणम् ॥' इत्यादिन्यायेन च भगवद्गुणान्विवक्षुः, तत्रापि 'यदि क्षुण्णं पूर्वैरिति जहति रामस्य चरितम्' इत्यादिन्यायेन रामकथां प्रतिपिपादयिषुः, दृश्यस्य श्राव्यापेक्षया 'देवानामिदमामनन्ति मुनयः कान्तं क्रतुं चाक्षुषम्' इत्युक्तनाट्याश्रयत्वप्रयुक्तप्राधान्यात्प्रकरणादीनां यथायथं रसवस्तुनायकतापकर्षात्तत्प्रकर्षान्नाटकं चिकीर्षुः, पूर्वचरितस्य महावीरचरितत्वेन वर्णितत्वात् उत्तरं चरितं वर्णयितुमभिसंधाय पूर्वरङ्गप्रधानाङ्गभूतां नान्दीमाह—

इदं कविभ्य इति । 'इदं', 'कविभ्य' इति पदद्वयमिदम् । अतो द्वादशपदत्वसिद्ध्या न नान्दीपदनियमभङ्गः । 'इदम्' इति प्रोद्देश्यसमर्पकं द्वितीयान्तं विशेष्यवाचकम्,

---

पाठा०-१ 'विन्देम देवतां', 'वन्देम देवतां वाच'.

'नमोवाकम्' इति च विधेयसमर्पकं विशेषणवाचकं च। तथा च—इदं प्रारिप्सितग्रन्थादौ चिकीर्षितत्वेन बुद्धिस्थं मङ्गलं पूर्वेभ्यः कविभ्यो नमोवाकं प्रशास्महे। पूर्वकालप्रसिद्धप्राचेतसादिकविविषयकनमउक्तिं निर्दिशाम—इति वाक्यार्थः। 'प्रशासनं तु निर्देशः' इति कोशः 'आङः शासु इच्छायाम्' इति धातोः आङ्पूर्वकत्वं प्रायिकमित्युक्तेः प्रपूर्वकत्वेनेच्छार्थकत्वं च। 'नमउक्तिर्नमोवाकः' इति कोशः। भावे घञ्। कुत्वम्। एतन्मङ्गलोद्देश्यपूर्वककविविषयकनमउक्तिविधेयकबोधजनकशब्दप्रयोगवानहम्, एतन्मङ्गलोद्देश्यकपूर्वकविविषयकनमोवाकविधेयकेच्छावानहम्, इत्यन्वयबोधः। 'नमोवाकम्' इत्यस्यैकदेश'नमः'शब्दापेक्षया 'कविभ्यः' इति चतुर्थी। 'नमःस्वस्ति–'(२।३।१६) इत्याद्यनुशासनात्। अत्र नान्दीप्रभृतिप्रशस्तिरूपचरमाङ्कपर्यन्तस्य कर्तव्यस्य बुद्धिस्थत्वेऽपि प्रत्यासत्तिन्यायान्नमोवाकमिति विधेयानुसाराच्च मङ्गलस्यैव 'इदं'पदेन विवक्षा। इदमिति च सामान्ये नपुंसकम्। नमोवाकमिति तु पुंलिङ्गम्। तथा च—शुक्तिं रजतं जानातीत्यादाविव विशेष्यनिघ्नत्वाभावेन समानलिङ्गत्वाप्रसक्त्या न तद्बाधरूपदोषः। 'इदं नमोवाकम्' इत्यत्र नमोवाकमित्यस्य विशेष्यवाचकत्वमभ्युपगम्य तद्विशेषणवाचकस्य इदंपदस्य 'सामान्ये नपुंसकं' (वा. ५०४३) इति नपुंसकत्वाश्रयणे तु विशेष्य-विशेषणवाचकपदयोः समानलिङ्गत्वं बाधितव्यमित्यस्वारस्यम्। इदंपदप्रयोजनं च मृग्यं स्यात्। उक्तरीत्याश्रयणे तु मालतीमाधवादौ अन्यादृशमङ्गलेच्छायामपि एतन्नाटककर्तव्यमङ्गलं पूर्वकविविषयकनमोवाकमिच्छाम इत्यर्थलाभेन सप्रयोजनत्वम्, विशेष्यविशेषणवाचकयोः समानलिङ्गत्वबाधाभावश्चेति न दोष इति बोध्यम्। अत्र 'पूर्वेभ्यः कविभ्यो नमोवाकमिदं प्रशास्महे' इति योजयित्वा पूर्वकविविषयकनमोवाकरूपमेतन्मङ्गलमिच्छाम इत्युद्देश्यभावविरहेण पक्षान्तरमपि। अत्रापि इदमिति सामान्ये क्लीबम्। नमोवाकमिति च पुंलिङ्गमेव। 'राज्यश्रीप्रथमावतारपदवीमारुह्य सिंहासनम्' इत्यादाविव विशेष्यनिघ्नत्वाभावेन समानलिङ्गकत्वप्रसक्तेः। अमात्यानुवर्तनपुरःसरराजदर्शनन्यायेन गुणकृतात्मसंस्कारः प्रधानोपकाराय महते प्रभवति। तत्र गुणोऽपि संस्कारमनुभवतीति न्यायेन, कविनमस्कारानन्तरं वाणीं नमस्करोति—**वन्देमहीति**। एतेन अनुग्राहकवाणीनमस्कारात्पूर्वमनुग्राह्यप्राचेतसादिनमस्कारायोग इत्यपास्तम्। 'भगवद्वन्दनं त्वाद्यं गुरुवन्दनपूर्वकम्' इति विधेश्च। 'मधुमयफणितीनां मार्गदर्शी महर्षिः', 'काव्यज्ञशिक्षयाभ्यासः' इति च प्राचेतसादीनां गुरुत्वानपायाच्च। तां प्रसिद्धां पूर्वोक्तनमस्कारार्हत्वेन बुद्धिस्थामिति वा। अमृतां शाश्वतीम्। 'यज्ञशेषसुधामोक्षेष्वमृतं शाश्वते त्रिषु' इत्यभिधानात्। अत्र यज्ञशेषसुधामोक्षस्वरूपेति कश्चित्,–तन्न; अमृतामिति स्त्रीत्वालाभात्, तल्लाभेऽपि स्वरूपामित्यर्थालाभात्। आत्मनः परमात्मनः श्रियःपत्युः कलामंशभूताम्। विग्रहाध्याये तथा प्रतिपादनात्, हयग्रीवांशत्वाच्च। तदुक्तमाचार्यैः –'दाक्षिण्यरम्या गिरिशस्य मूर्तिर्देवी सरोजासनधर्मपत्नी। व्यासादयोऽपि व्यपदेश्यवाचः स्फुरन्ति सर्वे तव शक्तिलेशैः॥' इति। वाणीं वन्देमहि च प्रणमाम च। वन्दतेर्लिङ्युत्तमपुरुषबहुवचनम्। पूर्वोक्तप्रशासनसमुच्चायकश्चकारः। अत्र पूर्वार्धे सर्वलोकनमस्कार्याः पूर्वकालप्रसिद्धाः प्राज्ञाः केचिद्वर्ण्या इति सूच्यते। लोकनमस्कार्या

इत्यनेन धूर्तवर्ण्यकभाणादिव्यावृत्तिः । पूर्वेभ्य इत्यनेन कल्पितवर्ण्यकप्रकरणादिव्यावृत्तिः । भरतस्य च काप्यवर्णनात् रामलक्ष्मणशत्रुघ्नानां त्रयाणामेव कथांशोपयोगित्वेनात्र बहुवचनस्य कपिञ्जलाधिकरणन्यायेन त्रित्वपर्यवसानमव्याहतम् । कविभ्य इत्यनेन यथा कविषु वाल्मीकेराद्यत्वेन प्राधान्यम्, अन्येषामानन्तर्यादप्राधान्यम्, एवं तत्सूचितवर्ण्यानां मध्ये रामचन्द्रस्य वर्णनायां ज्येष्ठत्वेन प्राधान्यं लक्ष्मणादेश्चाप्राधान्यमिति सूचितम् । एवं च नानेकनेतृत्वप्रयुक्तनाटकत्वहानिः । अत एव लक्ष्मणशत्रुघ्नयोरुपसर्जनत्वावगमात् सीतापरित्यागे लक्ष्मणप्रेषणस्य लवणवधार्थं शत्रुघ्नप्रेषणस्य च ध्वननात्प्रथमाङ्कार्थः सूच्यते । उत्तरार्धे प्राज्ञी काचन स्त्री वर्ण्यत इति सूचितम् । 'आत्मनः कलाम्' इत्यनेन तस्या देवतांशसंभवत्वं कस्यचिद्धर्मपत्नीत्वं च सूच्यते; 'अर्धो वा एष आत्मनो यत्पत्नी' इति पत्न्या अवयवत्वोपचारात्, कलाशब्दस्यावयववाचित्वात् । अत एव नायकस्यापि देवतांशसंभवत्वं सूच्यते; देवतांशसंभूतस्त्रियं प्रति तादृशस्यैव नायकस्यौचित्यात् । अमृतामिति मरणस्य प्रसक्तिपूर्वकप्रतिषेधाद्गङ्गापतनसंभावितस्य सीतामरणस्य गङ्गापृथिवीभ्यां सह तदागमनेन भावनिश्चयरूपो द्वितीयाङ्कप्रभृतिसमस्ताङ्कान्तार्थः सूच्यते । नमस्कारसमुच्चयेन समप्राधान्यावगमाच्छाकुन्तलादाविव नासाध्याया वर्ण्यत्वम् । अपि तु साध्याया एव वर्ण्यत्वमिति सूच्यत इति सुधियो विभावयन्तु ॥ अस्य श्लोकस्य योजनान्तरमपि —इदमित्यादि । 'इदंकविभ्यः' इत्येकं पदम् । 'नमः', 'वाकम्' इति च पदद्वयम् । एतेन द्वादशपदत्वविवक्षा न नान्दीनियमहानिः । अयमर्थः—पूर्वेभ्यः प्राचीनेभ्य इदंकविभ्योऽस्या बुद्धिस्थरामकथायाः कविभ्यः । रामकथासंबन्धिकविभ्य इत्यर्थः । वाल्मीकिवसिष्ठादिभ्य इति तदर्थः । कथाया बुद्धिस्थत्वात् 'पाप्मभ्यश्च पुनाति वर्धयति च श्रेयांसि सेयं कथा' इत्युपसंहारे वक्ष्यमाणत्वाच्च 'इदं'शब्देन परामर्श इत्युपपन्नम् । प्राथमिककथादर्शितस्वरूपमुपकारं ख्यापयितुं पूर्वेभ्य इत्युक्तम् । कथान्तरकविनमस्कारे प्रयोजनाभावात् इदंकविभ्य इत्युक्तम् । उच्यतेऽनेनेति वाकमुक्तिसाधनीभूतम् । कवेर्वेदयवाक्त्वेऽपि प्रारिप्सितग्रन्थसमाप्तौ कविनमस्कारस्य साधनत्वे तात्पर्यम् । करणे घञ् । तस्य चोपदेशाप्रवृत्ताविव्यस्यैव बाहुलकत्वम् । अन्यथा ल्युडा भाव्यम् । 'संज्ञायामिति च प्रायिकम्' इत्युक्तत्वान्न दोषः । यद्वा,—उच्यते यत्तत् वाकम् । कर्मणि घञ् । 'अकर्तरि च कारके—' (३।३।१९) इत्यनुशासनात् वाचिकं नमः प्रशास्महे इच्छामः निर्दिशाम इति वा । तां पूर्वोपस्थिताम् । प्रवृत्तिनिमित्तविधयास्याः कविपदेनोपस्थितेः । अमृतामानुपूर्व्यां नित्याम् । शब्दस्य नित्यत्वपक्षे स्वरूपेण नित्यामित्यर्थः । यद्वा,—अमृतं मोक्षस्तदस्या अस्तीत्यमृता ताम् । मत्वर्थीयोऽच्प्रत्ययः । तेन स्त्रीत्वोपपत्तिः । प्रयोजकतासंबन्धेन मोक्षवतीमित्यर्थः । रामायणादिना मोक्षप्रयोजकत्वं च 'एकैकमक्षरं पुंसां महापातकनाशनम्' इति स्फुटम् । अत्र हेतुमाह—आत्मनः कलां परमात्मप्रतिपादकविद्याम्, 'विद्यायां कालभेदे च मुक्तौ शिल्पे कलेति च' इति वैजयन्ती । रामायणादिकाम् । परमात्मप्रतिपादकत्वं च 'वेदवेद्ये परे पुंसि' इत्यादौ स्पष्टम् । रामायणाध्यात्मरामायणरूपां वन्देमहि प्रणमाम । 'विषयमतल्लजसंमर्दो विजयते' इति बालरामायणनाटके स्फुटम् । अस्यां

योजनायां पूर्ववत्काव्यार्थसूचनं बोद्धव्यम् । केचित्तु–'इदम्' इति भिन्नपदम्, 'नमः वा कं' इति च पदत्रयम् । कविभ्य इदं नमः प्रशास्महे इत्यन्वयः । वाशब्दः समुच्चयार्थः । कमित्यस्य ब्रह्माणमित्यर्थः । एवं च वाणीं सरस्वतीं देवीं कं वा ब्रह्माणं च वन्देमहि च प्रणमाम च । क्रियाद्वयसमुच्चायकश्चकारः । वन्दनक्रियानिरूपितकर्मद्वयसमुच्चायकस्तु वाशब्दः–इत्याहुः, तन्न; व्यवहितान्वयात् । 'यत्राष्टभिर्द्वादशभिरष्टादशभिरेव वा । द्वाविंशत्या पदैर्वापि सा नान्दीति प्रकीर्तिता ॥' इत्यत्र चतुर्दशपदानुक्तेश्च । अन्ये तु–'पूर्ववदेव पदानि । इदं नमो वा पूर्वेभ्यः कविभ्यः कं प्रशास्महे । तां वाणीं वन्देमहि' इत्यन्वयमुक्त्वा 'इदं नमो वा पूर्वेभ्यः कविभ्यः अन्यं कं प्रशास्महे तामेव वाणीं वन्देमहि । इतः प्राचीनं नमः पूर्वकविभ्यः । अन्यं प्रति न कृतमेव । इदं वा तदन्यं वा कं प्रति प्रशास्महे इत्यर्थः' इति वदन्ति । तदपि नः प्रतीत्यध्याहारापत्तेः । नच 'शासिदुहिरुधि-' इत्यादिना द्विकर्मकत्वं 'माणवकं धर्मं शास्ति' इतिवदिति वाच्यम्; तत्र 'शासु अनुशिष्टौ' इत्यस्यैव ग्रहणाच्च । नच 'तदेवेदम्' इति वाच्यम्; तस्य परस्मैपदित्वात् अर्थासंगतेः, चकारस्यावधारणार्थकत्वाश्रयक्लेशात् पदनियमासिद्धेश्च । यदप्युक्तम्–'पूर्वेभ्यः कविभ्यः इदं नमः' इत्येकं वाक्यम्, अन्यं वा कं प्रशास्महे इत्यपरं वाक्यम्, प्रशास्महे वाचमिच्छाम इत्यर्थः' इति,–तदपि मन्दम्; एकवाक्यत्वसंभवे वाक्यभेदस्यान्याय्यत्वात्कवेर्वैश्यवाक्त्वेन वागिच्छाया असंभवाच्च त्रयोदशपदत्वापत्तेश्च । यदपि चोक्तम्— इदंकविभ्यः इदानींतनकविभ्यः पूर्वेभ्यो वा पूर्वकविभ्यश्च नमः प्रणाम कं शिरसा प्रशास्महे । 'कं शिरोम्बुनो.' इति 'मान्ताव्ययत्वात्तृतीयार्थलाभः' इति,–तदपि न; पूर्वेभ्य इत्यत्र कविभ्य इत्यध्याहारापत्तेः, कविभ्य इत्येतावन्मात्रोक्तौ उभयकविलाभे निर्देशद्वयाश्रयणे प्रयोजनाभावात्, भाविकविद्विपे मूलाभावात्, त्रयोदशपदत्वापत्तेश्च । यच्चोक्तम्–'पूर्वेभ्यो नमः इदंकविभ्यः कं वा सुखं वा प्रशास्महे प्राचीनकविभ्यो नमः प्रशास्महे इदानींतनकविभ्यः सुखं प्रशास्महे' इति,–तन्न; क्रमिकैकान्वयालाभात्, पूर्वोक्तदोषाच्च । यत्तूक्तम्—'पूर्वेभ्यो वा पूर्वकविभ्य इव इदंकविभ्य इदानींतनकविभ्यः नमः इत्येकं वाक्यम्, कं वा प्रशास्महे इत्यपरम्, सुखं इच्छामः इति तदर्थः' इति,–तन्न, विघ्नध्वंसस्यैवापेक्षितत्वेन सुखप्रार्थनाया असांगत्यात्, पूर्वदोषप्रसङ्गाच्च । केचित्तु—पूर्वेभ्य वैदिकेभ्यः कविभ्यः गजाननाय, 'गणानां त्वा गणपतिं हवामहे' इति श्रुतेः । 'कवी शुक्रगजाननौ' इति,–तन्न, बहुवचनास्वारस्यात्, पूजायां बहुत्वस्य गुरुपित्रादिवाचकशब्देभ्य एव दर्शनात् । किंचात्र गजाननस्य प्राचेतसादिसाधारणकान्तदर्शित्वरूपकवित्वेन कविपदादुपस्थितिर्न शक्या । सामान्यशब्दस्य विशेषव्यवस्थापकाभावात् पूर्वेभ्यः इत्यस्य च साधारणत्वात् न तद्व्यवस्थापकम् । 'कवी शुक्रगजाननौ' इति कोशाद्गजाननत्वेन तदुपस्थितिरपि न शक्या; पूर्वशब्दवैयर्थ्यापत्तेः । न ह्यपूर्वः कश्चिद्गजाननोऽस्ति येन तद्व्यावृत्त्या तत्सार्थक्यं स्यात् । 'संयोगो विप्रयोगश्च साहचर्यं विरोधिता' इत्यारभ्य 'शब्दार्थस्यानवच्छेदे विशेषे स्मृतिहेतवः' इत्युक्तरीत्या शुक्रादिव्यवच्छेदकत्वपूर्वकं गजाननोपस्थापकप्रकरणाद्यभावाच्च । नच वक्तुरपि संयोगादिप्रमाणेष्वन्यतमत्वेन

(नान्द्यन्ते ।)

सूत्रधारः—अलमतिविस्तरेण । अद्य खलु भगवतः कालप्रिया[1]-नाथस्य यात्रायामार्यमिश्रान्विज्ञापयामि—एवमत्रभवन्तो विदांकुर्वन्तु । अस्ति [2]खलु तत्रभवान्काश्यपः श्रीकण्ठपदलाञ्छनः[3] पदवाक्यप्रमाणज्ञो [2]भवभूतिर्नाम [4]जतुकर्णीपुत्रः ।

परिगणनात् भवभूतेश्च मालतीमाधवे 'वैनायक्यश्चिरं वो वदनविधुतयः पान्तु' इत्युक्त्या विनायकभक्तत्वावगमात् अत्रापि तत्परत्वं युक्तमिति वाच्यम्; तस्य महावीरचरिते परित्यागात् । अत्र औचित्यरूपदुर्बलप्रमाणमवष्टभ्य बहुवचनश्रुतेः पूजालाक्षणिकत्वस्यान्याय्यत्वाच्च । यत्तु तेनैवोक्तम्—'अनुग्राहक-'इत्यादि, तत्तु अमात्यानुवर्तनपुरःसरराजदर्शनादिन्यायविरोधादुपेक्ष्यम् । तेनैव 'कवीन्द्राः कल्पन्ते स्वयमपि विरिञ्चिप्रभृतयः' इत्यानन्दलहर्याद्युपष्टम्भेन चतुर्मुखपरत्वमुपक्षिप्य 'केतकीकुसुम–' इत्यादिना 'या ब्रह्माच्युतशंकरप्रभृतिभिः' इत्यादिना च दूषित इति,–तत्तुच्छम्; 'भवन्तधरा ये च ये च तान्समनुमताः' इत्यादिभागवतप्रामाण्येन गजाननस्य नमस्कारानर्हत्वशापदानात् । 'या ब्रह्माच्युतशंकरप्रभृतिभिः सर्वैः सुरैः सेविता' इति ब्रह्मशंकरापेक्षया प्राधान्ये विनायकापेक्षया तस्य कैमुत्यसिद्धत्वाच्चेति ग्रन्थगौरवभिया विरम्यत इत्यलम् ॥१॥ नान्दीलक्षणं तु—'मङ्गाष्टभिर्द्वादशभिः' इत्यादि दशरूपकादिषु स्फुटम् । नाटकलक्षणं च—'वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते । प्रख्याततनायकोपेतं नाटकं तदुदाहृतम् ॥' इति । यद्यपि करुणरस एवास्मिन्नाटके प्रधानमिति सर्वजनीनं सूचितम्, मरणस्य प्रसक्तिपूर्वकप्रतिषेधो नाटकप्रतिपाद्य इति सूचयता नान्दीस्थामृतपदेन करुण एवास्मिन्नाटके प्रधान इति, तथापि वीर–शृङ्गारौ प्रायिकौ इत्युक्तेन दोष इत्याहुः । पूर्वरङ्गलक्षणं तु–'यन्नाट्यवस्तुनः पूर्वं रङ्गविघ्नोपशान्तये । कुशीलवाः प्रकुर्वन्ति पूर्वरङ्गः स उच्यते ॥' इति । प्रस्तावनालक्षणं तु—'सूत्रधारो नटीं ब्रूते मारिषं वा विदूषकम् । स्वकार्यप्रस्तुताक्षेपिचित्रोक्त्या यत्तदामुखम् ॥ प्रस्तावना वा तत्र स्यात्' इति । **नान्द्यन्त** इति । नान्द्याः पूर्वोक्ताया अन्ते समाप्तौ सूत्रधारः । प्रविश्य, आहेति शेषः । तदुक्तम्—'पूर्वरङ्गं विधायादौ सूत्रधारे विनिर्गते । प्रविश्य तद्वदपरः काव्यमास्थापयेन्नटः ॥' इति । प्ररोचनां प्रस्तोतुं सामाजिकावधानायाह—**अद्य खलु भगवत** इति । भगवतो ज्ञानशक्त्यादिगुणवतः कालप्रियानाथस्य कालप्रियानामाम्बिकाया नाथः शिवस्तस्य ।

पाठा०–१ '°प्रिय°'. २ 'अद्य भग°'. ३ 'लाञ्छनो भवभूतिः'. ४ 'जातु°'.

टिप्प०–1 महाकालाभिधेयं चण्डीश्वरस्थानं सांप्रतमपि प्रथितं वरीवर्त्युज्जयिन्याम् । तथा च मेघदूतेऽपि—'भर्तुः कण्ठच्छविरिति गणैः सादरं वीक्ष्यमाणः पुण्यं यायास्त्रिभुवनगुरोर्धाम चण्डीश्वरस्य' इति ।

2 भवभूतिस्तु विदर्भाभिजनः सप्तमशतकोत्तरार्धीयकान्यकुब्जनृपस्य यशोवर्मणः सभायामासीदिति 'कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः । जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम्' इति राजतरङ्गिणीतः (४।१४४) समवगम्यते । अष्टमशतकीयोऽयमित्यन्ये ।

यं ब्रह्माणमियं देवी वागवश्यैवान्ववर्तत ।[1][2]
उत्तरं रामचरितं तत्प्रणीतं प्रयोक्ष्यते ॥ २ ॥

इयं च कथा पौराणिकी वेदितव्या । यात्रायामुत्सवे आर्याः पूज्या मिश्रा ज्ञानिनस्तथाविधान्विज्ञापयामि । एवं वक्ष्यमाणप्रकारेण अत्रभवन्तः पूज्या यूयम् । 'अत्रभवत्तत्रभवच्छब्दौ पूज्यार्थौ' इत्युक्तेः । यद्वा,-अत्रास्मिन्नगरे भगवन्तः । यूयमित्यर्थः । विदांकुर्वन्तु । 'विदांकुर्वन्त्वित्यन्यतरस्याम्' इति सूत्रान्निशिष्टोऽयं शब्दः । यात्रायामिति काल उक्तः । अत्रेति देश उक्तः । 'निर्देशो देशकालयोः' इत्युक्तेः । **अस्ति खल्विति** । काश्यपः कश्यपगोत्रोद्भवः । ऋष्यण्प्रत्ययः । 'पश्यकः कश्यपो भवति' इति सर्वज्ञतया श्रुतिप्रसिद्धकश्यपवंश्यः । 'श्रीकण्ठ' इति पदं शब्दः लाञ्छनं यस्य स तथोक्तः । श्रीकण्ठनामक इत्यर्थः । 'द्वादशेऽहनि पिता नाम कुर्यात्' इति पैतृकं नामधेयमिदम् । पदवाक्यप्रमाणज्ञः । व्याकरणन्यायमीमांसापरिज्ञातेत्यर्थ. । भवभूतिर्नाम भवभूतिरिति प्रसिद्धनामवान् । एतत्कृतः 'साम्बा पुनातु भवभूतिपवित्रमूर्तिः' इति श्लोकश्रवणसंतुष्टो राजा भवभूतिरित्येनं ख्यापयामासेति कथा अत्रानुसंधेया । एवमन्यत्रापि कवितानुसारेण तत्तन्नामधेयम् । यथा—रत्नखेटकः, कोटिसारः, इति । उदयरक्तं चन्द्रबिम्बं रतिपतिरत्नखेटकत्वेनोत्प्रेक्षितवानित्यैतिह्यस्य, कामिनीस्तनमण्डलं प्रति 'कुलाचलेन्द्रादपि कोटिसारः' इत्युक्तवानित्यैतिह्यस्य, च तन्मूलत्वात् किंचास्मै कवये ईश्वर एव भिक्षुरूपेणागत्य भूतिं दत्तवानिति वदन्ति । एवं च भवाद्भगवतो भूतिर्यस्येति भवभूतिरित्यन्वर्थं इत्याहुः । **यमिति** । ब्रह्माणम् । यजनादिषट्कसंनिरतमित्यर्थः । लाक्षणिकोऽयम्; मुख्यार्थपरत्वे प्रयोजनाभावात् । तथाविधं यं भवभूतिमियं देवता प्रसादादिना साध्यत्वेन प्रसिद्धा वाग्देवी वश्या सत्येव विधिप्रतिषेधार्हा सत्येवान्ववर्ततानुवर्तितवती । यद्वा,-ब्रह्माणं यमेव वश्या सत्यन्ववर्तत, न त्वन्यमित्यर्थः । पूर्वस्मिन्नर्थे वश्यैवान्ववर्तत नत्ववश्यान्ववर्तत । अलाभेन कालिदासादिषु स्वयमवश्यैव कालिदासप्रभृत्यनुरोधेनागताया वाग्देव्या यदनुवर्तनं तद्व्यावर्तते । अत्र 'यं ब्रह्माणमियं देवी वागवश्येवान्ववर्तत' इति द्वितीयान्त'ब्रह्म'शब्देन 'इव'शब्देन च युक्तं पाठान्तरमपि क्वचिद्दृश्यते । तत्रायमर्थः-इयं वाग्देवी यं भवभूतिं ब्रह्माणमिव स्वभर्तारं चतुर्मुखमिव वश्या सत्यन्ववर्ततानुवर्तितवती । देवस्य स्त्री देवी । दीव्यति प्रकाशयति प्रकाशते इति वा देवी । 'देवट्' इति टित्त्वान् ङीप् । यद्वा—यं देवी यादृशभवभूतिविषयकेच्छावती सती इयं वाग्देवी ब्रह्माणं वश्येवान्ववर्तत । वश्यानुवर्तनाभिनयमात्रं स्वभर्तरि, भावबन्धस्तु भवभूतावेवेति भावः । 'सावित्र्याः प्रथमं यमुज्ज्वलगुणं वव्रे स्वयम्' इतिवरस्वयंवरं कृतवतीत्यर्थ. । दिवुधातोः 'कान्तिगतिषु' इत्युक्तेः इच्छायां वृत्तिः । दीव्यति कामयत इति देवीति कृदन्तदेवीपदयोगेऽपि 'तदर्हम्' इति ज्ञापकात्, 'धथैरामोदमुत्तमम्' इति प्रयोगाच्च । कृद्योगषष्ठ्या अनित्यत्वात् षष्ठ्या अग्राह्या द्वितीया उत्तमपरिमलकर्मकपानकर्तरि तदा षष्ठीप्रस-

---

पाठा०-१ 'ब्राह्मण'. २ '"वश्येवानुवर्तत'.

एषोऽस्मि कविवशादायोध्यकस्तदानींतनश्च संवृत्तः । (समन्तादवलोक्य ।)

भोः ! यदा तावदत्रभवतः पौलस्त्यकुलधूमकेतोर्महाराजरामस्यायं पट्टाभिषेकसमयो रात्रिंदिवमसंहतनान्दीकः, तत्किमिदानीं विश्रान्तचारणानि चत्वरस्थानानि ?

ज्ञात् । परस्यत्र पाठे व्यवहितान्वयो दोष इत्याहुः । 'उत्तरं रामचरितं यत्प्रणीतं प्रयोक्ष्यते' इति यच्छब्दपाठ इति मत्वा 'यं वाग्देव्यन्ववर्तत । यत्प्रणीतं प्रयोक्ष्यतेऽभिनेष्यते, स भवभूतिर्नाम कविः अस्ती'ति पूर्वेणान्वयः । यच्छब्देनित्यसंबन्धात् स इत्यस्य लाभ इति केचित् । परे तु—'तत्प्रणीतम्' इति तच्छब्दयुक्तमेव पाठमुपेत्य 'इयं वाग्देवी यं भवभूतिमन्ववर्तत स भवभूतिर्नाम कविरस्ति । तत्प्रणीतं उत्तरं रामचरितं प्रयोक्ष्यत इत्यन्वयः । अन्यथा विधेयस्य स्फुटप्रतीत्यनापत्तेश्च—इति वदन्ति । इयं प्ररोचना प्रस्तुता । तदुक्तम्—'निवेदनं प्रयोज्यस्य निर्देशो देशकाल्योः । कविशब्यनटादीनां प्रशंसा तु प्ररोचना ॥' इति ॥ २ ॥

एषोऽस्मीति । कविवशात्काव्यानुरोधेनायोध्यकः अयोध्यासंबन्धिक इत्यर्थः । 'धन्वयोपधाद्वुञ्' (४।२।१२१) इति सूत्रेण वुञ् तस्याकादेशश्च । तदानींतनश्च रामपट्टाभिषेककालीनश्च संवृत्तोऽस्मीति योजना । निष्पन्नोऽस्मीत्यर्थः । अयमाशयः—यद्यपि भोजराजमतरीत्या सूत्रधारनटीप्रभृतिभिः प्रकृतदेशकालावलम्बिनीं प्रस्तावनामुक्त्वा सूत्रधारादीन्निष्क्राम्य भूमिकां प्रवेश्य प्रवर्तिष्यमाणकाव्याभिनयकथासूचनविष्कम्भो वक्तव्य, तथापि सूत्रधारस्यैव काव्यकथाघटकदेशकालसंबन्धप्रदर्शनस्य विष्कम्भवर्ण्यस्योपन्यासः सूत्रधारत्वापरित्यागाच्च प्रस्तावनात्वाहानिरिति कवेर्मतम् । तदनुसारेणाहमायोध्यकः संवृत्तोऽस्मीति । अयोध्यासंबन्धित्वं च तस्यो कादाचित्कावस्थानरूपम् । तेन वैदेशिकोऽस्मीति उपरितनग्रन्थेन न विरोधः । **यदा तावदिति** । अत्रभवतः पूज्यस्य पौलस्त्यकुलस्य रावणवंशस्य धूमकेतोरग्निवद्ध्वंसीकर्तुरुत्पातप्रदर्शकस्य वा महाराजश्चासौ रामश्च इति विग्रहः तस्य । रात्रिंदिवमहर्निशम् । 'अचतुर-'(५।४।७७)इति सूत्रे निपातितोऽयं शब्दः । असंहतनान्दीकोऽविच्छिन्नमङ्गलः । 'शेषाद्विभाषा' (५।४।१५४) इति कप् ह्रस्वप्रतिषेधः । अयं पट्टाभिषेकसमयः पट्टाभिषेकमुहूर्तं यदा यस्मिन्काले । यद्वा,-समय आचारः पट्टाभिषेकरूप आचारो यदा यस्मिन्काले ।

(प्रविश्य ।)

नटः—भाव ! प्रेषिता हि स्वगृहान्महाराजेन लङ्कासमरसुहृदो महात्मानः प्लवङ्गमराक्षसाः सभाजनोपस्थायिनश्च नानादिगन्तपावना ब्रह्मर्षयो राजर्षयश्च, यत्समाराधनायैतावतो दिवसान्प्रमोद आसीत् ।

सूत्रधारः—आः, अस्त्येतन्निमित्तम् ।

नटः—अन्यच्च,—

वसिष्ठाधिष्ठिता देव्यो गता रामस्य मातरः ।
अरुन्धतीं पुरस्कृत्य यज्ञे जामातुराश्रमम् ॥ ३ ॥

सूत्रधारः—वैदेशिकोऽस्मीति पृच्छामि । कः पुनर्जामाता?

नटः—

कन्यां दशरथो राजा शान्तां नाम व्यजीजनत् ।
अपत्यकृतिकां राज्ञे रोमपादाय तां ददौ ॥ ४ ॥

स्थूलकालस्याधारत्वात् । प्रासादखट्वापर्यङ्कन्यायोऽत्रानुसंधेयः ॥ **भाव! प्रेषिता** इति । महात्मानो महाधैर्याः । सभाजनं सपर्यामुपतिष्ठन्ते प्राप्नुवन्तीति सभाजनोपस्थायिनः । 'सुप्यजातौ–' (३।२।७८) इति णिनिः । इदं च मध्यमणिन्यायेन पूर्वोत्तराभ्यामन्वेति ब्रह्मर्षयो गौतमविश्वामित्रादयः, राजर्षयस्तु जनकप्रभृतयः, देवर्षीणां ऊर्ध्वदिग्गमनान्नानादिगन्तेत्युक्तिः । यत्समाराधनाय येषां प्लवङ्गमादीनां समाराधनाय पूजनायैतावतो दिवसानेतावत्सु दिवसेषु । अत्यन्तसंयोगे द्वितीया । प्रमोदः । चारगतागतहेतुभूतप्रहर्ष इत्यर्थः । यत्समाराधनाय प्रमोद आसीत्, ते प्रेषिता इत्यन्वयः । 'तत्समाराधनाय' इति तत्पदयुक्तपाठे तु न विश्रान्तचारचरणत्वे हेतुरुक्तो भवतीत्यत्राह—**यत्समाराधनायेति** । एवं चारचरणहेतुर्गत इति भावः । आ, अस्त्येतन्निमित्तम् । आ इति स्मरणवाचकम् । अत एव 'निपात एकाजनाङ्' (१।१।१४) इति प्रगृह्यत्वात् आ अस्तीति संध्यभावः । 'वाक्यस्मरणयोरङित्' इत्याद्युक्तेः । एतन्निमित्तमस्ति । मया विस्मृतमिति भावः ॥ **वसिष्ठाधिष्ठिता** इति । अरुन्धतीं पुरस्कृत्य वसिष्ठाधिष्ठिता इत्यन्वयः । गुरुपत्नीत्वप्रयुक्तप्राधान्यादरुन्धतीं मुख्यां कृत्वा वसिष्ठेन व्यापारिता इत्यर्थः । वसिष्ठः कर्तव्यं अरुन्धतीमुखमवलोकमानोऽनुशास्ति । ततो देव्योऽरुन्धत्या सह कर्तव्यमनुतिष्ठन्तीति भावः । 'जामातुः' इत्येतन्मध्यमणिन्यायेन यज्ञाश्रमाभ्यामन्वेति। यज्ञे यज्ञनिमित्तम् । 'निमित्तात्कर्मयोगे' (वा. १४९०) इति सप्तमी । सतीत्यध्याहारेण यज्ञे सति आश्रमे गता इति वार्थः ॥ ३ ॥ वैदेशिको विदेशो देशान्तरं तत्र भवो वैदेशिकः । अध्यात्मादित्वाट्ठञ् । विदेशस्थस्यापि कदाचिदयोध्यास्थितिसंभवादित्याहुः ॥ **कन्यामिति** । व्यजीजनत् अजनयत् । 'जनी प्रादुर्भावे' इति

पाठा०–१ '°न्वागताश्च°'. २ '°सानुत्सव'. ३ 'राघवमातरः'. ४ 'पुनरसौ'.

विभाण्डकसुतस्तामृष्यशृङ्ग उपयेमे। तेन च सांप्रतं द्वादशवार्षिकं सत्रमारब्धम्। तदनुरोधात्कठोरगर्भामपि जानकीं विमुच्य गुरुजनस्तत्र यातः।

सूत्रधारः—तत्किमनेन? एहि। राजद्वारमेव स्वजातिसमयेनोपतिष्ठावः।

नटः—तेन हि निरूपयतु राज्ञः सुपरिशुद्धामुपस्थानस्तोत्रपद्धतिं भावः।

सूत्रधारः—मारिष!

धातोर्णिच्। तां शान्तां रोमपादाय रोमपादनाम्नेऽपत्यस्य कृतिर्व्यापारो यस्यास्तथाविधाम्। 'शेषाद्विभाषा' (५।४।१५४) इति कप्। 'कन्यां ददौ' इत्युक्ते कलत्रार्थमिति प्रतीतेस्तद्वारणाय 'अपत्यकृतिकाम्' इति। ददौ दत्तवान्॥४॥ तेन ऋष्यशृङ्गेण। द्वादशवर्षाणि भविष्यतीति द्वादशवार्षिकम्। 'तमधीष्टो भृतो भूतो भावी' इत्यधिकृत्य विहितष्ठञ्, द्विगुः। 'वर्षाल्लुक् च' (५।१।८८) इति पाक्षिको लुगभावः। अनुशतिकादित्वादुभयत्र वृद्धिः। नतूत्तरपदवृद्धिमात्रम्। 'अभविष्यति' इति प्रतिषेधात्। न च द्वादशवर्षाणि भूतमित्यर्थोऽस्त्विति वाच्यम्, आरब्धमित्युक्तेरसाङ्गत्यापत्तेः। तदनुरोधात्कठोरगर्भामपीत्यादिना कठोरगर्भेति नानीता सीतेत्युक्ततया सीतायाः गर्भिणीदशायामेतत्सत्रमारब्धमिति स्पष्टमवगम्यते। एवं द्वितीयाङ्कविष्कम्भे 'समनन्तरं च गर्भैकादशे वर्षे क्षात्रेण कल्पेनोपनीय त्रयीमध्यापितौ' इत्युक्त्वा 'संप्रति परिसमाप्तं द्वादशवार्षिकं सत्रम्' इति वक्ष्यमाणतया अत्रत्य'द्वादशवार्षिक'शब्दस्य द्वादशवर्षाणि भूतमित्यर्थाभ्युपगमेन तद्विरोधापत्तेरिति ध्येयम्। तदनुरोधात्तदनुसरणाद्धेतोः, कठोरगर्भां पूर्णगर्भाम्। 'कठोर'शब्दः पूर्णवाची। तदुक्तमुणादिषु वैयाकरणैः—'अयं पूर्णतायामपि' इति। **यात** इति। 'अनाहूतोऽध्वरं गच्छेत्' इति विधेः किं पुनर्न्यायादिति भावः॥ **तत्किमिति**। स्वजातिसमयेन स्वजातिमर्यादया। उपतिष्ठावः सेवयावः। रामस्य 'आत्मानं मानुषं मन्ये रामं दशरथात्मजम्' इति देवत्वाभावात् 'उपाद्देवपूजा-' (सू. वा. २१४) इत्यादिना नात्मनेपदम्। तथा च स्वजात्यनुगुणरूपं यत्स्तोत्रं तत् कुर्व इति बोधः॥ **तेनेति**। स्तोतव्यमिति यतेनेत्यर्थः। सुपरिशुद्धां सुष्ठु दोषरहिताम्। स्तुवन्त्यनेनेति स्तोत्रं ग्रन्थः तस्य पद्धतिरानुपूर्वी। उपस्थानाय गुणिनिष्ठगुणाभिधानाय स्तोत्रपद्धतिमित्यर्थः। समासस्तु षष्ठ्यन्तस्येति बोध्यम्। निरूपयतु उत्पादयतु। वदत्वित्यर्थः॥ ननु यदुक्तं स्तुतिं निरूपयत्विति, तदवगच्छामि, सुपरिशुद्धामिति नाभ्युपगच्छामि; दोषरहितत्वरूपपरिशुद्धत्वस्य प्रयोजनाभावात्। स्तुतिवचनं तु कर्तव्यमेव, स्वजातिनियतव्यापारत्वादित्याह—**सर्वथेति**। सर्वेण प्रकारेण सर्वथा। व्यवहर्तव्यं व्यवहारः कर्तव्यः। भावे तव्यप्रत्ययः। 'व्यवहार'शब्दः स्तुतिकरणरूपव्यापारपरः। अवचनीयता वचनीयं दोषस्तद्रहितता। सुपरिशुद्धतेत्यर्थः। कुतः किमर्थम्? यद्वा,—कुतः कस्मै?

पाठा०—१ 'गतः'.

सर्वथा व्यवहर्तव्यं कुतो ह्यवचनीयता ।
यथा स्त्रीणां तथा वाचां साधुत्वे दुर्जनो जनः ॥ ५ ॥

नटः—अतिदुर्जन इति वक्तव्यम् ।

देव्या अपि हि वैदेह्याः सापवादो यतो जनः ।
रक्षोगृहस्थितिर्मूलमग्निशुद्धौ त्वनिश्चयः ॥ ६ ॥

सूत्रधारः—यदि पुनरियं किंवदन्ती महाराजं प्रति स्यन्देत, ततः कष्टं स्यात् ।

'सार्वविभक्तिकस्तसिः' इति चतुर्थ्यर्थे तसिः । अयमाशयः—दोषवत्तया वा दोषरहिततया वा गुणवत्तया वा स्तुतिकरणरूपव्यापारः कर्तव्यः । तस्य स्वजातीयधर्मत्वात्त्वदुक्तसुपरिशुद्धतया तु किम्? तस्याः फलाभावादिति । ननु जनाभिनन्दनमेव तत्फलमस्तु, कुतः फलाभाव इत्यत्राह—**यथा स्त्रीणा**मित्यादिना । पूर्वपादस्थ'हि'शब्दस्यात्र सबन्धः । हि यस्माज्जनः स्त्रीणां साधुत्वे दुर्जनः, तस्मादवचनीयता किमर्था? इति पूर्वेण संबन्धः । जनः स्त्रीणां साधुत्वे यथा पातिव्रत्यविषय इव वाचां साधुत्वे माधुर्यौज्ज्वल्यादिविषये दुर्जनो दोषदर्शी । दोषदर्शित्वमेव हि दौर्जन्यमिति भावः । यथा स्त्रीणां साधुत्वे जनो दुर्जनः, तथा वाचा साधुत्वेऽपि जनो दुर्जनः, हि यस्मात्तस्मादवचनीयता किमर्थेत्यर्थः ॥ ५ ॥ प्रकृतकथासंगतये यथा स्त्रीणामिति दृष्टान्त उक्तः । तदुपजीव्य प्रकृतमवलम्बते—**नटः—अतिदुर्जन इति वक्तव्य**मिति । तत्र हेतुमाह—**देव्या** इति । हि यत इत्यनयोर्यथाक्रमं पूर्वोत्तरार्धयोरन्वयः । हि यस्माद्देव्या दीप्तिमत्या अपि । स्वभावतो दोषप्रतिभटाया अपीत्यर्थः । वैदेह्या विदेहराजपुत्र्याः । संबन्धसामान्ये षष्ठी । जनः सापवादः । अपवादो दोषकथनम्, तेन सहित इत्यर्थः । तथा च वैदेहीसंबन्ध्यपवादसहित इत्यर्थः । नित्यसापेक्षत्वात्समासः । तदुक्तम्—'संबन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते' इति । यतश्च रक्षोगृहस्थितिः राक्षसगृहावस्थानमात्रम् । न त्वन्यदिति भावः । मूलं दोषकथनहेतुः । अग्निशुद्धौ अनिश्चयस्तु निश्चयाभावश्च । तुशब्दः चार्थकः । अत्र 'देव्या' इति दोषाभाव उक्तः । 'रक्षोगृहस्थितिः' इत्यनेन असाधारणहेत्वभाव उक्तः । 'अग्निशुद्धौ' इत्यनेन बाधकप्रमाणमुक्तम् । तथा च एतत्सर्वमपि नावलोकितमिति भावः । विषयप्रभावमविगणय्य असतोऽपि दोषस्य कथनं सुलभं दुर्जनकार्यम् । तत्राप्यसाधारणहेतुमप्यदृष्ट्वा विषयप्रभावमप्यविगणय्य असतोऽपि दोषस्य कथनं ततोऽप्यतिदुर्जनकार्यम् । तत्रापि बाधकप्रमाणमप्यविश्वस्यासाधारणकारणमप्यदृष्ट्वा विषयप्रभावमप्यविगणय्यासतोऽपि दोषस्य कथनं ततोऽप्यतिदुर्जनकार्यमिति । अत्र हि यस्मात्सापवादः । यतश्च रक्षोगृहस्थितिर्मूलम् । अग्निशुद्धावनिश्चयश्च जनस्य । तस्मात् जनोऽतिदुर्जन इति वक्तव्यमित्येवं पूर्वेणान्वयः ॥ ६ ॥ **यदि पुनरि**ति । किंवदन्ती लोकवादः । स्यन्देत प्रसरेत् । श्रवणविषयी भवेदिति

पाठा०—१ 'व्यवहर्तव्ये'. २ 'देव्यामपि हि वैदेह्यां'. ३ '°गृहे'. ४ 'स्यात् ततोऽतिकष्टं' इ.

नटः—सर्वथा ऋषयो देवाश्च श्रेयो विधास्यन्ति । (परिक्रम्य) भो भोः, केदानीं महाराजः ? । (आकर्ण्य) एवं जनाः कथयन्ति—

> स्नेहात्सभाजयितुमेत्य दिनान्यमूनि
> नीत्वोत्सवेन जनकोऽद्य गतो विदेहान् ।
> देव्यास्ततो विमनसः परिसान्त्वनाय
> धर्मासनाद्विशति वासगृहं नरेन्द्रः ॥ ७ ॥

(इति निष्क्रान्तौ ।)

इति प्रस्तावना ।

(ततः प्रविशत्यासनोपविष्टो रामः सीता च ।)

रामः—देवि वैदेहि ! विश्वसिहि । ते हि गुरवो न शक्नुवन्ति विहातुमस्मान् ।

> किंत्वनुष्ठाननित्यत्वं स्वातन्त्र्यमपकर्षति ।
> संकटा ह्याहिताग्नीनां प्रत्यवायैर्गृहस्थता ॥ ८ ॥

यावत् । अनेन प्रथमाङ्कार्थः सूच्यते । 'सर्वथा ऋषयः' इत्यादिनानेन शेषाङ्कार्थः सूचितः । एष ऋषिकर्तृकश्रेयोविधानरूपबीजन्यासादुपक्षेपो नाम सन्ध्यङ्गमुक्तम् । यथा—'बीजन्यास उपक्षेपः' इति ॥ **आकर्ण्येति** । इदमाकाशभाषितमुच्यते । तदुक्तम्—'अप्रविष्टैः सहालापो भवेदाकाशभाषितम्' इति । **स्नेहादिति** । सभाजयितुं पूजयितुम् । उत्सवेन हर्षजनकव्यापारेण । विमनसो दुःखितहृदयायाः परिसान्त्वनाय तद्दुःखापनयनक्षममधुरवचनप्रयोगाय । 'तुमर्थाच्च' (२।३।१५) इति चतुर्थी । धर्मासनात् क्षत्रियधर्मभूतराज्यपरिपालनार्थसिंहासनादिस्थलं । वासगृहं स्वावासगृहम् । विशति प्रविशति ॥ ७ ॥ एवं प्रस्तावना प्रस्तुता । अथाङ्कः प्रस्तूयते—**ततः प्रविशती**त्यादिना । अङ्कलक्षणं तु—'प्रत्यक्षनेतृचरितो बिन्दुव्याप्तिपुरस्कृतः । अङ्को नानाप्रकारार्थसंविधानरसाश्रयः ॥' इति । विश्वसिहि सतोषं प्राप्नुहि । 'समश्वासिहि' इति पाठान्तरम् । विहातुं त्यक्तुम् । **किंत्विति** । किंतु अनुष्ठानस्य नित्यनैमित्तिकादिकर्मकलापनिर्वर्तनस्य नित्यत्वं नियतता । अनुष्ठानाभावविरहरूपनियम इत्यर्थः । स्वातन्त्र्यं स्वैरावस्थानमपकर्षति न सहते । 'अपकर्षति' इत्युक्त्या अतिक्रामदपि स्वैरावस्थानं निरुन्ध इति लाभेन, कदाचिदप्यङ्गीकृतमपि स्वैरचरितं तदाननुष्ठितकर्मानुष्ठापनेन, तदनुष्ठानाभावप्रायश्चित्तानुष्ठापनेन च लभ्यते जनैरिति तदाशयः । तदाह—**संकटा हीति** । हि यस्मात् । आहिताग्नीनां गृहस्थता गृहस्थाश्रमः प्रत्यवायैर्विहिताऽनाचरणजन्यपातकैः संकटा निबिडा दुःखरूपा वा । जाग्रत्प्रत्य-

---

पाठा०—१ 'देवताश्च'. २ 'समाश्वसिहि'. ३ 'अस्मान् वियोक्तुं'.

सीता—जाणामि अज्जउत्त ! जाणामि । किंदु संदावआरिणो बंधुजणविप्पओआ होंति । [जानामि आर्यपुत्र ! जानामि । किंतु संतापकारिणो बन्धुजनविप्रयोगा भवन्ति ।]

रामः—एवमेतत् । एते हि हृदयमर्मच्छिदः संसारभागाः । येभ्यो बीभत्समानाः संत्यज्य सर्वान्कामानरण्ये विश्राम्यन्ति मनीषिणः ।

(प्रविश्य ।)

कञ्चुकी—रामभद्र ! (इत्यर्धोक्ते साशङ्कम् ।) महाराज !

रामः—(सस्मितम्) आर्य ! ननु रामभद्र इत्येव मां प्रत्युपचारः शोभते तातपरिजनस्य, तत् यथाभ्यस्तमभिधीयताम् ।

कञ्चुकी—देव ! ऋष्यशृङ्गाश्रमादष्टावक्रः संप्राप्तः ।

सीता—अज्ज ! तदो किं विलंबीअदि ? [आर्य ! ततः किं विलम्ब्यते ?]

रामः—त्वरितं प्रवेशय ।

(कञ्चुकी निष्क्रान्तः ।)

(प्रविश्य

अष्टावक्रः—स्वस्ति वाम् ।

रामः—भगवन् ! अभिवादये । इत आस्यताम् ।

सीता—भअवं ! णमो दे । अवि कुसलं सँजामातुअस्स गुरुअणस्स अज्जाए संताए अ ? । [भगवन् ! नमस्ते । अपि कुशलं सजामातृकस्य गुरुजनस्यार्यायाः शान्तायाश्च ? ।]

वायेत्यर्थः ॥ ८ ॥ **एवमिति** । येभ्य इति संसारभागेभ्यः । संसारेऽवश्यानुभाव्यभाग इत्यर्थः । संसारो हि शरीरसंबन्धानुबन्धिसुखदुःखसमुदायः । तथा च गुरुबन्धुवियोगादीनां तदेकदेशत्वं संगतम् । बीभत्समाना जुगुप्समानाः । एतद्दोषानुबन्धजनितचित्तवृत्तिनिवृत्तियुक्ता इत्यर्थः । बीभत्साया जुगुप्सावस्थायिकत्वादित्थं व्याख्यातम् । अत एव बीभत्समाना इत्यस्य 'जुगुप्साविराम–' (वा. १०७९) इत्यादिना पञ्चमी । 'बध बन्धने' इत्यस्मात् स्वार्थे सनि रूपमिदम् । 'बधेश्चित्तविकारे' इति वार्तिकादस्य चित्तविकारे वृत्तिः । काम्यन्त इति कामाः । कर्मणि घञ् । गृहक्षेत्रपुत्रादयस्तानित्यर्थः ॥ उपचारो व्यवहारः । यथाभ्यस्तमभ्यस्तमनतिक्रम्य । यथार्थत्वात्समासः । अभिधीयताम् ॥ अष्टावक्रस्तदाख्यः । अष्टौ वक्रा-ण्यस्येति विग्रहः । योगरूढशब्दः । 'अष्टनः संज्ञायाम्' इति (६।३।१२५) दीर्घः । हास्यरसानुप्रवेशार्थमष्टावक्रप्रवेशः । **अवि कुसलं सजामातुअस्सेति** ।

पाठा०–१ '°भागाः'. २ 'समग्गस्स'.

रामः—निर्विघ्नः सोमपीथी भावुको मे भगवानृष्यशृङ्गः, आर्या च शान्ता?

सीता—अम्हे वि सुमरेदि? [अस्मानपि स्मरति?]

अष्टावक्रः—(उपविश्य।) अथ किम्? देवि! कुलगुरुर्भगवान्वसिष्ठस्त्वामिदमाह—

विश्वंभरा भगवती भवतीमसूत
राजा प्रजापतिसमो जनकः पिता ते।
तेषां वधूस्त्वमसि नन्दिनि! पार्थिवानां
येषां कुलेषु सविता च गुरुर्वयं च ॥ ९ ॥

तत्किमन्यदाशास्महे? केवलं वीरप्रसवा भूयाः।

सजामातृकस्य सजामातृकस्य। 'प्रायो लुक्कगचजतदपयवाम्' इति सूत्रेण ककारलोपः। तस्मिन्नवशिष्टाकारसंपरस्पृष्टयकारश्रुतिश्च प्राकृतव्याकरणसिद्धा॥ **निर्विघ्न** इति। सोमपीथी सोमपा इत्यर्थः। भावुकः पूज्यः। शान्तापतित्वादिति भावः॥ **विश्वंभरेति**। नन्दिनि गुणपूर्णे! 'टुनदि समृद्धौ' इत्यस्मात् भावे घञि 'अत इनिठनौ' (पा. ५।२।११५) इति इनिप्रत्ययः। एकाक्षरात्कृतोऽजातावितिं निषेधस्तु प्रायिकः। व्रीह्यादिणिनिर्वा। नान्तत्वात् ङीप्। नन्दिनि पुत्रि! संबोधनम्। इदं च 'अस्माकं तु जनकसुता दुहितैव' इति वक्ष्यमाणरीत्या दशरथमतानुसारेण भगवती षाड्गुण्यपरिपूर्णा विश्वंभरा भूमिः। भूरित्याद्यनुक्त्वा विश्वंभरोक्तिः क्षान्तिप्रधानतासूचनाय। भवती पूज्या त्वामसूत सूतवती। 'षूङ् प्राणिप्रसवे' लङ्। शपो लुक्। 'विश्वंभरा'-शब्दस्तु 'संज्ञायां भृतृ-' (पा. ३।२।४६) इत्यादिना खच्प्रत्ययमुमागमाभ्यां निष्पन्नः। प्रजापतिना ब्रह्मणा समः। स्वाध्यायादिना ब्रह्मतुल्य इत्यर्थः। 'मान्धातारमपारसंमदि महद्भावे यशोराशिषु' इत्युक्तरीत्या ब्रह्मवत् माहात्म्यशालीति वा। राजा। राजते दीप्यते इति। 'कनिन्युवृषितक्षि-' (उ. १५४) इत्यादिना कनिन्प्रत्ययः। ब्रह्मज्ञानपरिपूर्णतया नैष्ठिकत्वनिरतिशयदीप्तियुक्त इत्यर्थः। इदं प्रोक्तं मीमांसायाम् 'क्षत्रियत्वगतेश्च' इति सूत्रविषयवाक्यप्रकरणे ज्ञानश्रुतीनां क्षत्रियवृत्तान्ते स्पष्टम्। यद्वा,—ज्ञानभक्तिवैराग्यैरस्मदादीनपि रञ्जयतीति राजा धातूनामनेकार्थत्वादिति। जनकः पूर्वोक्तप्रकारेण श्रुतिषु प्रसिद्धः। 'जनको ह वैदेहः' 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इत्यादिषु प्रसिद्ध इत्यर्थः। ते पिता। येषां राज्ञां कुलेष्विति बहुत्वं पूजायाम्। उद्भूतावयवविवक्षया, कुलं ह्युत्पादकप्रबन्धः। सर्वं जगत्सुवति कर्मानुष्ठाने प्रेरयतीति वा सविता सूर्यः। गुरुः पिता। वयमहम्। 'अस्मदो द्वयोश्च' (पा. १।२।५९) इति एकत्वे बहुवचनम्। 'सविशेषणस्य प्रतिषेधः'

पाठ०—१ 'आवुत्तो' (=भगिनीभर्ता).

रामः—अनुगृहीताः स्मः ।

लौकिकानां हि साधूनामर्थं वागनुवर्तते ।
ऋषीणां पुनराद्यानां वाचमर्थोऽनुवर्तते ॥ १० ॥

अष्टावक्रः—इदं च भगवत्याऽरुन्धत्या देवीभिः शान्तया च भूयो

इति तु न विधेयविशेषणविषये । 'ततो नु त्वं प्रेयान्वयमपि हताशाः प्रियतमाः' इत्यादिप्रयोगात् । 'यद्वा वसिष्ठाङ्गिरसौ ऋषी प्राचेतसस्तथा' इति वक्ष्यमाणरीत्या वाल्मीकेः, जृम्भकास्त्रसंप्रदानेन विश्वामित्रस्य, वामदेवादेश्च ग्रहणात् वयमिति बहुवचनम् । गुरुरित्यनुषक्तस्य वचनविपरिणामात् गुरवो हितोपदेष्टारः । गृणातीति गुरुः । 'कृग्रोरुच' (उ. २४) इत्यौणादिकसूत्रेण निष्पन्नोऽयं शब्दः । 'गुशब्दस्त्वन्धकारः स्यात् रुशब्दस्तन्निवर्तकः' इति निरुक्त्या अज्ञाननिवर्तक इत्यर्थः । गुरवः पितर इत्येव वार्थः । 'स हि विद्यातस्तं जनयति' इति स्मृतेः, 'पुत्रका इति होवाच' इत्यादिपुराणाच्च । तेषां पार्थिवानाम् । 'सर्वा पूर्वमियं येषामासीत्कृत्स्ना वसुंधरा' इत्युक्तमुख्यपृथिवीपतित्वधर्माणां वधूरसि स्नुषासि ॥९॥ **तदिति** । तस्मात् अन्यत्किं वक्ष्यमाणादितरत्किमाशास्महे ? 'आङः शासु इच्छायाम्' इति धातोर्लट् । अयं भाव.—तव गुणातिशयो नाशास्यः, तस्य 'विश्वंभरा भगवती' इत्युक्तमातृसंबन्धवशादेव तत्सिद्धेः । नापि ज्ञानभक्तिवैराग्यादिकम्; तस्य ब्रह्मवित्तमजनकसंबन्धादेव तल्लाभात् । न वा हितग्राहित्वमैश्वर्यं भर्तृसंबन्धप्रयुक्तानिकर्षाभावश्च प्रार्थ्य.; तेषां सद्गुरुसंबन्धशालिमहाराजमहाकुलप्रसूतराजकुलस्नुषात्वादेव सिद्धत्वात् । अत एतेषां नाशास्यत्वम्, किंतु वीरप्रसवत्वस्येति । एष ऋषिभ्रेयोविधानभूतवसिष्ठानुग्रहरूपबीजस्य बहूकरणात्परिकरः । तदुक्तम्—'बीजस्य बहूकरणं परिकरः' इति ॥ **अनुगृहीता** इति । एतन्मनुष्यानुग्रहरूपबीजाङ्गीकरणरूपं समाधानं नाम संध्यङ्गमुक्तम् । तदुक्तम्—'बीजाङ्गीकरणं समाधानं' इति । **लौकिकाना**मिति । लौकिकानामित्यतो व्यतिरेकनिर्देशाल्लोकान्यस्य वेदस्यैव झटित्युपस्थितेः ऋषीणामित्युक्तम् । ऋषीणां पुनः । तपस्विनामित्यर्थः । वाचमर्थोऽनुवर्तते वागधीनोऽर्थो भवति । तपस्विनामुक्तिर्हि तपःप्रभावेनानासन्नमप्यर्थमुत्पादयतीति भावः । यद्वा,—'ऋष गतौ' इत्यस्य बुद्ध्यर्थत्वात्कालत्रयवर्तिवस्तुसाक्षात्कर्तृत्वं ऋषिपदप्रवृत्तिनिमित्तम् । तथा च भाविनमर्थं दृष्ट्वा ते वदन्ति । ततः स्वकाले प्राप्ते सोऽर्थस्तामनुसरतीति भावः । हि यस्मादेवं तस्मादनुगृहीता वयमित्यन्वयः । एतत् ऋषिभ्रेयोविरलणरूपबीजगुणवर्णनात् विलोभनं नाम संध्यङ्गमुक्तम् । यदुक्तम्—'बीजगुणवर्णनं विलोभनम्' इति ॥ १० ॥ **इदं चे**त्यादि । गर्भस्य दौहृदं लक्षणम् 'सकीचकैर्मारुतपूर्णरन्ध्रैः' इतिवत् विशेष्यमात्रपरम्; अन्यथा दौहृदशब्दस्यैव गर्भचिह्नवाचित्वात् । तच्च विशिष्टवस्तुविषयाभिलाषादिरूपम् । तस्योदय आविर्भावः । मानयितव्यः संभावयितव्यः । तथा संपादनेन सफलीकार्य इति भावः ॥

पाठा०-१ '°ऽनुधावति'.

भूयः संदिष्टम् । यः कश्चिद्गर्भदोर्हृदोदयो[1] भवत्यस्याः सोऽवश्यमचिरान्मानयितव्य[2] इति ।

रामः—क्रियते यैषा[3] कथयति ।

अष्टावक्रः—ननान्दुः पत्या च देव्याः संदिष्टम्[4]—'वत्से ! कठोरगर्भेति नानीतासि । वत्सोऽपि रामभद्रस्त्वद्विनोदार्थमेव स्थापितः । तत्पुत्रपूर्णोत्सङ्गामायुष्मतीं द्रक्ष्यामः'[5] इति ।

रामः—(सहर्षलज्जास्मितम् ।) तथास्तु । भगवता वसिष्ठेन न किंचिदादिष्टोऽस्मि[6] ?

अष्टावक्रः—श्रूयताम्,—

जामातृयज्ञेन वयं निरुद्धास्त्वं बाल एवासि नवं च राज्यम् ।
युक्तः प्रजानामनुरञ्जने स्यास्तस्माद्यशो यत्परमं धनं वः ॥ ११ ॥

क्रियत इति । एषा कथयति यदि क्रियत इत्यन्वयः ॥ **ननान्दुरि**ति । ननान्दुः शान्ताया इत्यर्थः । देव्या इत्यस्य पूर्वोत्तराभ्यां संबन्धः । तथा च देवीसंबन्धिननान्दृपतिना देव्या संदिष्टम् । देवीं प्रति संदिष्टमित्यर्थः । पुत्रपूर्ण उत्सङ्गोऽङ्को यस्या इति बहुव्रीहिः । यद्वा,—अत्र पूर्णपदेन यमावित्यपि सूच्यते; अन्यथा पुत्रवदुत्सङ्गामिति वक्तुं शक्यत्वात् । **द्रक्ष्याम** इति । एतत् बीजानुगुणप्रयोजनविभावनरूपा युक्तिर्नाम संध्यङ्गमुक्तं भवति । तदुक्तम्—'बीजानुगुणप्रयोजनविभावना युक्तिः' इति ॥ **जामात्रि**ति । ऋष्यशृङ्गेति वक्तव्ये जामात्रित्युक्तं पूज्यतास्फोरणाय । एवं च तदिङ्गितं ज्ञात्वैवास्माभिरत्रासितव्यम् । किं पुनस्तत्कृतबहुनिर्बन्धे सतीत्यत आह—**निरुद्धा** इति । अनेन सर्वप्रकारेणापि नगरं प्रत्यागमने त्वरातिशयो वसिष्ठस्येति व्यज्यते । ननु कुत ईदृशत्वरातिशय इत्यत आह—**त्वं बाल एवा**सीति । ननु राज्यतन्त्रविचारोपमर्दासिद्ध इत्यर्थः । किंच दशरथजामातरं ऋष्यशृङ्गं जामातेति निर्दिशन्वसिष्ठः स्वस्य दशरथस्थानीयतामभिप्रैति । तच्च रामबुद्ध्या स्वबुद्ध्या च । एवं चात्रत्यबालशब्दः पुत्रत्वाभिप्रायमूलकः । ततश्च ननु यजनाचार्यकं प्रस्तुतं स्यात् इति तदागमने त्वरातिशय इति । न केवलमहमाचार्यः, किंतु त्वद्बुद्ध्या दशरथस्थानीयश्च । तथा च त्वदीयराज्यतन्त्रविषयकास्थानानर्थशङ्का मामसंनिरुद्धं बाधत इत्याह—**त्वं बाल एवासि** । तत्त्वन्यादृशरघुकुलराजवत् शिष्य इत्यर्थः । तथा च तव शिष्यमानत्वे पौरोहित्यादिकं वामदेवादयो निर्वक्ष्यन्तीति तदर्थं नास्माकं त्वरा । किंतु तत्पुत्रत्वात् त्वां युवराजीकृत्य महाराजस्थानीयेन मया राज्यतन्त्रो विचारयितव्यः । अन्यथा न मामनिशङ्का मुञ्चतीति

पाठा०—१ 'दोहदो'. २ 'सम्पादयितव्य'. ३ 'यद्देषा'. ४ 'ऋष्यशृङ्गेण'. ५ 'द्रक्षामि'. ६ 'किमादिष्टः'.

रामः—यथा समादिशति भगवान्मैत्रावरुणिः ।

स्नेहं दयां च सौख्यं च यदि वा जानकीमपि ।
आराधनाय लोकस्य मुञ्चतो नास्ति मे व्यथा ॥ १२ ॥

सीता—अदो जेव्व राहवधुरंधरो अज्जउत्तो । [अत एव राघवधुरंधर आर्यपुत्रः ।]

रामः—कः कोऽत्र भोः ? विश्राम्यतादष्टावक्रः ।

अष्टावक्रः—(उत्थाय परिक्रम्य च ।) अये ! कुमारलक्ष्मणः प्राप्तः । (इति निष्क्रान्तः ।)

भावः । नन्वस्त्वेवम्, तथापि युद्धादिषु लब्धवर्णस्य यौवराज्यस्य पालने सहापेक्षा नास्तीत्यत्राह—**राज्य**मिति । नवं च नवमेव । ननु युद्धादिवत् परिचितपूर्वमित्यर्थः । ननु तर्हि किं कर्तव्यमित्यत्राह—**युक्त** इति । युक्तः संनद्धः । 'योगः संनहन—' इति कोशात् स्वस्मादात्मन आत्मीयाद्वा । परमं सर्वोत्कृष्टं प्रसिद्धधनस्य क्षयित्वमिति, तद्व्यावृत्तिः परमशब्देन विवक्षिता । धनं लब्धांशपरिपालनालब्धांशार्जनाभ्यां धनतुल्यमित्यर्थः ॥ ११ ॥ **यथे**ति । मैत्रावरुणि मित्रावरुणयोरपत्यमित्यर्थे बाह्वादित्वादिञ्प्रत्ययः । 'देवताद्वन्द्वे च' (पा. ६।३।२६) इत्यानङ् । इयं च कथा पौराणिकी वेदितव्या । समादिशत्याज्ञापयति । तथा करोमीति शेषः । **स्नेह**मिति । स्नेहो हि सुखरूपः सुखान्तरहेतुश्च । किंच 'शरीरं वसु विज्ञानं मित्रार्थे संपरित्यजेत्' इत्युक्तरीत्या सर्वापेक्षया प्रशस्तश्च । अपि च 'अहेतुः पक्षपातो यस्तस्य नास्ति' इत्युक्तरीत्या दुर्निवर्त्यश्च । तथा च तत्परित्यागोऽपि मम न दुःखायेति भावः । स्नेहस्य व्यवस्थितविषयत्व एव गुणत्वम्, अन्यथा तु दोषत्वमस्तीति निष्कर्षः । दया तु सर्वविषयापि गुणत्वं न मुञ्चति । यथा 'सर्वभूतेषु सर्वत्र संतुष्ट्या येनकेनचित् । सर्वेन्द्रियोपशान्त्या च तुष्यत्याशु जनार्दनः ॥' इत्युक्त्या धर्मरूपतया च । किंच परदुःखाधीनसत्तया तन्निवृत्तिं विना दुर्निवर्त्या । तामपि मुञ्चतो मम न व्यथेति भावः । एतेषां व्यतिरेकेऽप्यात्मनो न व्यतिरेक इत्यस्यापकर्षः । सीता तु 'प्राणेभ्योऽपि गरीयसी' इत्युक्तरीत्या जीवितं प्रत्यपि प्रधानभूता । किंच 'अद्यावसितं रामस्य जीवितप्रयोजनम्' इति वक्ष्यमाणरीत्या मद्व्यतिरेकप्रयोजनव्यतिरेकवती । पूर्वोक्तस्नेहदयासौख्यैः संतुष्टोऽहं तामवलम्ब्य । तथाभूतामपि मुञ्चतो मम न व्यथेति भावः । सीतामित्यनुक्त्वा जानकीमित्युक्तिर्लोकाराधनापेक्षया ब्रह्मवित्तमजनकानुरोधोऽप्यकिंचित्कर इति सूचयति । लोके हि अभिमतवस्तुपरित्यागात्पूर्वकाले तस्य सन्निधानात् न दुःखभूयस्त्वम्; परित्यागात्परमपि तस्यातीतत्वात् । न दुःखभूयस्त्वम्, तत्परित्यागकाले तु भवति दुःखभूयस्त्वं तावद्वर्तमानत्वात् । मम तु वर्तमानकालेऽपि न दुःखमिति वर्तमानार्थक'मुञ्चत' इतिपदतो लभ्यते ।

पाठा०—१ 'आह'. २ 'लोकानां'. ३ 'राहवकुल°'. ४ 'विश्राम्यतां भगवानष्टा'.

(प्रविश्य ।)

लक्ष्मणः—जयति जयत्यार्यः । आर्य ! अर्जुनेन चित्रकरेणास्मदुपदिष्टमार्यस्य चरितमस्यां वीथ्यामभिलिखितम् । तत्पश्यत्वार्यः ।

रामः—जानासि वत्स ! दुर्मनायमानां देवीं विनोदयितुम् । तत्कियानवधिः ?

लक्ष्मणः—यावदार्याया हुताशनशुद्धिः ।

रामः—शान्तं पापम् । (सान्त्ववचनम्)

उत्पत्तिपरिपूतायाः किमस्याः पावनान्तरैः ।
तीर्थोदकं च वह्निश्च नान्यतः शुद्धिमर्हतः ॥ १२ ॥

व्यथेति सामान्यशब्देन मनोव्याधिरपि नेत्यर्थः ॥ १२ ॥ राघवधुरंधरः । रघुवंशश्रेष्ठ इत्यर्थः । राघवपदोपादानं साभिप्रायकम् । शरणागतसंरक्षणभूतदयालोकाराधनैकपररघुवंशजस्य तवेदमनुरूपमित्यभिप्रायः । विश्राम्यताद्विश्रमं प्राप्नोतु । आशिषि परस्मैपदलोटस्तातङ् । 'विश्रामयताम्' इति पाठे तु परिजनैरिति शेषः । विश्रमशालिक्रियतामित्यर्थः । णिजन्तात्कर्मणि लोट् ॥ अर्जुनेन तन्नाम्ना । वीथ्या चित्रमयश्रेण्याम् ॥ दुर्मनायमाना दुःखितमनस्काम् । जनकस्य खेदेनान्प्रति गमनादिति भावः । 'कर्तुः क्यङ् सलोपश्च' (पा. ३।१।११) ङित्वादात्मनेपदम् । शानच् । विनोदयितुं दुःखविस्मरणपूर्वकं संतोषं ग्राहयितुम् । 'नुद प्रेरणे' । उपसर्गबलेन उक्तार्थलाभः । तत्कियानवधिः ? तदित्यव्ययम् । तस्येत्यर्थः । अवधिरन्तः कियान् । किंप्रमाणक इत्यर्थः । अनेकसंख्यानेषु महापारेषु कीदृशसंख्यायुक्तोऽस्यापारः अस्य चित्रस्यावधिरित्यर्थः ॥ यावदिति । हुताशनेन शुद्धिरिति विग्रहः । यावच्छब्दोऽवधारणार्थकः । हुताशनशुद्धिर्यावत् । हुताशनशुद्धिरेवावधिरित्यर्थः । अवधिरिति पूर्वस्मादनुषङ्गः ॥ शान्तं पापमिति । योऽयमलीकोपन्यासस्तस्य पीडाहेतुभूतपापशान्तिकरो भवत्विति तात्पर्यम् । लोकेऽकीर्तिरियमिष्टजनं प्रत्यनिष्टवचनाक्षमजनाशीर्वचनरूपा । सान्त्ववचनम् । अत्यर्थमधुरवाक्यसहितमित्यर्थः ॥ उत्पत्तीत्यादि । उत्पत्त्या परिपूतायाः परिशुद्धायाः । कृत्रिमत्वनिरासार्थमिदम् । स्वभावतो दोषप्रतिभटाया इत्यर्थः । अस्याः सीतायाः । पावयन्तीति पावनानि । नन्द्यादित्वाल्ल्युप्रत्ययः । अन्यानि पावनानि पावनान्तराणि । तैरित्यर्थः । किम् । न किमपीत्यर्थः । शुद्धिर्हि दोषनिर्हरणम् । अविद्यमानदोषाया कथं शुद्धिरिति भावः । किंच अन्तरशब्देन दोषरहितमानस्य पावकवस्त्वपेक्षा नास्ति । पावकस्य तु तदैरपेक्ष्यं कैमुतिकम् । इयं च केवलं दोषरहिता न किंतु पावका चेति सूच्यते । 'अपि मा पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी' इति न्यायात् । उक्तमर्थमुत्तरार्धेन दर्शयति—तीर्थोदकमिति ।

पाठा०—१ 'वीथिकायां'. २ 'कियन्तमवधिं यावत्'. ३ '°विशुद्धि'.

देवि देवयजनसंभवे ! प्रसीद ! एष ते जीवितावधिः प्रवादः ।

क्लिष्टो जनः किल जनैरनुरञ्जनीय-
स्तन्नो यदुक्तमशुभं च न तत्क्षमं ते ।
नैसर्गिकी सुरभिणः कुसुमस्य सिद्धा
मूर्ध्नि स्थितिर्न चरणैरवताडनानि ॥ १४ ॥

गङ्गादिपावनजलम् । तीर्थशब्दो विशेषणमात्रपरः; यथाश्रुते तीर्थशब्दस्यैव परिशुद्धोदकवाचित्वात् । यद्वा,—तीर्थानां गुरूणामुदकं पादावनेजनाम्भ. । 'आपः पादावनेजनीर्द्विषन्तं निर्दहन्तु मे' इति श्रुतेः । वह्निश्च अन्यतः शुद्धिमन्यहेतुकशुद्धिं नार्हतः । यथा पावकत्वाविशेषात्तीर्थोदकवह्न्योरितरापेक्षा नास्ति तद्वदस्या अपि पावकत्वाविशेषेण तदपेक्षा नास्तीत्यतिस्फुटम् । किंच विनिगमनाविरहात् वह्नेर्वा सीतासंबन्धत' शुद्धिः किं न स्यादित्याशयः । अग्निप्रवेशानुमतिर्मूढप्रत्यायनार्था वा अग्निप्राशस्त्यार्था वा ॥ १३ ॥ **जीवितावधिरि**ति । जीवितस्यावधिर्यस्येति बहुव्रीहि. । यदीयावधिः जीवितावधिः । स इत्यर्थः । प्रसीद । 'अञ्जलि परमा मुद्रा क्षिप्रं देवप्रसादिनी' इत्युक्तरीत्या बहुतरापराधानां क्षिप्रं क्षमापकोऽयमञ्जलिरपराधभूयस्त्वानुगुण्याच्छरीरपातपर्यन्तमनुष्ठेयः । स चाशक्त्या तन्त्रेणानुष्ठीयत इति भाव' । **क्लिष्ट** इति । यद्यस्मात्कारणात्क्लिष्टो जनो दु.खितो जनो जनैरनुरञ्जनीयः क्लेशं विस्मार्य लालनीय इत्यर्थ. । नतु पूर्वानुभूतदु खस्मारणेन क्लेशयितव्य इत्यर्थ. । तत् तस्मात् । अशुभममङ्गलम् । 'अशिवम्' इति पाठान्तरम् ते त्वद्विषये । शेषे षष्ठी । नः आवयोः 'अस्मदो द्वयोश्च' (१।२।५९) इति द्वित्वे बहुवचनम् । यदुक्तम् । अस्मत्कर्तृकं यद्वचनमित्यर्थ. । 'नपुंसके भावे क्त'। 'यावदार्याया हुताशनशुद्धि' इत्युक्तलक्ष्मणवचनमित्यर्थ' । अत्र लक्ष्मणवचनस्य रामस्य स्वोक्तित्वैक्याभिसंधिना । 'रामस्य दक्षिणो बाहुर्नित्यं प्राणो बहिश्चरः' इत्युक्तेः । तत् । वचनमित्यनुषज्यते । न' । त्वदेकजीवितयोस्तव निर्दोषतां च जानतोरित्यर्थ' । न क्षमं नोचितम् । अयं भावः—बन्धुत्वमित्रत्वानादरेण जनत्वरूपसामान्यधर्म एवानुरञ्जनीयानुरञ्जकभावे पर्याप्तो हेतु' । तत्र 'प्रेयो मित्रं बन्धुता वा समग्राः सर्वे कामाः संपदो जीवितं वा । स्त्रीणां भर्ता धर्मदाराश्च पुंसाम्' इत्युक्तरीत्या सर्वप्रकारप्रियतमायास्तव विषये तथाविधानां अस्माकं पूर्वानुभूतदुःखस्मारणमहापराधो नोचित एव । तत्राप्यलीकनिर्बन्धतत्स्मारणं तु सुतराम् । किंच निर्दोषतां च जानतो राघवयोस्तत्कथनं तु दूरोत्सारितमिति । सुरभिणः कुसुमस्य सुगन्धप्रधानस्य पुष्पस्य मूर्ध्नि स्थितिर्नैसर्गिकी निसर्गत एव । विनयादित्वात्स्वार्थे ठक्प्रत्यय । सिद्धा प्रसिद्धा चेतनाचेतनसाधारण्येन प्रसिद्धा; चेतनैरवचूडरूपेणाचेतनै. शाखाग्रे च धारणात् । चरणैरवताडनानि न । न दृष्टानीत्यर्थः । अयं भाव.—त्रिविधानि तावत्कुसुमान्यवगन्तव्यानि । यानि कान्तिप्रधानानि, सौरभ्यप्रधानानि, उभयप्रधानानि

पाठा०-१ 'कष्टं'. २ 'अशिव'.

सीता—होदु अज्जउत्त ! होदु । एहि । पेक्खम्ह दाव दे चरिदं । (इत्युत्थाय परिक्रामति ।) [भवत्वार्यपुत्र ! भवतु । एहि । प्रेक्षामहे तावत्ते चरितम् ।]

लक्ष्मणः—इदं तदालेख्यम् ।

सीता—(निर्वर्ण्य ।) के एदे उवरिणिरंतरट्ठिदा उवत्थुवंदि विअ अज्जउत्तं ? [क एते उपरिनिरन्तरस्थिता उपस्तुवन्तीवार्यपुत्रम् ?]

लक्ष्मणः—देवि ! एतानि तानि सरहस्यानि जृम्भकास्त्राणि । यानि भगवतो कृशाश्वात्कौशिकमुपसंक्रान्तानि । तेन च ताटकावधे प्रसादीकृतान्यार्यस्य ।

रामः—वन्दस्व देवि ! दिव्यास्त्राणि ।

ब्रह्मादयो ब्रह्महिताय तप्त्वा परःसहस्रं शरदां तपांसि ।
एतान्यदर्शन्गुरवः पुराणाः स्वान्येव तेजांसि तपोमयानि ॥ १५

चेति । तत्र कान्तिप्रधानानि शाल्मलीकुसुमादीनि, सौरभ्यप्रधानानि दमनकादीनि । उभयप्रधानानि मालतीप्रभृतीनि । तत्र सौरभ्यमात्रप्रधानस्यापि न चरणावताडनार्हत्वम् । तस्य प्राणैकनिरन्तरानुभाव्यत्वात् । एवं नायस्यापि । तस्य दर्शनैरनुभाव्यत्वात् । उभयप्रधानस्य तु सुतरां न चरणावताडनार्हत्वमिति । सुरभिणः कुसुमस्येति पदद्वयोपादानादित्थं व्याख्यातम् । अत्र 'न सुसले.' इति केचित्पठन्ति । अत्र प्राज्ञस्य पूजनीयस्य लक्ष्मणस्यैतस्य सद्यः किंचिद्वचनमुपमेयमुक्त्वा निहीनबहुतरचरणकरणकानामुपमानतावचनात् तादृशताडनजन्यं सुरभिकुसुमस्य यावदत्याहितं तावल्लक्ष्मणवचनजन्यं सीताया अत्याहितमिति व्यज्यते ॥ १४ ॥ प्रेक्षामहे पश्याम इत्यर्थः ॥ आलेख्यं चित्रम् ॥ उपरि निरन्तरस्थिता अविरलं स्थिताः । अनुपविष्टा इत्याशयः । तेषां दिव्यास्त्रत्वादुपरिस्थितिर्युक्तेत्युपरिलेखनम् । उपस्तुवन्ति स्तोत्रं कुर्वन्ति । सरहस्यानि । प्रयोगप्रतिसंहारोपयिकमन्त्रादयो रहस्यानि । तत्सहितानीत्यर्थः । जृम्भकास्त्राणि । कृशाश्वात्तन्नाम्नो मुनेः कौशिकं विश्वामित्रमुपसंक्रान्तानि प्राप्तानि । उपसंक्रान्तानीति कर्तृप्रत्ययेन स्वयमेव तानि कौशिकं प्राप्तानीति लभ्यते । तथा च—'कृशाश्वः पर सहस्रपरिवत्सरान्तेवासिने कौशिकाय' इति वक्ष्यमाणं परःसहस्रपरिवत्सरान्तेवासित्वं जृम्भकास्त्रप्राप्तिगुरुत्वमपेक्ष्यासत्कल्पमिति हृदयम् । तेन च विश्वामित्रेण प्रसादीकृतानि प्रसादतत्कार्ययोर्जृम्भकास्त्रयोरभेदाध्यवसायादित्थमुक्तम् । केवलप्रसादेन दत्तानीत्यर्थ ॥ ब्रह्मादय इति । पुराणा ब्रह्मादयश्चतुर्मुखप्रभृतयः । गुरवस्तप उपदेष्टारः । तमोनिवर्तका इत्यर्थः । 'शरदस्तपांसि' इति वा पाठः । तपस्यन्तःकरणनैर्मल्यापादनद्वारा भगवत्साक्षात्कारहेतुभूतकायशोषणव्रतानि परःसहस्रम् । सहस्रात्परा इत्यर्थः; 'कर्तृकरणे कृता बहुलम्' (२।१।३२) इति बहुलग्रहणात्समासः । सुप्सुपेति वा । परस्परादित्यात्सहस्र-

पाठा०—१ 'भोदु'. २ 'कृशाश्वात्'. ३ 'सहस्राः शरदः'. ४ 'अपश्यन्'.

सीता—णमो एदाणं । [नम एतेभ्यः ।]

रामः—सर्वथेदानीं त्वत्प्रसूतिमुपस्थास्यन्ति ।

सीता—अणुग्गहीदम्हि । [अनुगृहीतास्मि ।]

लक्ष्मणः—एष मिथिलावृत्तान्तः ।

सीता—अम्हहे, दलंतणवणीलुप्पलसामलसिणिद्धमसिणसोहमाणमंसलदेहसोहग्गेण विम्हअत्थिमिदतादढीसंतसोम्मसुंदरसिरी अणादरत्थुडिदसंकरसरासणो सिहंडमुद्धमुहमंडलो अज्जउत्तो आलिहिदो ।१ [अहो, दलन्नवनीलोत्पलश्यामलस्निग्धमसृणशोभमानमांसलदेहसौभाग्येन विस्मयस्तिमिततातदृश्यमानसौम्यसुन्दरश्रीरनादरत्रुटितशंकरशरासनः शिखण्डमुग्धमुखमण्डल आर्यपुत्र आलिखितः ।]

लक्ष्मणः—आर्ये ! पश्य पश्य,—

संबन्धिनो वसिष्ठादीनेष तातस्तवार्चति ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ १६ ॥

शब्दस्य सुडागमः । सहस्रसंख्याधिकसंख्याका इत्यर्थः । 'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इत्यनुशासनादेकत्वात् । शरदः संवत्सरान् । अत्यन्तसंयोगे द्वितीया । तथा च सहस्रसंख्याधिकसंवत्सरेषु निरन्तर तृप्त्वेत्यर्थः । ब्रह्म परमात्मा, प्रधानं च तत्कार्यत्वाज्जगत् ब्रह्मशब्देनोच्यते । तदुक्तम्—'तादर्थ्यादुपचारोऽस्ति कश्चित्स्वस्वामिभावतः । अङ्गाङ्गीभावतात्कर्म्याद्विपरीत्यादपीष्यते ॥' इति ॥ तस्य हिताय तदपेक्षितेष्टानिष्टप्राप्तिपरिहारसाधनाय तपःफलभूतजृम्भकोपदेशेन राजभिर्विरोधिनिरसनेन जगतः पुरुषार्थसाधननिर्वर्तनसिद्धेरिति भावः । अथवा ब्रह्म वेदस्तस्य हिताय धारणाय । धारणार्थकधाञ्धातोर्नपुंसके भावे क्तः । 'दधातेर्हिः' (पा. ७।४।४२) इति हिभावश्च । अनुत्सादायेति भावः । तपोमयानि तपःस्वरूपाणि । स्वार्थिको मयट् । स्वानि स्वकीयानि तेजांसि एतान्यदर्शन् । जृम्भकास्त्राण्यपश्यन् । कार्यकारणनिबन्धनमिदं सामानाधिकरण्यम् । 'दृशिर् प्रेक्षणे' इति धातोः लुङ् । तथा च—बहुतरतपःकार्यभूतानामेवैषां केवलगुरुप्रसादसाध्यत्वम् । नतु शुश्रूषादिसाध्यत्वमिति भावः ॥१५॥ त्वत्प्रसूतिं त्वत्प्रसवम् । त्वत्पुत्रानित्यर्थः । 'द्विधा गर्भग्रन्थिस्तदनु दिवसे' (६।२८) इति वक्ष्यमाणरीत्या यमलत्ववत्पुंप्रजात्वमपि निर्णीतमिति सूच्यते । अन्यथा स्त्रीप्रजात्वे जृम्भकाभ्यनुज्ञानमसंगतं स्यात् । उपस्थास्यन्ति प्राप्स्यन्ति । मामिव सेविष्यन्तीति चार्थः ॥ **अम्हहे** इति । दलितनीलोत्पलवच्छ्यामलं स्निग्धं च चाकचक्ययुक्तम् । मांसलं स्फीतं तेन । तथाविधेनेत्यर्थः । विशेषणसमासः । देहसौभाग्येन देहसौन्दर्येण । विस्मिता आश्चर्ययुक्ता अत एव स्तिमिता निश्चलास्तातास्तैर्दृश्यमाना सौम्या आह्लादकरी सुन्दरश्रीर्यस्य स तथोक्तः । प्राकृते आत्मनेपदाभावादीसन्तेत्युक्तिः । त्रुटितं भग्नं शरासनं येन स तथोक्तः ॥ **संबन्धिन** इति । जनकानां

पाठा०–१ 'त्थुडिद॰'.

रामः—सुश्लिष्टमेतत् ।

जनकानां रघूणां च संबन्धः कस्य न प्रियः ।
यत्र दाता ग्रहीता च स्वयं कुशिकनन्दनः ॥ १७ ॥[1]

जनकापत्यभूतानाम् । लाक्षणिकोऽयं शब्दः । पुरोहितो गौतमो गौतमपुत्रः । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च' (पा ४।१।११४) इत्यण्प्रत्ययः । शतानन्दस्तन्नामा । तथा च—एष तव तातो वसिष्ठादीन्संबन्धिनोऽर्चेति पूजयति । जनकानां पुरोहितो गौतमः शतानन्दश्चार्चेत्यनुषङ्गः । यथाक्रमं तव तातो जनकः संबन्धिनो दशरथप्रभृतीनर्चयति । जनकानां पुरोहितो गौतमः शतानन्दश्च वसिष्ठादीनर्चयतीत्यन्वयः ॥ १६ ॥ **सुश्लिष्टमिति** । हेमारविन्दपरिमलन्यायादिति भावः । **जनकानामिति** । जनकानां जनकवंशोद्भवानां रघूणां रघुवंशोद्भवानां च । लाक्षणिकोऽयं शब्दः । संबन्धोऽपत्यसंबन्धः कस्य न प्रियः ? सर्वस्यापि प्रिय इत्यर्थः । यत्र संबन्धे कुशिकनन्दनो विश्वामित्रः स्वयं दाता स्वयं प्रतिग्रहीता च । दशरथं प्रति दाता, जनकं प्रतिग्रहीता चेत्यर्थः । अयं भावः—तव मम च परिणयरूपोऽयं संबन्धो जनकदशरथयोरावयोर्जनानां च मध्ये कस्यचिदपि नाप्रियः । तथा हि—जनकानां रघूणामित्यनेन रघुवंश्यान् जनकवंश्यांश्च प्रति नाप्रियत्वमिति लभ्यते । अत्र निमीनामित्यनुक्त्वा जनकानामिति पदोपादानेन 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः' इति जनके प्रसिद्धं कर्मयोगशीलत्वमिह स्फार्यते । एवं काकुत्स्थानामित्यनुक्त्वा रघूणामित्युक्त्या 'श्रुतस्य यायादयमन्तमर्भकस्तथा परेषां युधि चेति पार्थिवः' इत्यादिकालिदासनिरुक्त्या 'लङ्घिवह्योर्नलोपश्च' (उ. १३२) इत्यनुशासनेन च लङ्घयति लङ्घते जानाति सर्वमिति व्युत्पत्त्या 'मनुरिक्ष्वाकवेऽब्रवीत्' इत्यैक्ष्वाकवं रघुकुलासाधारणज्ञानयोगशीलत्वं सूच्यते । तथा चान्यादृशजनकविषये जातोऽपत्यसंबन्धः संबन्धिनामित्यभिमतो भवति । तत्र क्षीरशर्करावदन्योन्यसंपर्करमणीयज्ञानकर्मशीलजनकविषयत्वे तु तस्य हेमारविन्दपरिमलन्यायेनातिश्लाघ्यत्वमिति तान्प्रत्यप्रियत्वव्यावृत्तिः । अत एव चावां प्रत्यपि नाप्रियत्वं यत्र दातेत्यादिनापि जनकदशरथौ प्रत्यप्रियत्वं व्यावर्त्यते । तत्र दशरथं प्रति अयाचितोपनतत्वाज्जनकं प्रति दुष्करधनुर्भङ्गप्रतिज्ञानिवर्तनरूपमहोपकारकरत्वाच्च गुर्वनुज्ञाप्राप्तत्वान्महर्षिकारितत्वाच्च नावां प्रत्यप्रियत्वम् । स्वयमित्यनेनाप्रदादिमूलकनिराङ्कृयाजनहरिश्चन्द्रोपप्लवव्यावृत्तिः । अत एव जनान्प्रत्यप्रियत्वं निरस्तम् । शिष्टानुमतस्य धर्मत्वे शिष्टकारिते तस्य वैमुत्यसिद्धत्वात् । तथा चापस्तम्बस्मृतिः—'यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः' इति । ब्रह्मर्षिर्विश्वामित्र इत्यादिनुक्त्वा कुशिकनन्दन इति पदोपादानं विश्वामित्रः स्वब्रह्मर्षित्वमविगणय्य भूतपूर्वगत्या क्षत्रियत्वं स्वीकृत्य बन्धुभावेनास्मत्संबन्धिभावेनास्ति असति संबन्धे ब्रह्मर्षि-

पाठा०—१ 'ग्रहीता'.

सीता—एदे खु तक्कालकिदगोदाणमंगला चत्तारो भादरो। विआहदिक्खिदा तुम्हे। अम्हो जाणामि, तंस्सिं जेव्व पदेसे तंस्सिं जेव्व काले वत्तामि!। [एते खलु तत्कालकृतगोदानमङ्गलाश्चत्वारो भ्रातरः। विवाहदीक्षिता यूयम्। अहो जानामि, तस्मिन्नेव प्रदेशे तस्मिन्नेव काले वर्ते!]

रामः—

> **समयः स वर्तत इवैष यत्र मां**
> **समनन्दयत्सुमुखि! गौतमार्पितः।**
> **अयमागृहीतकमनीयकङ्कण-**
> **स्तव मूर्तिमानिव महोत्सवः करः॥ १८॥**

लक्ष्मणः—इयमार्या। इयमप्यार्या माण्डवी। इयमपि वधूः श्रुतकीर्तिः।

सीता—वच्छ! इअं वि[२] अवरा का? [वत्स! इयमप्यपरा का?]

लक्ष्मणः—(सलज्जास्मितम्। अपवार्य।) अये! ऊर्मिलां पृच्छत्यार्या। भवतु, अन्यतः संचारयामि। (प्रकाशम्।) आर्ये! दृश्यतां द्रष्टव्यमेतत्। अयं च भगवान् भार्गवः।

कृत्यानीति व्यञ्जयति॥ १७॥ एदे खु इति। गोदानमङ्गलं क्षौरकर्म तस्य मङ्गलार्थत्वान्मङ्गलत्वम्। विवाहेन दीक्षिता विवाहदीक्षिता इति। विवाहहेतुकव्रतवन्त इत्यर्थः। 'दीक्ष मौण्ड्येज्योपनयनव्रतादेशेषु' इति दीक्षधातोः कर्तरि क्तः। तस्मिन्नेव प्रदेश इति प्रत्यभिज्ञादार्ढ्यमिति॥ **समय** इति। यत्र समये गौतमार्पितः पुरोधसा शतानन्देन प्रतिपादित आगृहीतकमनीयकङ्कणः समन्तादृहीतकमनीयवलयः, तथापि मूर्तिमान् महोत्सव इव स्थितः समनन्दयत्, स एव समयो वर्तत इव। स्मृतिवैशसमिदम्। अत्र 'सुमुखि' 'आगृहीतकमनीकङ्कणः' इत्युक्त्या सिद्धसाध्यसमभिव्याहारन्यायेनागृहीतकमनीयकङ्कणत्वं प्रति सीताया वदनकमलसौन्दर्यातिशयो हेतुरित्यवगम्यते। अन्यथा 'पाणिं गृह्णीष्व पाणिना' इत्युक्तपाणिपीडनस्य प्रकोष्ठवर्तिमणिवलयग्रहणासंगतेः। तथा च—सीतामुखचन्द्रदर्शनानन्दपारवश्येन सम्यक्करग्रहणाभावात्संवृत्त। तथात्व एव स पाणिर्मूर्तिमान्महोत्सव इव स्थित। सम्यक्स्पर्शे तु निःसीमानन्दकर इति व्यज्यते। आगृहीताः सम्यग्गृहीताः शृङ्गारमूलकसात्त्विकभावविशेषरूपत्वेन स्पृहणीयाः कङ्कणाः स्वेदजलबिन्दवो यस्मिन्स तथोक्त इत्यप्याहुः। 'आगृहीतवैवाहिकप्रतिसर' इत्यपि केचित्॥ १८॥

पाठा०—१ 'वंसिं'. २ 'अपि'.

सीता—(ससंभ्रमम्) कंपिदम्हि । [कम्पितास्मि ।]

रामः—ऋषे ! नमस्ते ।

लक्ष्मणः—आर्ये ! पश्य । अयमार्येण—(इत्यर्धोक्ते—)

रामः—(साक्षेपम् ।) अयि, बहुतरं द्रष्टव्यम् । अन्यतो दर्शय ।

सीता—(सस्नेहबहुमानं निर्वर्ण्य ।) सुट्ठु सोहसि अज्जउत्त ! एदिणा विणअमाहप्पेण । [सुष्ठु शोभसे आर्यपुत्र ! एतेन विनयमाहात्म्येन]

लक्ष्मणः—एते वयमयोध्यां प्राप्ताः ।

रामः—(सास्रम् ।) स्मरामि हन्त स्मरामि ।

जीवत्सु तातपादेषु नूतने दारसंग्रहे ।
मातृभिश्चिन्त्यमानानां ते हि नो दिवसा गताः ॥ १९ ॥

इयमार्या माण्डवीति भरतभार्यात्वात्, इयमपि वधूरिति शत्रुघ्नभार्यात्वात् स्नुषात्वेन ग्रहणम् ॥ **अयमिति** । भार्गवः परशुरामः ॥ कम्पितास्मि । येनेति शेषः ॥ **अयमार्येणेत्यादि** । अत्र वैष्णवं धनुरारोपयित्वा समाकृष्टतेजस्क इति वक्तुमुद्युक्तवान् लक्ष्मणः, तावदात्मप्रशंसामसहमानो रामः प्रतिषिद्धवानित्याशयः ॥ साक्षेपं सप्रतिषेधम् । 'क्षिपु निरसने' इत्यस्मात् भावे घञ्प्रत्ययः । अन्यतो दर्शय, अन्यत्र लिखितं दर्शयेति भावः ॥ विनयमाहात्म्येन विनयस्य स्वोत्कर्षतानाविष्करणरूपस्य स्वस्मिन्निकर्षानुसंधानरूपस्य वा माहात्म्यं भूयस्त्वं तेनेत्यर्थः ॥ एते वयमयोध्यां प्राप्ताः । तथालिखिता इत्यर्थः ॥ **जीवत्स्विति** । तातपादेषु पितरीत्यर्थः । पूजायां पादशब्दो बहुवचने । 'उत्तमानां स्वरूपं तु पादशब्देन भण्यते' इति । जीवत्सु सत्प्राणेषु । 'यस्य च भावेन—' (२।३।३७) इति सप्तमी । दारसंग्रहे नूतने सति मातृभिश्चिन्त्यमानानां नस्ते दिवसा गता इत्यन्वयः । गता दिवसास्ते हीति स्मरणाकारप्रदर्शनं वा । अवन्धोरपि रक्षकस्य जीवनमानन्दाय । सर्वविधसंरक्षणशीलस्य पितुर्जीवनं तु निरवधिकाह्लादजनकम् । किं च दाराणां सततपरिचयेऽपि प्रियैकवेद्यत्वम्, नूतनसंग्रहे तु अमन्दानन्दहेतुत्वम्, स्वल्पसलील माता निरतिशयसौख्यकारिणी । तत्रापि सा लोकप्रसिद्धसर्वविधसंरक्षणानि कृत्वा ततोऽप्यधिकानि चिन्तयति चेत् निःसीमानन्दलाभः । एवमपरिच्छिन्नानन्दकन्दलहेतुत्वाद्दिवसानां तच्छब्देन निर्देशः । अत्र मातृभिरिति न यथा स्वसंबन्धः सर्वासां रामसर्वविषयहिताचिन्तावत्त्वम्; संकोचे मानाभावात् । कैकेय्याः कौर्यमौपाधिकम् । एवं चेदप्यतिशयितानन्दहेतुः सपत्नीमातृप्रयुक्तोपप्लवस्य सगरादिषु प्रसिद्धत्वेन तदभावस्याभिमतत्वात् । तातपादजीवनादीनां मध्य एकैकमेवानन्दहेतुः । समुदितानि तु सुतरामिति भावः ॥ १९ ॥

पाठा०—१ 'वत्स'. २ 'नवे दारपरिग्रहे'. ३ 'प्रसनुविरलैः'.

इयमपि तदा जानकी

> **पतनविरलैः प्रान्तोन्मीलन्मनोहरकुड्मलै-**
> **र्दशनकुसुमैर्मुग्धालोकं शिशुर्दधती मुखम् ।**
> **ललितललितैर्ज्योत्स्नाप्रायैरकृत्रिमविभ्रमै-**
> **रकृत मधुरैरङ्गानां मे कुतूहलमङ्गकैः ॥ २० ॥**

'नूतने दारसंग्रहे' इत्युक्तं विशिनष्टि—**इयमपि तदे**त्यादिना । **पतने**ति । शिशुः शैशवान्तवर्ती । शिशुप्रायेत्यर्थः । 'पतिसंयोगसुलभं वयो दृष्ट्वा च मे पिता' इत्युक्तेः । पतनेन प्रस्थितदशनपतनेन । प्रान्तोन्मीलदित्युक्तेः । विरलैः सान्तरालैः । प्रान्तेत्यात्र उन्मीलच्छब्दः प्ररोहद्दन्तपरः; दशनकुसुमैरिति रूपकसाहचर्यात् । तथा च उन्मीलदेव उद्यन्नूतनदशनाङ्कुर एव मनोहरकुड्मलमुन्मीलन्मनोहरकुड्मलं प्रान्ते उन्मीलन्मनोहरकुड्मलं येषामिति बहुव्रीहिः । यद्वा,–कुड्मलशब्दो मुकुलसदृशदशनपरः । प्रान्तोन्मीलन्ति मनोहरकुड्मलानि येषामित्यर्थः । रूपकातिशयोक्तिरलंकारः । दशनकुसुमैरिति तु रूपकमुपमा वेति संकर इत्यपि वदन्ति । दशना एव कुसुमानि तैर्धावल्यशिखरित्वादिसादृश्याद्रूपणम्, उपमा वा । हेतुभिः । मुग्धः सुन्दर आलोको यस्य तत्तथोक्तम् । यद्वा,–दशनकुसुमैरिति इत्थंभूतलक्षणे तृतीया । दशनकुसुमैरुपलक्षितमित्यर्थः । मुग्धालोकं सुन्दरकटाक्षं मुखं दधती इयं सीता ललितादपि कुसुमादपि ललितैः सुकुमारैः । यद्वा,–ललितं नाम हासाद्यन्यतमविशेषः । तदुक्तम्—'सुकुमाराङ्गविन्यासो ललितं परिकीर्तितम्' इति । तेन ललितैः । विलसितैरित्यर्थः । 'लड विलासे' कर्तरि क्तः । लडयोरेकत्वम् । ज्योत्स्नाप्रायैर्ज्योत्स्नासदृशैः । यद्वा,–ज्योत्स्ना कान्तिः । लावण्यमिति यावत् । तत्प्रायैः तत्प्रचुरैरित्यर्थः । प्रायशब्दः प्रचुरवाची । जलप्रायो देश इतिवत् । लावण्यस्वरूपं तु 'भूयिष्ठं तेज एवाद्भिर्बहुलाभिर्मृदूकृतम् । चक्षुरानन्दजननं लावण्यमिति कथ्यते ॥' इति । अकृत्रिमाः स्वाभाविका विभ्रमा विलासा येषां तानि । तैरित्यर्थः । विभ्रमशब्दो गोबलीवर्दन्यायेन माधुर्यललितान्यपरः । यद्वा,–'विभ्रमस्त्वरयाकालभूषास्थान' इत्युक्तविभ्रमपरः । सोऽकृत्रिमो येषु तथोक्तैरित्यर्थः । मधुरैः प्रियैरित्यर्थः । 'आभूषणेऽपि रम्यत्वं माधुर्यमिति कथ्यते' इत्युक्तमाधुर्ययुक्तैरित्यर्थः । अनुकम्पितैरङ्गैरङ्गकैः । 'अनुकम्पायाम्' (पा. ५।३।६७) इति कन्प्रत्ययः । अतिसुकुमारतया गाढालिङ्गनादिषु दयनीयैरित्यर्थः । तदाह **कालिदासः**—'सदयं सुन्दरि ! गृह्यते रसोऽस्य', 'पीतं मया सदयमेव रतोत्सवेषु' इति । **उद्दण्डकविश्च** 'इमां काङ्क्षेऽहमाभ्य उरसि सदयम्' इति । यद्वा,–अल्पैरङ्गैरङ्गकैः । 'अल्पे' (५।३।८५) इति सूत्रेण कन्प्रत्ययः । अल्पत्वं चेह तनुत्वमभिप्रेतम् । तदुक्तम्—'स्वभावतनुका नूनम्' इति अनेन 'सुश्लिष्टसन्धिबन्धत्वं सौन्दर्यमिति कथ्यते' इत्युक्तसौन्दर्यमप्युक्तं भवति । तेन विना तनुत्वस्य दोषत्वात् । मेऽङ्गानां कुतूहलमकृत कृतवती । 'डुकृञ् करणे' सिचो लोपः ।

पाठा०–१ 'कुन्तलैः'. २ 'मुकुलैः'. ३ 'मधुरैरम्बानां'.

लक्ष्मणः—एष मन्थरावृत्तान्तः ।

रामः—(सत्वरमन्यतो दर्शयन् ।) देवि ! वैदेहि !

इङ्गुदीपादपः सोऽयं शृङ्गवेरपुरे पुरा ।
निषादपतिना यत्र स्निग्धेनासीत्समागमः ॥ २१ ॥

लक्ष्मणः—(विहस्य, स्वगतम् ।) अये ! मध्यमाम्बावृत्तान्तमन्तरितमार्येण ।

सीता—अम्हो, एसो जडासंजमणवुत्तंतो । [अहो, एष जटासंयमनवृत्तान्तः ।]

लक्ष्मणः—

पुत्रसंक्रान्तलक्ष्मीकैर्यद्वृद्धेक्ष्वाकुभिर्धृतम् ।
धृतं बाल्ये तदार्येण पुण्यमारण्यकव्रतम् ॥ २२ ॥

कर्त्रभिप्राय आत्मनेपदेन रामाङ्कतुलद्वयकरणफलं सीताया इत्यवगम्यते । 'अद्वैतं सुखदुःखयोः' (१।४०) इति वक्ष्यमाणत्वात् । केचित्तु—'अम्बानाम्' इति पाठ इत्याहुः ॥ २० ॥ मन्थरावृत्तान्तस्तत्प्रयत्नफलपट्टाभिषेकान्तरायरूपः ॥ इङ्गुदीति । स्निग्धेन स्नेहवता निषादपतिना गुहेन समागमः संबन्धः ॥ २१ ॥ मध्यमाम्बावृत्तान्तमिति क्लीबत्वं प्रामादिकम् । अन्तराशब्दं त्यक्त्वा मध्यमाम्बावृत्तमन्तर्हितमिति पठनीयमित्याहुः ॥ जटासंयमनं जटाबन्धनम् ॥ पुत्रेति । पुत्रेषु संक्रान्ता स्वयमेवाश्रयशैथिल्यादागता । स्वतः संक्रान्तेत्यर्थः । 'गत्यर्था–' (३।४।७२) इति सूत्रेण कर्तरि क्तः । तथाविधा लक्ष्मीर्येषां ते तथोक्तास्तैः उरःप्रभृतित्वात् कप् । वृद्धाश्च ते इक्ष्वाकवश्चेति विग्रहः । इक्ष्वाकुवंश्या इत्यर्थः । तैर्यद्व्रतं धृतं तत्पुण्यं व्रतमार्येण बाल्ये धृतमिति योजना । आरण्यकानां व्रतम् । अरण्यचरमनुष्यसंबन्धि व्रतमित्यर्थः । अत्र पुत्रसंक्रान्तलक्ष्मीकैरित्यनेन पुत्रवत्त्वमुपभुक्तराज्यत्वम्, संक्रान्तेति क्तप्रत्ययेन यावच्छरीरशैथिल्यमुपभुक्तराज्यवत्त्वम्, वृद्धेत्यनेन वार्धकं चावगम्यते । एवं चैतेषां समुदितानां सत्त्व एव पूर्वेषामारण्यकव्रतधारणं न तु यत्किंचित्सत्त्वे । रामस्य तु एतेषां सर्वेषामभावेऽप्यारण्यकव्रतधारणम् । बाल्ये इत्यनेन पुत्रवत्त्वोपभुक्तराज्यवत्त्वशरीरशैथिल्यवार्धकभावानां लाभात् । व्रतमित्यनेन असमञ्जसादिव्यावृत्तिः । व्रतस्य पुण्यत्वाव्यभिचारात् पुण्यमिति विशेषणं प्रसिद्धव्यावृत्त्यर्थम् । तद्धि अनुष्ठातुरेव पुण्यफलसाधनम् । इदं तु सकलभुवनाभीष्टसाधनमिति । आर्येणेत्यनेनासा-

---

पाठा०–१ 'एषा मन्थरा'. २ 'अनुत्तर'. ३ 'वृत्तान्तोऽन्तरितः'. ४ 'कृतम्'.

टिप्प०–1 तथा हि रघुवंशे कालिदासः (७.७१) 'प्रथमपरिगतार्थस्तं रघुः संनिवृत्तं विजयिनमभिनन्द्य श्लाघ्यजायासमेतम् । तदुपहितकुटुम्बः शान्तिमार्गोत्सुकोऽभूत् न हि सति कुलधुर्ये सूर्यवंश्या गृहाय ॥' इति ।

सीता—एसा पसण्णपुण्णसलिला भअवदी भाईरही । [एषा प्रसन्नपुण्यसलिला भगवती भागीरथी ।]

रामः—रघुकुलदेवते ! नमस्ते ।

तुरगविचयव्यग्रानुर्वीभिदः सगराध्वरे
कपिलमहसा रोषात्प्लुष्टान्पितुश्च पितामहान् ।
अगणिततनूतापस्तप्त्वा तपांसि भगीरथो
भगवति ! तव स्पृष्टानद्भिश्चिरादुदतीतरत् ॥ २३ ॥

सा त्वमम्ब ! स्नुषायामरुन्धतीव सीतायां शिवानुध्याना भव ।

लक्ष्मणः—एष भरद्वाजावेदितश्चित्रकूटयायिनि वर्त्मनि वनस्पतिः कालिन्दीतटे वटः श्यामो नाम ।

(रामः संस्पृहमवलोकयति ।)

सीता—सुमरेदि वा तं पदेसं अज्जउत्तो ? [स्मरति वा तं प्रदेशमार्यपुत्रः ?]

रामः—अयि, कथं विस्मर्यते ?

अलसलुलितमुग्धान्यध्वसंपातखेदा-
दशिथिलपरिरम्भैर्दत्तसंवाहनानि ।
परिमृदितमृणालीदुर्बलान्यङ्गकानि
त्वमुरसि मम कृत्वा यत्र निद्रामवाप्ता ॥ २४ ॥

मर्त्यनिबन्धनलोकवादभीत्यादिना न कृतम् । किंतु वैदिकश्रद्धामूलमित्यवगम्यते ॥ २२ ॥ प्रसन्नपुण्यसलिला स्वच्छपरिशुद्धजला ॥ **तुरगेति** । सगराध्वरे तुरगस्येन्द्रापहृताश्वस्य विचयेऽन्वेषणे व्यग्रान्ससंभ्रमान् । अत एवोर्वीभिदो भूमिखानिनः । भिदेः क्विप् । कपिलमहसा तन्नामकमुनितेजसा रोषाद्धेतोः प्लुष्टान् दग्धान् । 'प्लुष दाहे' । कर्मणि क्तः । तवाद्भिः स्पृष्टानुदतीतरदुत्तारयति स्म । तरतेर्णिचि लुङ् ॥ २३ ॥ शिवे मङ्गलेऽनुध्यानं यस्या इति विग्रहः । एतेन बीजानुगुणप्रोत्साहनरूपं भेदो नाम संध्यङ्गमुक्तम् । तदुक्तम्—'बीजानुगुणप्रोत्साहनं भेदः' इति । वनस्पतिरपुष्पत्वे सति फलवान् । वटः श्यामो नाम तथा प्रसिद्धिमान् ॥ अलसेत्यादि । अध्वनि मार्गे संपातः सम्यग्गमनम् । रामलक्ष्मणापेक्षया त्वरितगमनमिति भावः । 'अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान्' (अयोध्या. २७।७) इत्युक्तत्वात् । तेन यः खेद आयासस्तस्माद्धेतोरलसलुलितमुग्धान्यलसानि प्रसरणकुञ्चनासमर्थानि ललितानि मृदूनि मुग्धानि सुन्दराणि । स्वभावतः सौन्दर्यसौ-

---

पाठा०—१ 'समर्पान्'. २ 'पितुः प्रपिता°'. ३ 'तापं'. ४ 'उदद्धीधरत्'. ५ 'ध्यानपरा'. ६ 'पुर्ड'. ७ 'लुठित'. ८ 'संजात'.

लक्ष्मणः—एष विन्ध्याटवीमुखे विराधसंवादः ।

सीता—अलं दाव एदिणा । पेक्खम्मि दाव अज्जउत्तसहत्तधरिदतालवुंतादवत्तं अत्तणो अच्चाहिदं दक्खिणारण्णपहिअत्तणं । [अलं तावदेतेन । पश्यामि तावदार्यपुत्रस्वहस्तधृततालवृन्तातपत्रमात्मनोऽत्याहितं दक्षिणारण्यपथिकत्वम् ।]

रामः—

एतानि तानि गिरिनिर्झरिणीतटेषु
वैखानसाश्रिततरूणि तपोवनानि ।
येष्वातिथेयपरमा यमिनो भजन्ते
नीवारमुष्टिपचना गृहिणो गृहाणि ॥ २५ ॥

लक्ष्मणः—अयमविरलानोकहनिवहनिरन्तरस्निग्धनीलपरिसरारण्य-

कुमार्ययोः सत्त्वेऽप्यध्वसंपातखेदादलसललितमुग्धानीत्युक्त्या मार्गगमनायासेन तयोर्द्विगुणीभाव इति भावः । 'तथापि दृशोः प्रिया' इत्युक्तेः अशिथिलपरिरम्भैर्दत्तराल्लिङ्गनैः । बहुवचनमालिङ्गनावृत्त्यभिप्रायकम्, कामतन्त्रप्रसिद्धालिङ्गनभेदबाहुल्याभिप्रायकं वा । दत्तानि संवाहनानि येभ्य इति चतुर्थीबहुव्रीहिः । संवाहनं नामाङ्गानां गमनादिजनितायासशमनौपयिकहस्ततलस्पर्शविशेषः । परितः साकल्येन मृदिता निष्पीडिता या मृणाली तद्वद्दुर्बलानि स्वस्वधारणसामर्थ्यरहितान्यङ्गकानि । 'अनुकम्पायाम्' (पा. ५।३।६७) इति कन्प्रत्ययः । त्वं ममोरसि कृत्वा यत्र यस्मिन्प्रदेशे निद्रामवाप्ता स कथं विस्मर्यते ? इति योजना । अयं भावः—पूर्वमध्वसंपातखेदः, ततो ललितत्वसौकुमार्यद्विगुणीभावः, ततस्तद्दर्शनवशादशिथिलालिङ्गनबाहुल्यम्, ततश्च तत्संवाहनता, ततः स्वधारणसामर्थ्यविरहदौर्बल्यम्, ततो रामवक्षःस्थल एव लम्भता, ततस्तदीयसौकुमार्यपारवश्यात्तत्रैव निद्रावाप्तिरिति ॥ २४ ॥ स्वहस्तधृततालपत्रमेव तालवृन्तं तदेवातपत्रं यस्मिन्निति विग्रहः । आत्मनोऽत्याहितं जीवितनिरपेक्षक्रियारूपम् । दक्षिणारण्ये पथिकत्वमिति विग्रहः ॥ **एतानीति** । येषु तपोवनेषु । अतिथिषु विषये साधुरातिथेयोऽतिथिसत्कारः परमः येषां ते पुरुषा इत्यर्थः । यमिन इति द्वितीयान्तम् । पक्वान्नाधिकारिणो यतीन् भजन्ते सेवन्ते । किं च नीवारमुष्टेः पचनं यैस्ते गृहिणो गृहाणि भजन्ते । यद्वा,—यमिन इति गृहिविशेषणपदं प्रथमान्तम्, यमवन्तः । इदं धर्मादीनामप्युपलक्षणम् । आतिथेयपरमा गृहिणो गृहस्था गृहाणि भजन्त इत्यन्वयः । यद्वा,—आतिथेयपरमा आतिथ्यापेक्षिणो नीवारमुष्टेः पचनं येभ्य इति तथोक्ता यमिनः पक्वान्नाधिकारिणः कर्तारो गृहिणो गृहस्थस्य गृहाणि भजन्ते । तानि वैखानसैर्मुनिभिराश्रितास्तरवो येषु तथोक्तानि एतानीत्यन्वयः ॥ २५ ॥ **अयमविरलेत्यादि** । अरण्यपरिणद्धा गोदावरी मुखेषु येषां तानि

पाठा०—१ '°श्रमतरूणि'. २ 'शमिनो'.

परिणद्धगोदावरीमुखकन्दरः संततमभिष्यन्दमानमेघमेदुरितनीलिमा जनस्थानमध्यगो गिरिः प्रस्रवणो नाम।

रामः—

स्मरसि सुतनु! तस्मिन्पर्वते लक्ष्मणेन
प्रतिविहितसपर्यासुस्थयोस्तान्यहानि।
स्मरसि [1]सरसनीरां तत्र गोदावरीं वा
स्मरसि च तदुपान्तेष्वावयोर्वर्तनानि? ॥ २६ ॥

किं [2]च,—

किमपि किमपि मन्दं मन्दमासक्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् ॥ २७ ॥

कन्दराणि यस्य स तथोक्तः। पर्वतानां स्वतोऽपि नीलत्वान्मेदुरितेत्युक्तम् ॥ **स्मरसीति**। हे सुतनु! शोभना तनुर्यस्या इति विग्रहः। तनूरित्यूङन्ताद्वा संबुद्धौ ह्रस्वः। तस्मिन्पर्वते। प्रस्रवण इत्यर्थः। विहिताश्च ताः सपर्याश्च विहितसपर्याः। विहितसपर्यासु विहितसपर्यासु इति प्रतिविहितसपर्यम्। वीप्सायामव्ययीभावः। तत्र आसमन्तात्सुखेन स्थितयोरित्यर्थ.। 'सु. पूजायाम्' (पा. १।४।९४) इति कर्मप्रवचनीयत्वात् षत्वाभावः। यद्वा,—प्रतिविहिताभिः। प्रत्युपकारीकृताभिरित्यर्थः। अस्मत्कृतवनानुगमनानुज्ञामहोपकारस्येति शेषः। आवयोरित्याकृष्यते। सरसनीरां स्वाभाविकमधुररसयुक्तजलवतीम्। अनेन समुद्रसंगमसमीपस्थजलं व्यावर्त्यते। तत्रास्याः क्षारप्रसिद्धेर्वा किमित्यर्थः। अत एव पूर्वोत्तरयोः किमिति लभ्यते। अत्र प्राथमिकत्वाद्बाह्यत्वाच्च प्रथमं 'तान्यहानि' इति दिनस्योक्तिः। आनन्तर्याद्रहस्यत्वाच्च आवयोर्वर्तनानीत्यस्यानन्तरोक्तिः। तदुभयोपकारित्वाद्गोदावर्या मध्योक्तिरिति ध्येयम् ॥ २६ ॥ **किमपीति**। आसक्तिः रत्यभिनिवेशो विषयानुभूत्यानवस्थानलक्षणस्तस्या योगात् संबन्धाद्धेतोः अविरलितौ निरन्तरीकृतौ कपोलौ यस्मिन्कर्मणि तथोक्तम्। मन्दं मन्दमतिसूक्ष्माक्षरं यथा तथा अक्रमेणान्योन्यस्वभावविरुद्धप्रक्रियया किमपि किमपि। इद च गुप्तकथनम्। जल्पतोरशिथिले गाढे परिरम्भे व्यापृतमेकैकं दोः ययोरिति पूर्वस्मादनुषङ्गः। शेषे षष्ठीयम्। अविदितं यथा तथा गता यामा यस्यास्तथाविधा रात्रिरेव व्यरंसीत् विरमति स्म। नैवासक्तियोगविस्रम्भसंलापक्रीडादय इत्यर्थ.। 'व्याङ्परिभ्यो रमः' (पा. १।३।८३) इति परस्मैपदम्। 'यमरम–' (पा. ७।२।७३) इति सगिटौ। अत्र

पाठा०—१ 'सुरस°'. २ 'अपि च'.

लक्ष्मणः—एष पञ्चवट्यां शूर्पणखाविवादः ।

सीता—हा अज्जउत्त ! एत्तिअं दे दंसणं । [हा आर्यपुत्र ! एतावत्ते दर्शनम् ।]

रामः—अयि, वियोगत्रस्ते ! चित्रमेतत् ।

सीता—जह्रा तह्रा होदु । दुज्जणो असुहं उप्पादेइ । [यथा तथा भवतु । दुर्जनोऽसुखमुत्पादयति ।]

रामः—हन्त ! वर्तमान इव मे जनस्थानवृत्तान्तः प्रतिभाति ।

अविदितगतेति वाविदितगतनाडीति वा अकृत्वा यामपदोपादानादयमाशयोऽवगम्यते । 'भजति रतिसुखार्थं चित्रिणीमग्रयामे भजति दिनरजन्या हस्तिनीं च द्वितीये । गमयति च तृतीये शङ्खिनीमार्द्रभावं रमयति रमणीयां पद्मिनीं तुर्ययामे ॥' इत्युक्तप्रकारेण पद्मिन्यादीनां सुरतसौख्यातिशयाय यामविशेषा विधीयन्ते । तथा च पद्मिनीपाञ्चालादीनां स्वस्वविहितयामप्रतीक्षणं विहितेतरयामानां कथंचिदतिवाहनं च सिद्धम् । एवं च सीतारामयोः पद्मिनीपाञ्चालयोस्तुर्ययामस्यैव सुरतयोग्यत्वेन निरतिशयसुखावच्छेदककालत्वात्तस्याविदितगतत्वं किंतु तदुच्यमानं तदितरयामेषु पर्यवस्यतीति तद्वत्तेषामतिशयितसुखकालत्वं सिद्ध्यति । तेषामतिशयितकालत्वमान्तरसंभोगेनैवेति किमपि किमपीत्यादिभिरवगम्यते । तथा हि—किमपि किमपीत्यस्य सुरतकालीनवचोव्यजातमेवार्थः; गुप्तकथनात् । एवं च किमपि किमपि जल्पतोरित्यत्र मन्दंमन्दमविरलितकपोलमित्युभयत्र जल्पनेऽन्वेति अक्रमेणेत्यपि तथा । एवं च सुरतकालीनजल्पनस्य मान्द्यातिशयोक्तिकथनादार्द्रवाक्त्वं सीताया गम्यत इत्युक्तादतिविशेषात्फुल्लजृम्भितास्यबन्धविशेषो सूच्येते । तदुक्तं **काञ्चीनाथेन**—'उत्फुल्लजृम्भितयोः स्त्रिया आर्द्रवचो न क्रोधः' इति । तल्लक्षणं तु अविरलितकपोलत्वमुपविष्टयोरेव सुलभमिति । अक्रमेणेति पुरुषायितं सूच्यते । तच्च भ्रामरादिभेदात्रिविधमप्यत्र बोध्यम् । अत्र पुरुषायितस्य 'स्वेच्छया भ्रमणीवलभ—' इत्युक्तत्वात्स्वेच्छैव निमित्तमिति बोध्यम् । अशिथिलेत्यादिनापार्श्वशायिनोः सुरतमिति लभ्यते । अन्यथा उभाभ्यामेव बाहुभ्यां किं न स्यात्? एवं कतिपयैरेव बन्धविशेषैः रात्रेरेवावसितत्वाद्बहूनां क्रीडाविशेषाणां तद्धेतुभूतासक्तियोगस्य चाऽविरतत्वाद्रात्रिरेव व्यरंसीदित्युक्तम् । इदमेवाभिसंधाय 'बिन्दुमात्रं विशिष्यते' इति कालिदासेनोक्तम् । वस्तुतस्तु संलापादिबाह्यसंभोग एव स्वारस्यमिति सुधियो विभावयन्तु ॥ २७ ॥

एष इति । शूर्पणखाविवादः । रामेण लक्ष्मणं प्रति तेन रामं प्रति प्रेषणादिरिति भावः । 'नखमुखात्संज्ञायाम्' (पा. ४।१।५८) इति ङीषो निषेधः । 'पूर्वपदात्' (पा. ८।४।३) इति णत्वम् ॥ **वियोगत्रस्तेति** । वियोगात् त्रस्त इति विग्रहः । 'पञ्चमी' (पा. २।१।३७) इति योगविभागात्समासः ॥ असुखं दुःखम् ॥

पाठा०—१ 'एषा पञ्चवट्यां शूर्पणखा'. २ 'जेत्त्व'. ३ 'विप्रयोग'. ४ 'जधा तधा भोदु'.

लक्ष्मणः—

अथेदं रक्षोभिः कनकहरिणच्छद्मविधिना
तथा वृत्तं पापैर्व्यथयति यथा क्षालितमपि ।
जनस्थाने शून्ये विकलकरणैरार्यचरितै-
रपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम् ॥ २८॥

सीता—(सास्रमात्मगतम् ।) अम्हो, दिणअरकुलाणंदणो एव्वं वि मह कालणादो किलंतो आसि । [अहो, दिनकरकुलानन्दन एवमपि मम कारणात्क्लान्त आसीत् ।]

लक्ष्मणः—(रामं निर्वर्ण्य साकूतम्) आर्य ! किमेतत् ?

अयं तावद्बाष्पस्त्रुटित इव मुक्तामणिसरो
विसर्पन्धाराभिर्लुठति धरणीं जर्जरकणः ।
निरुद्धोऽप्यावेगः स्फुरदधरनासापुटतया
परेषामुन्नेयो भवति [1]चिरमाध्मातहृदयः ॥ २९ ॥

रामः—वत्स !

अथेति । अथ विकलकरणैरार्यचरितैः । यथा ग्रावापि रोदिति, वज्रस्यापि हृदयं दलति, तथा पापै रक्षोभिर्जनस्थाने शून्ये सति कनकहरिणच्छद्मविधिना वृत्तमिदं क्षालितमपि व्यथयतीत्यन्वयः । अथ शूर्पणखाचित्रदर्शनान्तरम् । यथा येन प्रकारेण विकलानि स्वस्वव्यापारशून्यानि करणानि चक्षुरादीनि येषु तथोक्तैरार्य-चरितैर्मूर्च्छाप्रभृतिव्यापारैर्ग्रावापि शिलापि रोदिति रोदनं करोति । 'रुदादिभ्यः' (पा. ७।२।७६) इतीट् । वज्रस्यपि वज्रादन्येनाभेद्यस्य वज्रस्यापि हृदयं मध्यप्रदेशो दलति द्विधा भिन्नं भवति, तथा तेन प्रकारेण वृत्तमिति संबन्धः । जनस्थाने पापै रक्षोभिः शून्ये सति । खरदूषणादिवधानन्तरमित्यर्थः । कनकहरिणच्छद्मविधिना स्वर्णमारीच-मायिकमृगव्याजकरणेन वृत्तं निष्पन्नमिदमिति सीताहरणादेश्चित्रस्थाहृतया निर्देशः । क्षालितमपि प्रतिकृतमपि व्यथयति दुःखं जनयति । शूर्पणखानन्तरं सीताहरणं लिखितमिति भावः । अत्र 'ग्रावापि रोदिति' इत्यादिकं नायोगे योगकल्पनम् । किंतु वाच्यमेव । 'अपि वृक्षाः परिम्लानाः' इतिवदुपपत्तेः । एवं स्मृत्वाऽद्यापि रोदिती-त्यवगम्यते ॥ २८ ॥ आर्येति । एतत् दृश्यमाणम् ॥ अयं तावदिति । त्रुटि-तश्छिन्न आवेगो दुःखातिशयः अधरश्च नासापुटश्चेति विग्रहस्तयोर्द्वन्द्वश्च । धनो न नासानद्दे इस. । उन्नेयोऽनुमेय आध्मातहृदयो गद्गदशब्दयुक्तकण्ठः । 'ध्मा शब्दे' इति धातोः कर्मणि क्तः । नेदं चित्रकथनम्, किंतु तात्कालिकयामनावस्थाकथ-

---

पाठा०—१ 'ते वाष्पौघः', २ 'भराध्मात'.

तत्कालप्रियजनविप्रयोगजन्मा
तीव्रोऽपि प्रतिकृतिवाञ्छया विसोढः ।
दुःखाग्निर्मनसि पुनर्विपच्यमानो
हृन्मर्मव्रण इव वेदनां तनोति ॥ ३० ॥

सीता—हद्धी हद्धी, अहं वि अदिभूमिं गदेण रणरणएण अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि । [हा धिक् हा धिक्—अहमप्यतिभूमिं गतेन रणरणकेनार्यपुत्रशून्यमिवात्मानं पश्यामि ।]

लक्ष्मणः—(स्वगतम् ।) भवतु, आक्षिपामि । (चित्रं विलोक्य प्रकाशम् ।) अथैतन्मन्वन्तरपुराणस्य तत्रभवतस्तातजटायुषश्चरित्रविक्रमोदाहरणम् ।

सीता—हा ताद ! णिव्वूढो दे अवच्चसिणेहो ! [हा तात ! निर्व्यूढस्तेऽपत्यस्नेहः ।]

रामः—हा तात काश्यप शकुन्तराज ! क्व नु खलु पुनस्त्वादृशस्य महतस्तीर्थभूतस्य साधोः संभवः ।

लक्ष्मणः—अयमसौ जनस्थानस्य पश्चिमतः कुञ्जवान्नाम पर्वतो दनुकबन्धाधिष्ठितो दण्डकारण्यभागः । तदिदमृष्यमूकपरिसरे मातङ्गाश्रमपदम् । तत्र श्रमणी नाम सिद्धा शबरतापसी । तदेतत्पम्पाभिधानं पद्मसरः ।

नमेव । तत्कथयेत्यादिप्रतिवचनानुरूप्यात् ॥ २९ ॥ **तत्कालेति** । प्रतिकृतिषु प्रतिक्रियासु वाञ्छया आदरेण विपच्यमानः । स्वयमेव परिपाकमाश्लिष्टेत्यर्थः । कर्मणः कर्तृत्वविवक्षया. 'कर्मवत्कर्मणा' (पा. ३।१।८७) इत्यातिदेशिकयगात्मनेपदम् । इदं च मध्यमणिन्यायेन पूर्वोत्तराभ्यामन्वेति । तनोति । विस्तारयतीत्यर्थः ॥ ३० ॥ भूमिमतिक्रान्तोऽतिभूमिः । 'अत्यादयः' (वा. ११२६) इति समासः । भावप्रधानो निर्देशः । अतिभूमित्वं गतेनेत्यर्थः । वैपुल्यं प्राप्तेनेति यावत् । रणरणकेन भवसंभ्रमेण । आक्षिपाम्यन्यतो मनःप्रवर्तनेन पूर्वोक्तं विस्मारयामि । **अथैतदिति** । अन्यो मनुर्मन्वन्तरम् । मयूरव्यंसकादित्वात्समासः । मन्वन्तरात्पुराणस्येति विग्रहः । सुप्सुपेति समासः । तातजटायुषः पितृसखत्वात्तातपदव्यपदेशः । चरित्रं सद्वृत्तम् । विक्रमः शौर्यम् । उदाहरणं सदृशान्तिचित्रलेखनमिति भाव. । **हा तातेति** । काश्यपः कश्यपपुत्रः । तीर्थभूतस्य हितोपदेष्टुः ॥ **एतस्मिन्निति** । मदेन वर्ण

पाठा०—१ 'करोति'. २ 'अन्यतः क्षि०'. ३ 'गृध्रराजस्य'. ४ 'ऋष्यमूकगिरि०'. ५ 'श्रमणा'.

सीता—जत्थ किल अज्जउत्तेण विच्छिण्णामरिसधीरत्तणं पमुक्ककंठं परुण्णं आसि। [यत्र किलार्यपुत्रेण विच्छिन्नामर्षधीरत्वं प्रमुक्तकण्ठं प्ररुदितमासीत्।]

रामः—देवि! परं रमणीयमेतत्सरः।

एतस्मिन्मदकलमल्लिकाक्षपक्ष-
व्याधूतस्फुरदुरुदण्डपुण्डरीकाः।
बाष्पाम्भःपरिपतनोद्गमान्तराले
संदृष्टाः कुवलयिनो मया विभागाः॥ ३१॥

लक्ष्मणः—अयमार्यो हनूमान्।

कूजितं येषां ते तथोक्ताः। तथाविधानां मल्लिकाक्षाणां सविशेषाणां पक्षैर्गरुद्भिर्व्याधूताः कम्पिताः स्फुरन्तश्चरवो दण्डा येषां तानि पुण्डरीकाणि येषु ते तथोक्ताः। कुवलयिनश्च विभागाः प्रदेशा बाष्पाम्भसः परिपतनोद्गमयोरन्तराले मया संदृष्टाः। निरन्तरं दृष्टा इत्यर्थः। तथा कुवलयिन इत्यत्र प्रशंसायां मतुपा प्रशस्तकुवलययुक्ता इत्यर्थलाभेन रात्रौ दृष्टा इति सूच्यते। केचित्तु—मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीका विभागा बाष्पाम्भःपरिपतनोद्गमान्तराले कुवलयिनो दृष्टा इत्यन्वयमुक्त्वा बाष्पाम्भःप्रसरणमालिनीकृतपुण्डरीकाः कुवलयवन्तो दृष्टाः—इत्यर्थमाहुः। परे तु—मदकलमल्लिकाक्षपक्षव्याधूतस्फुरदुरुदण्डपुण्डरीकाः कुवलयिनश्च विभागाः। विभज्यन्त इति विभागाः। परस्परसंकीर्णप्रदेशा बाष्पाम्भःपरिपतनोद्गमान्तराले संदृष्टा एकीकृत्य दृष्टाः। समिलेकीकारे। अविभागेन दृष्टा इत्याहुः। इतरे तु—'ननु रमणीयमेतत्पद्माकरः' इत्युक्तं त्वया तत्कथमुपपद्यते? विरहोद्दीपककलकूजितकलहंसाधिष्ठितपुण्डरीकयुक्तस्य सरसो द्रष्टुमशक्यत्वादित्याह—एतस्मिन्मदकलेति। मद् अकलेति पदच्छेदः। मदिनि पञ्चम्येकवचनम्। पृथक्पदं समस्तं वा। मन्मलिनितं विरहव्यथातुरमद्देनोर्न विद्यते कलं कूजितं येषां ते येषां मल्लिकाक्षाणां हंसविशेषाणां पक्षैर्व्याधूतानि कम्पितानीति यावत्। अत एव स्फुरदुरुदण्डानि निराधारतया चलदुरुदण्डानि पुण्डरीकाणि येषु तथोक्ताः कुवलयिनः पुण्डरीकवद्दिवा विकासाभावेनाकिंचित्करत्वादकैरव्याधूततया कुवलयवत्तामात्रवन्तः। एतस्मिन्विभागा बाष्पाम्भःपरिपतनोद्गमान्तराले संदृष्टाः सम्यग्दृष्टाः। परिदाहकत्वंभावितत्वादश्रुस्थितिविच्छित्तिरेकानिश्चयपर्यन्तं दृष्टा इत्यर्थः। निरुद्वेगतया सम्यग्दृष्टा इति भावः। मल्लिकाक्षाः खलु विरहोद्विग्नस्य मम इत्थं स्वयं विरहमधुरमत्कं कूजितं त्यक्त्वा तदुद्दीपकानि पुण्डरीकाण्यकम्पनाशयन् ततोऽहं निरुद्वेगतया मान्तरीक्षतचापस्थितिपर्यन्तं तान्विभागान् दृष्टवानिति भावः। [illegible]—विरहिणं रामं प्रति मल्लिकाक्षाणाम् 'अपि मया रोदिति' इति

पाठा०—१ 'मुक्तो वि'.

सीता—एसो सो चिरणिव्वूढजीवलोअप्पुद्धरणगुरुओवआरी महाणुभावो मारुदी । [एष स चिरनिर्व्यूढजीवलोकप्रत्युद्धरणगुरूपकारी महानुभावो मारुतिः ।]

रामः—

दिष्ट्या सोऽयं महाबाहुरञ्जनानन्दवर्धनः ।
यस्य वीर्येण कृतिनो वयं च भुवनानि च ॥ ३२ ॥

सीता—वच्छ! एसो सो कुसुमिदकअंबतरुतांडविअबंहिणो किंणामहेओ गिरी ? जत्थ अणुभावसोहग्गमेत्तपरिसेससुंदरसिरी मुच्छंदो तुए परुण्णेण ओलंबिओ तरुअले अज्जउत्तो आलिहिदो । [वत्स! एष स कुसुमितकदम्बकतरुताण्डवितबर्हिणः किंनामधेयो गिरिः ? यत्रानुभावसौभाग्यमात्रपरिशेषसुन्दरश्रीर्मूर्च्छंस्त्वया प्ररुदितेनावलम्बितस्तरुतले आर्यपुत्र आलिखितः ।]

लक्ष्मणः—

सोऽयं शैलः ककुभसुरभिर्माल्यवान्नाम यस्मि-
न्नीलः स्निग्धः श्रयति शिखरं नूतनस्तोयवाहः ।

न्यायेन करुणायाः संभवात् । हंसचक्रवाकशापदर्शनेन चक्रवाकशापदाता रामोऽस्माकमपि शापं दास्यतीति भीत्या शब्दासंभवात् । 'कण्ठेषु स्खलितं गतेऽपि शिशिरे पुंस्कोकिलानां रुतम्' इत्यादिविषयविशेषैस्तिरश्चामपि विरहिजनानुरोधः प्रसिद्धश्चेति वदन्ति ॥ ३१ ॥ एष इति । चिरान्निर्व्यूढं निष्पादितं यज्जीवलोकप्रत्युद्धरणं तेन गुरु यथा भवति तथा । उपकरोतीत्युपकारी दशमासपरिमितरावणगृहवासस्यातिभूयस्त्वाभिसंभिना चिरादित्युक्तम् । स्वमत्तयैव जीवलोकममतासंभावनया स्वोद्धरणेन तदुद्धरणसंभावनया च जीवलोकप्रत्युद्धरणमित्युक्तम् ॥ **दिष्ट्येति** । दिष्ट्येत्यानन्दे । **यस्य वीर्येणे**त्यादि । वयम् लक्ष्मणभरतशत्रुघ्नसीताविभीषणसुग्रीववानरा अहं चेत्यर्थः । कृतिनः सुकृतिनः । यद्वा,—कृतसुपकारस्तदन्तः । उपकृत इत्यर्थः । अन्योन्यवृत्तान्तकथनेन सीतारामयोः, स्वागवधानन्तुपसीताविरहपरिहारेण लक्ष्मणस्य, वह्निप्रवेशपरिहारेण भरतशत्रुघ्नयोः शरणागतस्वपरिभवहरिद्धान्तेन विभीषणस्य, सुखोत्पादनेन सुग्रीवस्य, मधुवनभङ्गापराधवारणेन वानराणाम्, स्वसंजीवनादिना भुवनानां च कृतित्वमिति यथायथमूहनीयम् ॥ ३२ ॥ अनुभावः प्रभावः । सौभाग्यं सौन्दर्यम् । प्ररुदितेन रोदनकर्त्रा । 'आदिकर्मणि क्तः' (पा. ३।४।७१) । रोदनप्रारम्भ एव । अवलम्बितः पतन् यथा धारितः इति ॥ **शैलः(सोऽयं)** इति । ककुभा वृक्षविशेषास्तेषां पुष्पैः सुरभिः । 'पुष्पमू-

पाठा०—१ 'धूसर°'.

आर्येणास्मिन्

रामः—

विरम विरमातःपरं न क्षमोऽस्मि

प्रत्यावृत्तः स पुनरिव मे जानकीविप्रयोगः ॥ ३३ ॥

लक्ष्मणः—अतःपरमार्यस्य तत्रभवतां कपिराक्षसानां चापरिसंख्यान्युत्तरोत्तराणि कर्माश्चर्याणि। परिश्रान्ता चेयमार्या। तद्विज्ञापयामि विश्राम्यतामिति।

सीता—अज्जउत्त! एदिणा चित्तदंसणेण पच्चुप्पण्णदोहलाए मए विण्णावणिज्जं अत्थि। [आर्यपुत्र! एतेन चित्रदर्शनेन प्रत्युत्पन्नदोहदाया मम विज्ञापनीयमस्ति।]

रामः—नन्वाज्ञापय।

सीता—जाणे पुणो वि पसण्णगंभीरासु वणराईसु विहरिअ पवित्तणिम्मलसिसिरसलिलं भअवदिं भाईरहिं ओगाहिस्सं ति। [जाने पुनरपि प्रसन्नगम्भीरासु वनराजिषु विहृत्य पवित्रनिर्मलशिशिरसलिलां भगवतीं भागीरथीं अवगाहिष्ये इति।]

रामः—वत्स लक्ष्मण!

लक्ष्मणः—एषोऽस्मि।

रामः—वत्स! अचिरादेव संपादनीयो दौर्हृद इति संमत्यैव गुरुभिः संदिष्टम्। तदस्खलितसंपातं रथमुपस्थापय।

सीता—अज्जउत्त! तुम्हेहिं वि आअंदव्वं। [आर्यपुत्र! युष्माभिरप्यागन्तव्यम्।]

रामः—अतिकठिनहृदये! एतदपि वक्तव्यम्?

सीता—तेण हि पिअं मे पिअं मे। [तेन हि प्रियं मे प्रियं मे।]

लक्ष्मणः—यदाज्ञापयत्यार्यः। (इति निष्क्रान्तः।)

रामः—प्रिये![1] वातायनोपकण्ठे संविष्टा भव।

टेषु बहुलम्' (वा. २९५०) इति ढुक्। विप्रयोगः वियोगः। प्रत्यावृत्तः पुनरागत ॥ ३३ ॥ अपरिसंख्यानीति परिसंख्यानिषेधः अवधिरिति यावत्। तदहितानि संख्यातुमशक्यानीति वा ॥ प्रत्युत्पन्नदोहदायाः उत्पन्नाभिलाषाया इत्यर्थः। उत्पन्नमनोभिलाषाया इति वा ॥ वत्स, अचिरादित्यादि। एव गूढगर्भवचनाद्भेदः ॥

पाठा०–१ 'अचिरं'. २ 'अत्र...संनिष्टौ भवावः'.

सीता—एव्वं होदु । ओहारिदम्हि खु परिस्समणिद्दाए। [एवं भवतु । अपहृतास्मि खलु परिश्रमनिद्रया।]

रामः—तेन हि निरन्तरमवलम्बस्व मामनुगमनाय।

जीवयन्निव ससाध्वसश्रमस्वेदबिन्दुरधिकण्ठमर्प्यताम् ।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥३४॥

(तथा कारयन् सानन्दम्।) प्रिये ! किमेतत् ?

विनिश्चेतुं शक्यो न सुखमिति वा दुःखमिति वा
प्रमोहो निद्रा वा किमु विषविसर्पः किमु मदः ।
तव स्पर्शे स्पर्शे मम हि परिमूढेन्द्रियगणो
विकारश्चैतन्यं भ्रमयति च संमीलयति च ॥ ३५ ॥

जीवयन्निति। साध्वसं भयम्। अधिकण्ठम्। कण्ठ इत्यर्थः। इन्दोरिमे ऐन्दवाः। चन्द्रमणिः चन्द्रकान्तशिला। जीवयन्नर्प्यतामिवेत्यन्वयः। 'इव'शब्द ईषदर्थकः। जीवयन्निति च 'लक्षणहेत्वोः' (पा. ३।२।१२६) इति शतृ। तथा च मत्संजीवनफलकं यदीयदर्पणं तत्कर्म क्रियतामित्यर्थः। अथवा,-एतद्विरहे 'न जीवेयं क्षणमपि' इत्युक्तम्। अत्र ऐन्दवेत्यादिना सादृश्यमुक्त्वा जीवयन्निति विशेषस्योक्तेर्व्यतिरेकालंकारः। 'व्यतिरेको विशेषश्चेदुपमानोपमेययोः' इति ॥३४॥ **तथा कारयन्निति**। 'सहजलज्जाजडदृशः' (६।२८) इति वक्ष्यमाणरीत्या लज्जयाविष्टायां तस्यां स्वयं तथा कारयन्नित्यर्थः। पूर्वोक्तश्रमवशाच्च स्वयमेव तथा कारयतीत्युक्तम्॥ **विनिश्चेतुमिति**। अत्रत्यसुखदुःखशब्दौ प्रियाप्रियमित्रशत्रुसंश्लेषादिजन्यमानससुखदुःखपरौ; शारीरसुखदुःखमदविषविसर्पयोः पृथग्ग्रहणात्। सुखदुःखयोः शारीरमानसत्वविभागस्तु 'कर्मणि च येन संस्पर्शात्कर्तुः शरीरसुखम्' इति सूत्रतद्व्याख्यानयोः स्पष्टः। अत्र सीते इति संबुद्ध्यन्तमध्याहार्यम्; तथैवोक्तेः। हे सीते ! तव स्पर्शे स्पर्शे त्वदीययावत्स्पर्शेषु परिमूढः स्वस्वविषयग्रहणासमर्थ इन्द्रियगणश्चक्षुरादीन्द्रियसमूहः येन स तथोक्तो मम विकार आन्तरावस्थाविशेषः। चैतन्यमन्तःकरणावच्छिन्नचैतन्यम्। जीवचैतन्यमिति यावत्। अद्वैतमतप्रक्रियैवेदमुक्तम्। मदन्तरात्मानमिति फलितोऽर्थः। भ्रमयति प्रतिकूलतया भासमानः सन् क्षुब्धं करोति। संमीलयति च अनुकूलतया भासमानः सन् उल्लासयति च। अयमित्यध्याहार्यम्। अयं विकारः सुखमिति विनिश्चेतुं न शक्यः, दुःखमिति वा विनिश्चेतुं न शक्यः। प्रमोहो वा प्रकृष्टमूर्च्छात्वेन संशयितुं योग्यो निद्रा वा सुषुप्तित्वेन संशयितुं योग्यो विषविसर्पः किमु। विषेण विसृप्यत इति विग्रहः। कर्मणि घञ्। विषप्रसरणजन्यत्वेन संशयितुं योग्य इत्यर्थः। मदः किमु। मदत्वेन संशयितुं योग्य इत्यर्थः। अस्य विकारस्य स्पर्शजन्यत्वात्परिमूढेन्द्रियगणत्वादन्तरात्मक्षोभकरत्वाच्च तथाविधशास्त्रवादि-

---

पाठा०-१ ''मजणिद्दाए णिद्दाए'. २ 'समुन्मीलयति च'.

सीता—धीरप्पसादा तुम्हेत्ति एत्थ दाणिं अच्चरिअं। [धीरप्रसादा यूयमित्यत्रेदानीमाश्चर्यम्।]

रामः—

म्लानस्य जीवकुसुमस्य विकासनानि
संतर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते[1] सुवचनानि सरोरुहाक्षि!
कर्णामृतानि मनसश्च रसायनानि॥ ३६॥

स्पर्शजन्यमानसदुःखत्वेन संशययोग्यत्वम्। एवं स्पर्शजन्यत्वात्परिमूढेन्द्रियगणत्वादन्तरात्मोल्लासकारित्वाच्च तथाविधमित्रादिस्पर्शजन्यमानससुखत्वेन संशयार्हत्वं भवति च मित्रादिस्पर्शजन्यसुखं परिमूढेन्द्रियगणम्। 'नीवीं प्रति प्रणिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि' (का. प्र. ४।६१) इत्युक्तेः। एवं स्पर्शजन्यत्वात्परिमूढेन्द्रियगणत्वादन्तरात्मक्षोभकरत्वाच्चास्य दण्डाद्यभिघातजन्यपरिमूढेन्द्रियगणत्वान्तरात्मक्षोभकरत्वविशिष्टसूक्ष्मप्राणसंचाररूपमूर्च्छात्वेन संभवनार्हत्वम्। एवमस्य विकारस्य स्पर्शजन्यत्वात्परिमूढेन्द्रियगणत्वादन्तरात्मानुकूलत्वाच्च मृदुतरतल्पादिस्पर्शजन्यत्वनिवृत्तेन्द्रियव्यापारत्वपरमात्मसुपरिष्वङ्गप्रयुक्तसुखरूपत्वविशिष्टनिद्रात्वेन संशयार्हत्वम्। एवमस्य स्पर्शजन्यत्वात्परिमूढेन्द्रियगणत्वादन्तरात्मप्रतिकूलत्वाच्च तथाविधविषस्पर्शजन्यविकारत्वेन संशयार्हत्वम्। एवमस्य स्पर्शजन्यत्वात्परिमूढेन्द्रियगणत्वादन्तरात्मानुकूलत्वात्तथाविधमदत्वेन संशययोग्यत्वम्। मदस्य क्षीरसुराद्याप्यायकवस्त्वायत्तत्वात्स्पर्शजन्यत्वं परिमूढेन्द्रियगणत्वमन्तरात्मानुकूलत्वं च। तदुक्तम्—'मदिरादिकृतो मोहहर्षव्यतिकरो मदः' इति। सर्वमिदं सीताया भोग्यताप्रकर्षे तात्पर्यमाविष्करोति। 'हि'शब्दः प्रसिद्धौ। तथा च मदीयोऽयं विकारस्त्वयापि ज्ञायत इति व्यज्यते॥ ३५॥ म्लानस्येति। म्लानस्य दुःखशबलो जीवकुसुमस्य जीव एव कुसुमं तस्य विकासनानि विकासजनकानि हर्षोत्पादकानि संतर्पणानि तृप्तिजनकानि भोग्यान्तरापेक्षानुत्पादकानि, अत एव सकलानामिन्द्रियाणां मोहनानि स्वव्यापारविरोधीनि कर्णयोरमृतानि। यथा 'अमृतस्य। दृष्ट्वा तृप्यन्ति' इति दर्शनमात्रेण तृप्तिजनकत्वम्, तद्वद्वेपानर्थपर्यालोचनं विनापि रमणीयत्वमिति भावः। मनसश्च रसायनानि। रसायनं नामानेकरसवस्तुसमुदायात्मकरसवस्तुविशेषो वाग्भटे प्रसिद्धः। बहुवचनेन अनेकरसायनसदृशानीति व्यज्यते। किंचानेकरसायनवस्त्वास्वादनेन सर्वेषां रसानां तत्रोपलम्भः, एवं शब्दान्तरश्रवणजन्यसुखानामेतद्वचनैर्लाभ इति व्यज्यते। अपि च यथा रसायनस्य रसमयत्वाद्रोचकत्वम्, औषधात्मकत्वाद्रोगनिवर्तकत्वं च, एवमेतेषामपि प्रियत्वं हितत्वं चेति व्यञ्जयितुं रसायनत्वोक्तिः। सरोरुहाक्षि, आयामकर्णानुकूलाभ्यां सादृश्यमभिमतम्। एवं च स्वस्या अपि स्ववचनेष्वप्रत्युक्तुर्विस्मयाविरामः सूचितः—अपि

पाठा०—१ 'तानि वचनानि सरोरुहाक्ष्याः'.

सीता— पिअंवद ! एहि, 'संविसम्ह' । [प्रियंवद ! एहि, संविशावः ।]

रामः— अपि संदेष्टव्यम् ।

आ विवाहसमयाद्गृहे वने
शैशवे तदनु यौवने पुनः ।
स्वापहेतुरनुपाश्रितोऽन्यया
रामबाहुरुपधानमेष ते ॥ ३७ ॥

सीता— (निद्रां नाटयन्ती ।) अत्थि एदं, अज्जउत्त ! अत्थि एदं । (इति स्वपिति ।) [अस्त्येतत्, आर्यपुत्र ! अस्त्येतत् ।]

रामः— कथं प्रियवचनेनैव मे वक्षसि प्रसुप्ता ? (निर्वर्ण्य,)

इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयो-
रसावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः ।
अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः ॥ ३८ ॥

विपुलत्वद्विगुणीभाव इति भावः । ते सुवचनानि स्वकीयवचनवैलक्षण्यातिशयतः सीतायाः स्ववचनेषु स्वीयतासंशयः स्यादिति वै इत्युक्तिः । तुशब्देन सीतावचनेष्वपि एतादृशं सौभाग्यं नानुभूतपूर्वमिति व्यज्यते, 'क्षणे क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः' इति न्यायेन न दोषः ॥ ३६ ॥ प्रियंवद प्रियवादिन् ! 'प्रियवशे वदः खच्' (पा.३।२।३८)। संविशावः । 'स्वप्नः संवेश इत्यपि' इत्यमरः ॥ अपि संदेष्टव्यम् । संदेश उक्तिः । भ्रुकुटीभङ्गेन सूचयितव्ये किमर्थमुक्तिप्रयास इति भावः । यद्वा,-यथा शयनदशायामुपधानादीनामुपकरणत्वं तद्वन्ममापीति विधिर्वा निमर्थ इति भावः ॥ उपकरणत्वमेवाह—**आ विवाहेति** । आ विवाहसमयात् विवाहसमयादारभ्येत्यर्थः । गृहे शैशवे यौवने च स्वापहेतुः । वने पुनर्यौवने स्वापहेतुरित्यन्वयः, न तु यथासंख्यम् । अन्यया अनुपाश्रितः, स्वापहेतुतयाऽनुपाश्रित इत्यर्थः । अतः 'जुष्टं परमनारीणां भुजैः परमसुन्दरैः' इत्यनेन न विरोधः; चेटीविषयया संवाहने तात्पर्यात्, 'न रामः परदारान्वै चक्षुर्भ्यामपि पश्यति' इत्युक्तेः । मद्बाहुरुपधानमित्यनुक्त्वा रामबाहुरित्युक्तिः प्रसिद्धिद्योतनार्था । 'उपधाय भुजं तस्य' इत्यादिवचनात् ॥ ३७ ॥ **इयमिति** । इयं गेहे लक्ष्मी लक्ष्मीसदृशी । इयममृतवर्तिर्नयनयोः । तथा नयनानन्दकरीत्यर्थः । किमेतत्पर्यन्तानुधावनवचनेन ? एतदीयमेव यत्किंचिन्मम पर्याप्तमित्याह—**असावस्या इति** । वपुषि प्रसिद्धचन्दनव्यावृत्तिः । अस्याः किं न प्रेयः एतत्संबन्धि किं न प्रियम् ? सर्वमपि प्रियमेवेत्यर्थः । अत्र सीतापेक्षया तत्संबन्ध्येव प्रियमिति रामचन्द्रमताभिनि कवेराशयोऽव-

---

पाठा०-१ 'सहस्सं'. २ 'मयि'. ३ 'प्रसुप्तैव'.

(प्रविश्य ।)

प्रतीहारी—देव! उवट्ठिदो । [देव! उपस्थितः ।]

रामः—अयि, कः ?

प्रतीहारी—आसण्णपरिआरओ देवस्स दुम्मुहो । [आसन्नपरिचारको देवस्य दुर्मुखः ।]

रामः—(स्वगतम् ।) शुद्धान्तचारी दुर्मुखः, स मया पौरजानपदेष्वपसर्पः प्रहितः । (प्रकाशम् ।) आगच्छतु ।

(प्रतीहारी निष्क्रान्ता ।)

(प्रविश्य ।)

दुर्मुखः—(स्वगतम् ।) हा, कहं दाणिं देविं अंतरेण ईरिसं अचिंतणिज्जं जणाववादं देवस्स कहइस्सं ? अहवा णिओओ खु मह मंदभाअहेअस्स एसो । [हा, कथमिदानीं देवीमन्तरेणेदृशमचिन्तनीयं जनापवादं देवस्य कथयिष्यामि ? अथवा नियोगः खलु मम मन्दभागधेयस्यैषः ।]

सीता—(उत्स्वप्नायते ।) अज्जउत्त ! कहिं सि ? [आर्यपुत्र! कुत्रासि ?]

रामः—सेयमेव रणरणकदायिनी चित्रदर्शनाद्विरहभावना देव्याः स्वप्नोद्योगं करोति । (सस्नेहमङ्गमस्याः परामृशन् ।)

गम्यते; उपसंहारे किमस्या न प्रेय इत्युक्तत्वात् । इतरथा कथमेवेलेव न वदेत् ? भर्तृमीढश्च—'मनसिजरुजः सा वा दिव्या ममालमपोहितुं रहसि लघयेदारब्धा वा तदाश्रयिणी कथा' इत्याह । अत्र रामबाहुरुपधानमिति सीतां प्रति स्वबाहोरुपधानत्वमुक्त्वा 'अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः' इत्युक्तं रामेण । तदिदं वैलक्षण्यातिशयकार्यम् । अत्र 'इयं गेहे लक्ष्मीः' इत्यादिभिरेकस्या एव सीताया गृहविषये दीपकलिकाकार्यकारित्वं चक्षुर्विषये ज्योत्स्नादिकारित्वं कण्ठे हारकार्यकारित्वं च व्यज्यते । रूपकमुल्लेखो वा अलंकारः ॥ ३८ ॥ आसन्नपरिचारको दुर्मुखस्तन्नामा ॥ अपसर्पो गूढचरः । प्रहितः प्रयुक्तः, न तु वास्तव इत्यर्थः ॥ रणरणकदायिनी विक्षोभकारिणी । विरहभावना वियोगध्यानम् । चित्रदर्शनादिति स्मरणहेतुरुक्तः । स्वप्ने स्थिता सुद्योगं वचनादिप्रयत्नम् । 'उद्वेगम्' इति पाठे भयसंभ्रममित्यर्थः । अङ्गमस्याः परामृशन् । एतेनोपरितनश्लोकस्यापत्यविषयत्वकल्पना परास्ता; तथा सति उदरमस्याः परामृशन्निति वक्तव्यतापत्तेः । न च 'मय्येवादौ ज्ञातः करतलपरामर्शकलया द्विधा गर्भग्रन्थिः' (६।२८) इति वक्ष्यमाणानुवादस्य पुरोवादसापेक्षतया अत्रत्याङ्गशब्दस्य तद्विशालोदरपरत्वं कवेः संमतमिति

पाठ०—१ 'भये'. २ 'स्वप्नोद्वेग'.

अद्वैतं सुखदुःखयोरनुगतं सर्वास्ववस्थासु य-
द्विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः ।
कालेना वरणात्ययात्परिणते यत्प्रेमसारे स्थितं
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते ॥३९॥

दुर्मुखः—(उपसृत्य ।) जेदु देवो । [जयतु देव. ।]

रामः—ब्रूहि यदुपलब्धम् ।

दुर्मुखः—उवत्थुवंति देवं पौरजाणपदा जहा—विसुमराविदा अम्हे महाराअं दसरहं रामदेवेणेत्ति । [उपस्तुवन्ति देवं पौरजानपदा यथा—विस्मारिता वयं महाराजं दशरथं रामदेवेनेति ।]

रामः—अर्थवाद एवैषः । दोषं तु मे कथंचित्कथय येन स प्रतिविधीयते ।

वाच्यम् । तत्र 'सहजलज्जाजडदृशः' (६।२८) इति जागरप्रतीते, अत्र च सुषुप्तिप्रतीतेस्तदयोगादिति ध्येयम् । अद्वैतमिति । यत्सर्वास्ववस्थासु सुखदुःखयोरद्वैतमनुगतम् । जाग्रत्स्वप्नसुषुप्त्यादिसर्वावस्थासु ये सुखदुःखे तयोः संबन्धि यदद्वैतमभिन्नत्वं तदनुगतम् । तद्विशिष्टमित्यर्थः । सर्वास्ववस्थास्वभिन्नसुखदुःखापादकमित्यर्थः । द्वयोर्भावो द्वैतम् । इदमेवाद्वैतं चक्रवाकमिथुनवर्णनव्यपदेशेन नवेन कविना व्याख्यातम्—'भुक्तं तद्बिसृणालयोर्मिथुनयो पीतं द्विराजीवयोः सुप्तं तद्विफलाशयोरविरलं संश्लिष्टयोर्यद्यपि । पर्यायात्त्वमयद्वयेन विरुतं भिन्नप्रयत्नेन वा मूर्तिद्वैतवशान्मतिर्मिथुनमित्यद्वैतमेवानयो ॥' इति । पर्यायादिति पर्यायशब्दमन्तर्भाव्य न निरुद्धमिति ल्यब्लोपे पञ्चमी व्याख्येया । नातः 'समयद्वय' इत्यनेन पौनरुक्त्यम् । यत्र दाम्पत्ये, हृदयस्य, गुरुकुलक्लिष्टमनस इत्यर्थः । विश्रामः श्रमापनयनकरसुखविशेषानुभवः । अत्र '–'विश्राम' इत्यपाणिनीयम्; नोदात्तेति वृद्धिप्रतिषेधात्' इति वैयाकरणाः । श्रीहर्षस्तु 'विश्रामो विश्रमश्च' इति द्विरूपकोशे उक्तवान् । यस्मिन्दाम्पत्ये रसः स्पृहारूपो जरसा जरया अहार्यो हर्तुमशक्य । यद्वा,–यस्मिन्नाति रस आह्लादो जरसाऽप्यहार्यः; आ वरणात्ययात् । पदद्वयमिदम् । वरणं विवाह, अत्यय शरीरसंपातः, वरणं चात्ययश्चेति समाहारद्वन्द्वः । आ वरणात्ययात् । वरणात्ययमभिव्याप्येत्यर्थः । वरणमारभ्य शरीरपातपर्यन्तं वर्तमानेन कालेन परिणते उपचयं प्राप्ते प्रेमसारे उत्कृष्टप्रेम्णि स्थितं स्थितिमत् । 'मालत्याः प्रथमावलोकदिवसादारभ्य विस्तारिभिर्भूय स्नेहविचेष्टितैर्मृगदृशो नीतस्य कोटिं पराम्' । 'परा कोटिं स्नेहो परिचयविनाशादधिगते' इत्यादि समानार्थकं, 'कालेनावरणात्ययात्परिणते यत्प्रेमसारे स्थितम्' इति वाक्यं वेदितव्यम् । केचित्तु आवरणात्ययात्प्रतिबन्धकनिवृत्तेरिति व्याचक्षते । प्रेम्ण उत्कृष्टत्वं च परकीयाविरोधोपप-

---

पाठा०–१ 'यत्स्नेहसारे', २ 'प्रेम'. ३ 'कश्चित्'.

दुर्मुखः—(साशम्।) सुणादु महाराओ। (कर्णे) एव्वं विअ। [शृणोतु महाराजः। एवमिव।]

रामः—अहह, अतितीव्रोऽयं वाग्वज्रः। (इति मूर्च्छति।)

दुर्मुखः—आससदु देवो। [आश्वसितु देवः।]

रामः—(आश्वस्य।)

> हा हा धिक्परगृहवासदूषणं य-
> द्वैदेह्याः प्रशमितमद्भुतैरुपायैः।
> एतत्तत्पुनरपि दैवदुर्विपाका-
> दालर्कं विषमिव सर्वतः प्रसक्तम् ॥ ४० ॥

तत्किमद्य मन्दभाग्यः करोमि? (विमृश्य, सकरुणम्।) अथवा किमेतत्?।

> सतां केनापि कार्येण लोकस्याराधनं परम्।
> तत्प्रतीतं हि तातेन मां च प्राणांश्च मुञ्चता ॥ ४१ ॥

त्यायविपयत्वम्। तस्य सुमानुपस्य दाम्पत्यस्य। 'सुमानुपं तु दाम्पत्यम्' इत्यभिधानादिति प्राञ्च आहुः। अत एवैतद्विकृतिभूतदाम्पत्यार्थत्वम्, 'अनिच्छिति'-शब्दस्य द्रविडभाषाप्रसिद्धिरपि। अन्ये तु—'प्रकरणानुगुण्याद्विशेषणसारस्यात्त-च्छब्देन दाम्पत्ये लब्धे सुमानुपस्येति तद्विशेषणतया योजनीयम्। 'शोभनो मानुपो येन' इत्याहुः। केचित्तु—'सुमानुपस्य सौजन्यस्य' इत्याहुः। कथमपि सर्वप्रकारेणापि तत्प्रसिद्धमेकं मुख्यं भद्रं क्षेमं प्रार्थ्यते प्रकर्षेण याच्यते, अभि-लष्यते वा। हि यस्मात् सुमानुपस्य भद्रमेकं प्रार्थ्यते तस्मात् सैव रणरणकदा-यिनीत्यादिपूर्वेणान्वयः। अनर्थदर्शीनि बन्धुमित्रहृदयानीति न्यायेनेति भावः। 'प्रम-सारे स्थितम्' इत्यनेन मधुच्छटाहानिक्षिप्तरसालफलसादृश्यं व्यज्यते। अत्र फलविप-र्यकौत्सुक्यप्रतिपादनादारम्भ उक्तः। तदुक्तम्—'औत्सुक्यमात्रमारम्भः फलला-भाय भूयसे' इति ॥ ३९ ॥ **कर्णे एवमिवेति**। 'अर्थस्त्वेकेन विज्ञेयः पश्चाज्ज्ञात्वा प्रसङ्गतः। कर्णे एवमिवेत्युक्त्वा काव्यबन्धे प्रयुज्यते ॥' इत्युक्तत्वात् ॥ **हा हेति**। परगृहवास एव दूषणम्, नान्यदिति भावः। आलर्कं श्वसंबन्धि प्रसक्तम्। पाठा-न्तरे 'प्रसृतम्' इति वा। एकत्र स्पर्शः, कालान्तरेण सर्वतः प्रसरणमिति भावः ॥ ४० ॥ मन्दभाग्योऽल्पभाग्यः। **सतामिति**। केनापि कार्येण। 'स्नेहं दयां च सौख्यं च यदि वा जानकीमपि' (१।१२) इत्युक्तरीत्या लोकस्याराधनं लोकस्य प्रीतिजनकव्यापारः। सतां धर्मशास्त्रस्मृत्यादीनां परं धर्मः श्रेष्ठत्वेनाभिमतः। तथा चापस्तम्बः—'यत्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः' इति। न चेदमन-नुष्ठानपराहतमित्याह—**तत्प्रतीतमिति**। 'अवश्यं पितुराचारः' इति स्मरणार्थ-मिदम्। मां च मुञ्चतमनन्यपरित्यागानुपपत्तिः तातस्य स्वप्राणत्याग इत्याह—**प्राणांश्चेति**। मुञ्चतेति हेतौ शतृ। प्राणत्यागहेतुकं पूरणमित्यर्थः ॥ ४१ ॥

पाठा०—१ 'तीमसंवेगो'. २ 'प्रसृतम्'. ३ 'पापूरितं'.

संप्रस्थेन च भगवता वसिष्ठेन संदिष्टम् । अपि च,—

यत्सावित्रैर्दीपितं भूमिपालै-
र्लोकश्रेष्ठैः साधु चित्रं चरित्रम् ।
मत्संबन्धात्कश्मला किंवदन्ती
स्याच्चेदस्मिन्हन्त धिङ्मामधन्यम् ॥ ४२ ॥

हा देवि देवयजनसंभवे! हा स्वजन्मानुग्रहपवित्रितवसुंधरे! हा मुनिजनकनन्दिनि! हा पावकवसिष्ठारुन्धतीप्रशस्तशीलशालिनि! हा राममयजीविते! हा महारण्यवासप्रियसखि! हा तातप्रिये! हा स्तोकवादिनि! कथमेवंविधायास्तवायमीदृशः परिणामः?

त्वया जगन्ति पुण्यानि त्वय्यपुण्या जनोक्तयः ।
नाथवन्तस्त्वया लोकास्त्वमनाथा विपत्स्यसे ॥ ४३ ॥

संप्रस्थेन संदिष्टमिति । 'युक्तः प्रजानामनुरञ्जनेऽस्याः' इति संदिष्टमिति भावः । **यदिति** । सावित्रैः सवितुः पुत्रैः । 'तस्यापत्यम्' (पा ४।१।९२) इत्यण्प्रत्ययः । अनेनाभिजनः उक्तः । 'भूमिपालैः' इत्यनेन क्षत्रधर्मभूतभूमिपालनात्मकवृत्तमुक्तम् । परिशेषाल्लोकश्रेष्ठैरित्यनेन विद्योक्ता । एवमस्मिन्ननिशास्ते सर्वाभ्यर्हमनुप्रभृतिराजसिद्दीपितं प्रकाशितं स्वयमनुष्ठितमनुष्ठापितं च चित्रमाश्चर्यभूतम् । कश्मला हेया । किंवदन्ती लोकवादः ॥ ४२ ॥ स्वतो निर्दोषेत्याह—**हा देवि!** । उत्पत्तिवशाद्दोषोऽपि नास्तीत्याह—**देवयजनसंभवे!** । स्वोत्पत्तिभूमेरपि शुद्धिजननीत्याह—**स्वजन्मेति** । संपर्कवशाद्दोषोऽपि नास्तीत्याह—**मुनिजनकेति** । 'नन्दिनी' इत्यनेन औरसकन्यापेक्षयाभिमतेति व्यज्यते । गुरुदेवताभिमतेत्याह—**पावकवसिष्ठेति** । शीलेन वृत्तेन शाघ्यते श्लाघ्यत इति शीलशालिनी । 'शाडृ श्लाघायाम्' इत्यस्माद्धातुकर्तृकर्मणि णिनिः । डलयोरेकत्वम् । तद्विवृणोति—**राममयेति** । अनेन रावणस्मरणमपि । दूरोत्सारितमिति व्यज्यते । रामस्य रावणस्मरणगन्धासहत्वाच्चिदमनुमेयम् । किं त्वनुष्ठानेन प्रकटितमित्याह—**महारण्येति** । प्रियत्वविशेषणम् । अनेन निर्बन्धलोकवादादिव्यावृत्तिः । 'सखी' इत्यनेन दण्डकारण्यगमने पत्नीत्वप्रयुक्तप्राधान्यं नाङ्गीकृतम् । किं तु पुरुषमिहरामसमप्रधानत्वमेवेति । 'समानं ख्यायत इति सखा' इति व्युत्पत्तेरुपलक्षणमिदं रामापेक्षया प्राधान्यस्यापि । 'अग्रतस्ते गमिष्यामि मृद्नन्ती कुशकण्टकान्' (अयोध्या २७।७) इत्युक्तत्वात् । तातस्य प्रिये अभिमते । 'वधूचतुष्केऽपि' (४।१६) इत्यादिवक्ष्यमाणरीत्येति भावः । स्तोकं मितं वदन्तीत्यर्थः । 'सत्याय मितभाषिणाम्' (रघुवंश १।७) इत्युक्तरीत्या निमित्तलेशाभावेऽपि कथमयं परिणाम इति भावः । **त्वयेति** । त्वया जगन्ति पुण्यानि पुण्यवन्ति । मत्वर्थीयाः प्रत्ययः । 'पापानां वा शुभानां वा

पाठा०—१ 'शुद्ध'. २ 'निमि'.

(दुर्मुखं प्रति ।) दुर्मुख ! ब्रूहि लक्ष्मण–एष नूतनो राजा रामः समाज्ञापयति । (कर्णे) एवमेवम् । इति ।

दुर्मुखः—हा ! कहं अग्गिपरिसुद्धाए गब्भट्ठिदपवित्तसंताणाए देवीए दुज्जणवअणादो एदं ववसिदं देवेण ? [हा ! कथमग्निपरिशुद्धाया गर्भस्थितपवित्रसंतानाया देव्या दुर्जनवचनादिदं व्यवसितं देवेन ?]

रामः—शान्तं पापम्, शान्तं पापम् । दुर्जना नाम पौरजानपदाः ।

इक्ष्वाकुवंशोऽभिमतः प्रजानां
जातं च दैवाद्वचनीयबीजम् ।
यच्चाद्भुतं कर्म विशुद्धिकाले
प्रत्येतु कस्तद्यदि दूरवृत्तम् ॥ ४४ ॥

यथार्हाणां ह्यवक्रम । । कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥' इति त्वन्मतानुसारेण पापपुण्ययोरनुग्रहतौल्यादिति भावः । जनानामुपजीव्यविरोध इत्याह—त्वय्यपुण्या जनोक्तयः । अत्र 'त्वया जगन्ति पुण्यानि'इति भुवनानां पुण्यत्वमुक्त्वा 'जनोक्तय' इति 'जन'शब्दोपादानान्नैवं लोकान्तरस्थानामुपजीव्यविरोध इति व्यज्यते; 'उक्ति'पदेन वस्तुस्थितिस्वभावाद्विपर्ययप्रमावाच्च । इत्थं मनसा संभावनमपि नोचितम् । सुतरां बहिस्तदुक्तिः सापि जातेति व्यज्यते । जनानामुक्तयं इति विग्रहाद्यः कश्चिदित्थं प्रलपतीत्यपि न किंतु बहुजना एवं वदन्तीति व्यज्यते । षष्ठीबहुवचनेन विग्रहे प्रमाणं तु–रे रे पौरजानपदाः ! 'न खलु भवतां देव्याः स्थानं गृहेऽभिमतं ततः' (३।३२) इत्यादिवक्ष्यमाणरामवचनम् । तेऽपि कदाचिदित्युक्त्वा विरमन्तीत्यपि न बहुकृत्वो वदन्तीति बहुवचनार्थः । 'अपुण्या' इति व्यतिरेकोक्त्या कश्चिदपि कदाचिदपि न यथार्थं प्रत्येति, नापि वर्णयति व्यज्यते । **नाथवन्त इति** । अहं लोकानामधीशः, मम त्वं नाथा । तथा च–'यस्यैते तस्य तद्धनम्' इति न्यायेन लोकानामपि त्वमेव नाथिनेत्याशयः । यद्वा,–त्वं मय्यनन्यतयावस्थिता, अहं च त्वयि तथावस्थितः । आह च हनूमान्—'अस्या देव्या मनस्तस्मिंस्तस्य चास्यां प्रतिष्ठितम् । तेनेयं स च धर्मात्मा मुहूर्तमपि जीवति ॥' इति । तथा च लौकिकैर्मयि प्रतिपद्यमानं लोकनाथत्वं त्वदीयमित्यर्थं इत्याद्यूहनीयम् । **त्वमना-थेति** । त्वन्नाथतामात्रे मम लोकनाथत्वे प्रयोजनम्, अहं तु त्वदर्थे व्यर्थ इति भावः । विपत्स्यसे विपदा भविष्यसि । पूर्ववियोगोऽपि रावणपर्येषितत्वादसत्कल्प इति न तस्मिंस्त्वं विपन्ना, अस्य तु वियोगस्य 'सौमित्रेरपि पत्रिणामविषये तत्र प्रिये क्वासि मे' (३।४५) इति वक्ष्यमाणरीत्या पूर्वोपायाविषयत्वात् इतः परमेव विपन्ना भविष्यसीति त्वया व्यज्यते । पूर्वार्धे विभावनाविशेषोऽलंकारः; 'विरुद्धात्कार्यसंपत्तिर्दृष्टा काचिद्विभावना' इति लक्षणात् ॥ ४३ ॥ **इक्ष्वाकुवंश इति** । विशुद्धिकाले

पाठा०–१ 'तथ्यनिरुर'

सङ्गच्छ ।

दुर्मुखः—हा देवि ! (इति निष्क्रान्तः ।)

रामः—हा कष्टम्, अतिबीभत्सकर्मा नृशंसोऽस्मि संवृत्तः ।

शैशवात्प्रभृति पोषितां प्रियां
सौहृदादपृथगाश्रयामिमाम् ।
छद्मना परिददामि मृत्यवे
सौनिके गृहशकुन्तिकामिव ॥ ४५ ॥

तत्किमस्पृश्यः पातकी देवीं दूषयामि । (इति सीताया शिरः समुन्नमय्य बाहुमाकृष्य ।)

अपूर्वकर्मचण्डालमयि मुग्धे ! विमुञ्च माम् ।
श्रितासि चन्दनभ्रान्त्या दुर्विपाकं विषद्रुमम् ॥४६॥

यदद्भुतं कर्म तद्यदि तदस्तीति यद्युच्यते तद्दूरवृत्तं च. प्रत्येति ! न कोऽपीत्यर्थः ॥ ४४ ॥ हा कष्टमिति । नृशंसः क्रूरः । अतिबीभत्सकर्मेति प्रसिद्धनृशंसाद्याकृतिः । **शैशवादिति** । शैशवात्प्रभृति पोषितां बाल्यमारभ्य वर्धिताम् । अनेन 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इति न्यायः स्फोर्यते । ननु स्वाप्रियत्वे त्याज्यत्वमित्यत आह—**प्रियामिति** । ननु तथापि दोषप्रसक्तौ का गतिरित्यत आह—**अपृथगाश्रयामिति** । पृथगाश्रयरहितामित्यर्थः । ननु तथापि मनोवृत्तिरन्यत्रेत्यत आह—**सौहृदादिति** । इमामितीदंपदेन तत्तात्कालिकान्तर्वर्तीत्वनिद्रावश्यत्वादिकं परामृश्यते । छद्मना व्याजेन । सीताभिलषितवनप्रस्थापनव्याजेनेत्यर्थः । मृत्यवे परिददामि । देयतावस्थापादानसामान्यम् । तदिमाम् । गर्भस्थशिशुद्वयं चेत्यर्थः । सौनिके जीवहिंसाजीविनि । 'कर्मणा यमभिप्रैति स संप्रदानम्' (पा.१।४।३२) इति चतुर्थ्यर्थे सप्तमी । प्रथमान्तपाठोऽप्यस्ति । गृहशकुन्तिकामित्यत्र 'अनुकम्पायाम्' (पा.५।३।७६) इति कन् ॥ ४५ ॥ **अपूर्वेति** । अत्र 'मुग्धे विमुञ्च माम्' इति सिद्धसाध्यसमभिव्याहारन्यायेन अद्यतनमोचनप्रसञ्जकत्वतीत्यर्थो लभ्यते । मौग्ध्यस्य मोचनप्रसञ्जकत्वं च तदापादकसंपर्कोपादनद्वारा । स च सम्बन्धो रावणप्रत्याख्यानपूर्वको लङ्कादेशीय एव । तथा हि—भवितव्य परगृहवासो जातः, तथापि नैतावता ममात्याहितं प्रसजति । रावणो न मां बलात्कर्तुमर्हति । ततश्च तदभिमततत्संपादनेनैव कालयापनं सुकरम् । प्रत्याशया च स मां न हनिष्यति । रामस्तु इदानीं मां निर्दोषां परीक्ष्यानुमन्यमानोऽपि कदाचित्तत्स्वचिद्वचनमनुसरन् लोकाराधनश्रद्धया मामरण्ये परित्यजेत् इत्यादिको विचारः सीतायां स्यात् । तदा नैवंविधदुःखानुभवप्रसक्तिरिति तदिदं मौग्ध्यस्याद्यतनविप-

---

पाठा०—१ 'प्रियं.'. २ 'पृथगाश्रयां प्रियाम्'. ३ 'सौनिको'. ४ अस्पर्शनीयः'.

(उत्थाय ।) हन्त हन्त, संप्रति विपर्यस्तो जीवलोकः । अद्यावसितं जीवितप्रयोजनं रामस्य । शून्यमधुना जीर्णारण्यं जगत् । असारः संसारः । काष्ठप्रायं शरीरम् । अशरणोऽस्मि । किं करोमि? का गतिः? अथवा,—

प्रयोजकत्वमित्याशयः । सर्वमिदं निर्वेदातिशयद्योतकम् । अपूर्वश्चासौ कर्मचण्डालश्चेति विग्रहः । चण्डालो हि क्रूरतमः, कर्मचण्डालस्तु सुतराम् । यस्तत्रापूर्वो विलक्षणः अहं कर्मचण्डालो रावणादपि क्रूर इति भावः । स हि रावणो न सीतायाः प्राणहानिकरोऽभवत् । अहं तु तत्कारी भवामीति पूर्वोक्तमौढ्यहेतुकारमसंश्रयणमेवाह–**श्रिताऽसी**ति । द्रुमत्वोक्तिर्भूयस्त्वाभिप्रायात् । दुर्विपाकत्ववचनमत्यन्तक्रौर्यातिशयप्रतिपत्त्यर्थम् । 'चन्दनभ्रान्त्या' इत्येतद्दुःखभूयस्त्वावर्जनीयत्वख्यापनार्थम् । अन्यभ्रान्तौ प्रवृत्तिमान्द्यादिकं स्यात् । असीत्यनेनाद्यापि न मुञ्चसीत्यपि व्यज्यते । श्रितेति कर्तृवाचकनिष्ठान्तम् । तेन श्रयणस्य लङ्कादेशीयत्वलाभः । अयमाशयः—लोके हि फलवज्जातीयानामपि वृक्षाणामफलत्वे छेद एवोचितः । अनर्थावहत्वे तु सुतराम् । विषवृक्षस्य तु छेदे का प्रतिहतिः? तस्यापि दुर्विपाकत्वे सर्वथा छेद्यत्वमेव । तथापि 'विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इति न्यायेन यदि छेदप्रतिषेधः, तर्हि तस्य परित्यागे का प्रतिहतिः? अत्र क्रूररामकर्मकसंश्रयणप्रतिबिम्बस्य सीताप्रस्तुतकर्तृकदुर्विपाकविषद्रुमाश्रयणस्य वर्णनाल्ललितालंकारः । *'प्रस्तुते वर्ण्यवाक्यार्थप्रतिबिम्बस्य वर्णनम् । ललितम्'* इति लक्षणात् ॥ ४६ ॥ हन्तेति दुःखे । संप्रति सीताविरहे । विपर्यस्तोऽन्यथाभूतः । साहित्ये *'यस्त्वया सह स स्वर्गो निरयो यस्त्वया विना'* इति रामायणोक्तरीत्या जीवलोकस्य स्वर्गत्वम् । वियोगे तु नरकत्वमेवेति । स्वर्गान्यस्य नरकस्यैव स्वारसिकत्वात्प्राणिनां नरकप्राप्तावपि नात्मवस्तुनाशः । मम तु सीतामयजीवितत्वात्तन्नाशे जीवितनाश इति । अद्यावसितमिति समाप्तं जीवितमेव प्रयोजनम् । जीवितमिति वक्ष्यमाणमिहानुसंधेयम् । सीताविरहितजीवितं निष्प्रयोजनमित्यर्थः । यत एवं ततोऽधुना जीर्णारण्यं जगत् । स्वर्गादिकं ह्यात्मनः स्थिरत्वे कालान्तरानुभाव्यं स्यात् । 'अनादौ संसारे' इति न्यायात् । आत्मवस्तुनाशे तु स्वानुपभोगात् जीर्णारण्यत्वम् । सीतासाहित्ये हि अरण्यस्यापि पञ्चवट्याः 'यस्यां ते दिवसाः' इति रीत्या स्वगृहत्वात् तदयोगे तु स्वगृहस्यापि जीर्णारण्यत्वमित्याशयः । असारः शून्यः । काष्ठप्रायं शरीरम् । 'ज्योत्स्नेव हिमदीधितेः' इत्युक्त्या यथा चन्द्रस्य कौमुदीभावे काष्ठप्रायता तद्वत्स्वस्येति भावः । अथ पूर्ववत् 'सुग्रीवं शरणं गतः', 'सागरं शरणं गतः' इत्यादिकस्य नावकाश इत्याह–**अशरणोऽस्मी**ति । पूर्ववत्सेतुबन्धनादि कर्तव्यं नास्तीत्याह—**किं करोमी**ति । अथ पूर्ववद्रावणवधादिरूपं प्राप्यं नास्तीत्याह—**का गति**रिति । गम्यत इति गतिः । यतश्चैवं ततः क्व गच्छामि, किमरण्यं गच्छामि, उत पातालविवरम्? *किंवा मरणं गच्छामि? इति विकल्पाशयः ।* न मूकः पक्षः सर्वोऽपि न कल्पत इत्याह–**अथ वे**ति । पूर्वोक्तदोषकः ।

दुःखसंवेदनायैव रामे चैतन्यमागतम् ।
मर्मोपघातिभिः प्राणैर्वज्रकीलायितं हृदि ॥ ४७ ॥

हा अम्ब अरुन्धति ! भगवन्तौ वसिष्ठविश्वामित्रौ ! भगवन् पावक ! हा देवि भूतधात्रि ! हा तात जनक ! हा मातः ! हा प्रियसख महाराज सुग्रीव ! सौम्य हनूमन् ! महोपकारिन् लङ्काधिपते विभीषण ! हा सखि त्रिजटे ! परिमुषिताः स्थ परिभूताः स्थ रामहतकेन । अथवा को नाम तेषामहमिदानीमाह्वाने ?

ते हि मन्ये महात्मानः कृतघ्नेन दुरात्मना ।
मया गृहीतनामानः स्पृश्यन्त इव पाप्मना ॥ ४८ ॥

योऽहम्,—

विस्रम्भादुरसि निपत्य जातनिद्रा-
मुन्मुच्य प्रियगृहिणीं गृहस्य लक्ष्मीम् ।

दुःखेति । चैतन्यमात्मा शक्तिर्वा । दुःखसंवेदनायैव रामे आगतम् । आगतमित्यनेन दुर्मुखवाक्यश्रवणानन्तरं गतं चैतन्यं पुनरागतमिति व्यज्यते । यद्वा,—शक्तिप्रहारादिषु गतं पुनरागतमिति वा । पट्टाभिषेकादिनान्तरीयकसुखं तु असत्कल्पमिति हृदयम् । 'अर्पितम्' 'आहितम्', इति पाठयोस्तु आदितः प्रभृति 'राज्याद्भ्रंशो वने वासः सीता नष्टा द्विजो हतः । ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम् ॥' इत्युक्तरीत्या दुःखानुभवायैव चैतन्यसद्भाव इति भावः । सर्गिणां चैतन्यं दुःखासंभिन्नसुखानुभवाय । जनानां दुःखामिश्रसुखानुभवाय । मम सुखासंभिन्नदुःखानुभवाय । तस्मात्पातालविवरगमनेऽप्यपरिहार्यं दुःखमिति भावः । तर्हि मरणं गमिष्यामीति कृपः कल्प्यतामित्याह—**मर्मोपघातिभिरिति** । मर्म हृदयादिप्रदेशानुपघ्नन्तीति विग्रहः । 'सुप्यजातौ—' (पा ३।२।७८) इति णिनिः । न केवलं दुःखानुभवापादकाः किं तु स्वयमपि दुःखप्रदा इति भावः । वज्रकीलवद्दुरुद्धरतया स्थिरीभूयते । भङ्गानर्हत्वेन वा सादृश्यम् । तथा च मरणमपि दुर्लभमित्यर्थः ॥ ४७ ॥ हेति । अरुन्धति ! अरुन्धतीकृतसीतापातिव्रत्यानुमोदनं न प्रमाणीकृतमिति भावः । **भगवन्ताविति** । भवतां ज्ञानशक्तिमपि खला न पश्यन्तीति भावः । **पावकेति** । तव वचनप्रवेशौ व्यर्थाविति भावः । भूतधात्रि ! त्वत्सुतायामनिमित्तदोषवादिनो जनान् कथं बिभर्षीति भावः । **सौम्येति** । सीतावृत्तान्तकथनजनितानन्दप्रयुक्तमत्कृतालिङ्गनमङ्गिलाशरीरसौभगभवदीयप्रयासो व्यर्थ इति भावः । परिमुषिता मुषितद्रव्यकाः । ते हीति । कृतमुपकारं हन्तीति कृतघ्नः । एतत्कृतपूर्वोपकारविस्मरणादिति भावः ॥ ४८ ॥ **विस्रम्भादिति** । विस्रम्भादन्तरङ्गत इति

पाठा०—१ 'आहितम्'.

आतङ्कस्फुरितकठोरगर्भगुर्वीं
क्रव्याद्भ्यो बलिमिव दारुणः क्षिपामि ॥ ४९ ॥

(सीतायाः पादौ शिरसि कृत्वा ।) अयं पश्चिमस्ते रामशिरसि पादपङ्कजस्पर्शः ।

(इति रोदिति ।)

(नेपथ्ये ।)

अब्रह्मण्यमब्रह्मण्यम् ।

रामः—ज्ञायतां भोः, किमेतत् ? ।

(पुनर्नेपथ्ये ।)

ऋषीणामुग्रतपसां यमुनातीरवासिनाम् ।
लवणत्रासितः स्तोमस्त्रातारं त्वामुपस्थितः ॥ ५० ॥

रामः—कथमद्यापि राक्षसत्रासः ? तद्यावदस्य दुरात्मनो माधुरस्य कुम्भीनसीकुमारस्योन्मूलनाय शत्रुघ्नं प्रेषयामि । (परिक्रम्य पुनर्निवृत्य ।) हा देवि ! कथमेवंविधा गमिष्यसि ? भगवति वसुंधरे ! सुश्लाघ्यां दुहितरमवेक्षस्व जानकीम् ।

जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥ ५१ ॥

(इति रुदन्निष्क्रान्तः ।)

ज्ञानादिति भावः । गृहस्य लक्ष्मीं शोभां तदलंकारभूताम् । कठोरगर्भः पूर्णगर्भः । गुर्वीमित्यनेन यमलत्वं सूचयति । क्रव्याद्भ्यो मांसभक्षकेभ्यः । क्रव्यं मांसमदन्ति खादन्तीति विग्रहः । 'क्रव्ये च' (पा.३।२।६९) इति विट् ॥४९॥ अब्रह्मण्यं ब्राह्मणानामत्याहितम् । 'अब्रह्मण्यमवध्योक्तौ' इत्यमरः ॥ ऋषीणामिति । लवणो नाम राक्षसस्तेन त्रासितो ऋषीणां स्तोम इत्यन्वयः ॥ ५० ॥ कथमित्यादि । निःशेषितराक्षसकुलत्वात्सम्भ्रमेति भावः । यद्वा,–कथमद्य राक्षसत्रासोऽपीत्यन्वयः । न केवलं सीताविश्लेषदुःखप्राप्तिः, किं तु राक्षसभयं चेति समुच्चयार्थः । कथमिति विस्मये । पूर्ववदेतोभयं मिलितमिदमाश्चर्यमिति भावः । दुरात्मनो दुर्बुद्धेः । माधुरस्य मधुरेश्वरस्य । कुम्भीनसी नाम तन्माता । उन्मूलनाय मूलेन महोत्पाटनायेति यावत् । प्रेषयामि प्रेषयिष्यामि । 'यावत्पुरानिपातयोर्लट्' (पा.३।३।४) । एवंविधा मया वञ्चिता गर्भिणी सती कथं गमिष्यसीति भावः । भगवति वसुंधरे ! सुश्लाघ्यां निर्दोषां नितरामश्लाघ्यां वा । जनकानामिति । यत्कृत्स्नं गोत्रमङ्गलम् । यदिति विधेयापेक्षया क्लीबम् । अजीजनः । उत्पादितवत्यसीत्यर्थः ।

पाठा०—१ 'तां'. २ 'रसतल'.

सीता—हा सोम्ह अज्जउत्त! कहिं सि? (इति सहसोत्थाय।) हद्धी हद्धी, दुस्सिविणरणरणअविप्पलद्धा अज्जउत्तसुण्णं विअ अत्ताणं पेक्खामि। (विलोक्य।) हद्धी हद्धी, एआइणिं पसुत्तं मं उज्झिअ कहिं गदो णाहो? होदु, से कुप्पिस्सं जइ तं पेक्खंती अत्तणो पहविस्सं। को एत्थ परिअणो?। [हा सौम्य आर्यपुत्र! कुत्रासि? हा धिक् हा धिक्, दुःस्वप्नरणरणकविप्रलब्धा आर्यपुत्रशून्यमिवात्मानं पश्यामि। हा धिक् हा धिक्, एकाकिनीं प्रसुप्तां मामुज्झित्वा कुत्र गतो नाथः? भवतु, तस्मै कोपिष्यामि यदि तं प्रेक्षमाणा आत्मनः प्रभविष्यामि। कोऽत्र परिजनः?]

(प्रविश्य।)

दुर्मुखः—देवि! कुमारलक्खणो विण्णवेदि—'सज्जो रहो। तं आरुहदु देवी' त्ति। [देवि! कुमारलक्ष्मणो विज्ञापयति—'सज्जो रथः। तदारोहतु देवी' इति।]

सीता—इअं आरूढम्हि। (उत्थाय परिक्रम्य।) फुरइ मे गब्भभारो। सणिअं गच्छम्ह। [इयमारूढास्मि। स्फुरति मे गर्भभारः। शनैर्गच्छामः।]

दुर्मुखः—इदो इदो देवी। [इत इतो देवी।]

सीता—णमो रहुउलदेवदाणं। [नमो रघुकुलदेवताभ्याम्।]

(इति निष्क्रान्ताः सर्वे।)

इति महाकविश्रीभवभूतिविरचित उत्तररामचरिते प्रथमोऽङ्कः।

अत्र बिन्दुर्नाम संध्यङ्गमुक्तम्। दाम्पत्यविशेषविच्छेदहेतुत्वात्पुनरुच्छेदकारणत्वाच्च। तदुक्तम्—'अवान्तरार्थविच्छेदे बिन्दुरच्छेदकारणम्' इति ॥ ५१ ॥ कोऽत्र परिजनः? परिजनस्य मध्ये कोऽत्र संनिहित इत्यर्थः। परिजनस्येति निर्धारणे षष्ठेकवचनान्तम्। निर्धारणे षष्ठीप्रयोगोऽप्यस्ति ॥ रथो गमनाय संनद्धः ॥ रघुकुलदेवते लक्ष्मीनारायणाविति प्रसिद्धमेव। तन्नमस्कारो यात्राकाले विहितः। 'आदित्यमण्डले विष्णुं ध्यात्वा यात्रां प्रवर्तयेत्' इति स्मरणात् ॥

दाशरथिर्नृपजनुषो भूयाज्जवीरराघवार्यस्य।
उत्तररामचरित्रव्याख्याह्लादितः प्रायात् ॥

इति श्रीवाधूलवीरराघवविरचितायां भवभूतिभावतलस्पर्शिनीसमाख्यायामुत्तररामचरितव्याख्यायां प्रथमोऽङ्कः।

पाठा०-१ 'आरूढम्हि', २ अस्याग्रे 'णमो अज्जउत्तचरणकमलाणं सअलगुरुअणाणं'.

द्वितीयाङ्कस्य कथावस्तु।

आत्रेयी-वासन्तीप्रवेशेऽङ्कद्वयसमयान्तर्गतमितिवृत्तं विष्कम्भकेऽत्र यथा–रामचन्द्रानुज्ञया लक्ष्मणेनारण्ये त्यक्ता जानकी लव-कुशनामकं यमजं सुतद्वयमजीजनत्। तौ लव-कुशौ तत्रभगवता वाल्मीकिमहर्षिणा स्वाश्रमे धात्रीकर्मतः परिगृह्य पोषितौ रक्षितौ च। निर्वृत्तचौलकर्मणोस्तयोस्तिस्रो विद्याश्चतुःषष्टिकलाश्च सम्यङ्निष्पादिताः। रघुनन्दनेन च सीतायाः सुवर्णमयीं प्रतिमां पत्नीत्वेन न्यस्य महाश्वमेधः प्रारब्धः। मेध्याश्वं विसृज्य तद्रक्षणार्थं लक्ष्मणात्मजं चन्द्रकेतुमन्यांश्च योधांस्तत्पार्श्वतः प्राहिणोत्। अथ च ब्राह्मणेन युवानं पुत्रं मृतमुत्क्षिप्य सोऽपचार उद्घोषितः। तदा तपस्यनधिकारी शम्बूकनामको हि शूद्रस्तपश्चरतीति सहसैवाशरीरिणी वागुदचरत्। तदुपश्रुत्य कृपाणपाणी रामः सत्वरं पुष्पकमारुह्य तदन्वेषणाय संचारः समारब्धवान्। दण्डकायां तपश्चरन्तं दण्ड्यं तं समासाद्य तच्छिरश्चिच्छेद। तत्रत्यस्थानावलोकनेन स्मारितपूर्वेतिवृत्तं जानकीसमागमं खेदखेदादि समनुभवन् रामो महारण्यानि विचचार। तदनन्तरं रामागमने प्रतीक्षमाणं महामुनिमगस्त्यं द्रष्टुं रामचन्द्रो जगाम॥

द्वितीयोऽङ्कः।

(नेपथ्ये।)

स्वागतं तपोधनायाः।

(ततः प्रविशत्यध्वगवेषा तापसी।)

तापसी—अये, वनदेवता[1] फलकुसुमगर्भेण पल्लवार्घ्येण दूरान्मामुपतिष्ठते।

(प्रविश्य।)

वनदेवता—(अर्घ्यं विकीर्य।)

यथेच्छाभोग्यं वो वनमिदमयं मे सुदिवसः
सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।
तरुच्छाया तोयं यदपि तपसां योग्यमशनं
फलं वा मूलं वा तदपि न पराधीनमिह वः॥ १॥

नेपथ्य इति। 'कुशीलवकुटुम्बस्य स्थली नेपथ्यमिष्यते' इत्युक्ततिरस्करिणीतिरोहितनर्तनभूमिकापरिग्रहौपयिकस्थानविशेष इत्यर्थः॥ वनदेवतेति। पल्लवार्घ्येण पल्लवयुक्तपूजाद्रव्येण दूरात् प्रविष्टा सती उपतिष्ठते पूजयति। देवतात्वारोपादात्मनेपदम्। 'दूरात्' इत्यपादाने पञ्चमी। यद्वा,-मामुपतिष्ठते संगता भवति। 'गङ्गा यमुनामुपतिष्ठते' इतिवत्, उभयत्रापि 'उपाद्देवपूजा-'(वा. ५१४) इत्यादिना तङ्॥ अर्घ्यं विकीर्य दत्त्वा। यथेच्छेति। इदम्। मदीयमित्यर्थः। वनं वनमेव न तु स्पृहणीयपुरप्रासादादिकमित्यपरितोषो व्यज्यते। तथापि 'अविद्यमानं कर्णोऽपि' इति न्यायेन यथाधिकारं सभाजयितव्यमेवेत्याह—यथेच्छाभोग्यं इच्छामनतिक्रम्य यथेच्छम्। यथेच्छं आभोग्यमिति विग्रहः। इच्छानिवृत्तिपर्यन्तमसंकोचेनोपभोगार्हमित्यर्थः। व. इति पूजायां बहुवचनम्। अतिथिसामान्याभिप्रायकं वा। अयं मे सुदिवसः साधुजनसंपर्कादिति भावः। सतां विद्यमानानामेव, नतु प्रसादनादि कुर्वतामित्यर्थः। सद्भिः साधुभिः सह सङ्गः संपर्कः कथमपि कृच्छ्रेण पुण्येन भवति साधुजनसंपर्कलाभः प्रणिपातादिसाध्यो भवति। तदभाववतां तु दृष्टहेत्वभावात् केवलादृष्टसाध्यो भवतीति भावः। यद्वा कथमपि सतां येन केन प्रकारेण वर्तमानानाम्। कामचारे स्थितानामित्यर्थः। सद्भिः ब्रह्मविद्भिरित्यर्थः। 'अस्ति ब्रह्मेति चेद्वेद सन्तमेनं ततो विदुः' इति श्रुतेः। सङ्गः संपर्कः पुण्येन हि भवति। अयमाशयः-'तस्मादेवंविदा नासीत' इति श्रुत्या ब्रह्मज्ञानवतां तच्छून्यैः सहवासादिकं प्रतिषिद्धम्। एवं च तेषां तैः सङ्गः पुण्यैकसाध्य इति। इदं च स्वनिकर्षभावनाकार्यम्। फलं वा मूलं वा इतोऽन्यदपि तपसां योग्यमशनम्। नीवारपाण्डुपत्र-

---

पाठा०-१ 'इय'. २ '°च्छं भोग्यं वो'. ३ 'तपसो'.

तापसी—किमत्रोच्यते ?

प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः
　प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरो वा पश्चाद्वा तदिदमविपर्यासितरसं
　रहस्यं साधूनामनुपधि विशुद्धं विजयते ॥ २ ॥

(उपविशतः ।)

वनदेवता—कां पुनरत्रभवतीमवगच्छामि ?

तापसी—आत्रेय्यस्मि ।

वनदेवता—आर्ये आत्रेयि ! कुतः पुनरिहागम्यते ? किंप्रयोजनो दण्डकारण्योपवनप्रचारः ?

आत्रेयी—

अस्मिन्नगस्त्यप्रमुखाः प्रदेशे
　भूयांस उद्गीथविदो वसन्ति ।
तेभ्योऽधिगन्तुं निगमान्तविद्यां
　वाल्मीकिपार्श्वादिह पर्यटामि ॥ ३ ॥

घातजलादिकमित्यर्थ । तदपि तत्र पराधीनं नेति ॥ १ ॥ प्रियेति । प्रियप्राया प्रियप्रचुरा युक्ता चेत्यर्थः । वृत्ति कायिकव्यापारः । तथापि वाक्पौर्ये महान्दोष इत्यत आह—विनयमधुरो वाचि नियम. विनयेन स्वनिकर्षभावनारूपेण स्वोत्कर्षानुसंधानरूपेण वा मधुरः प्रिय' वाचि नियमः सत्याय मितभाषित्वम् । तथापि मनोवृत्तिदौष्ठ्यं स्यादत आह—प्रकृत्या कल्याणी मति' प्रकृत्या स्वभावतः कल्याणी श्रेयस्विनी । तथाप्यसत्सङ्गवशाद्वैपरीत्यं स्यादत आह—अनवगीतः अनिन्दित इत्यर्थः । तदिदं वृत्तिवाचिनियमादिपरिचयसमुदायरूपं विजयते सर्वोत्कर्षेण वर्तते । तत्कथंभूतमित्याह–पुरो वा पश्चाद्वा भूतभविष्यत्कालयो. । तत्तत्पुरुषसंनिधानयोरिति वार्थ. । अविपर्यासितरस अन्यूनस्वभावम् । 'रस'पदेन प्रियत्वं व्यज्यते । अनुपधि निर्व्याजं विशुद्धं प्रमादादिदोषरहितं रहस्यम् । 'शीलं संवसता ज्ञेयम्' इति न्यायेन चिरकालशुश्रूषादिभिरेव ज्ञातुं शक्यं नतु दाम्भिकवृत्तिवत्सर्वं प्रकटमित्यर्थ. । तथाविधं तदिदं विजयत इति योजना ॥ २ ॥ अवगच्छामि जानामि ॥ **किंप्रयोजन** इति । प्रचारः सञ्चारः ॥ **अस्मिन्निति** । अगस्त्यप्रमुखा अगस्त्यप्रभृतयो भूयांसो बहव उद्गीथविदः । 'ओमित्युद्गीथमुपासीत' इति परस्मिन् ब्रह्मणि उद्गीथदृष्टिं कुर्वन्त इत्यर्थ. । दहरविद्यादीनामुपलक्षणम् । सकलवेदान्ततात्पर्यपर्यालोचनशीला इति

टिप्प०—१ अग विन्ध्यपर्वतं स्त्यायति स्तम्भयतीति अगस्त्यः, यथोक्त ब्रह्मपुराणे 'अगस्त्यो दक्षिणामाशामाश्रित्य नभसि स्थितः । वरुणस्यात्मजो योगी विन्ध्यवातापिमर्दनः ॥' इति ।

वनदेवता—यदा तावदन्येऽपि मुनयस्तमेव हि पुराणब्रह्मवादिनं प्राचेतसमृषिं ब्रह्मपारायणायोपासते, तत्कोऽयमार्यायाः प्रवासः ?

आत्रेयी—तस्मिन् हि महानध्ययनप्रत्यूह इत्येष दीर्घप्रवासोऽङ्गीकृतः ।

वनदेवता—कीदृशः ?

आत्रेयी—तस्य भगवतः केनापि देवताविशेषेण सर्वप्रकाराद्भुतं स्तन्यत्यागमात्रके वयसि वर्तमानं दारकद्वयमुपनीतम् । तत्खलु न केवलं तस्य, अपि तु तिरश्चामप्यन्तःकरणानि तत्त्वान्युपस्नेहयति ।

वनदेवता—अपि तयोर्नामसंज्ञानमस्ति ?

आत्रेयी—तयैव किल देवतया तयोः कुशलवाविति नामनी प्रभावश्चाख्यातः ।

वनदेवता—कीदृशः प्रभावः ?

आत्रेयी—तयोः किल सरहस्यानि जृम्भकास्त्राणि जन्मसिद्धानीति ।

वनदेवता—अहो नु भोश्चित्रमेतत् ।

आत्रेयी—तौ च भगवता वाल्मीकिना धात्रीकर्मतः परिगृह्य पोषितौ रक्षितौ च । निर्वृत्तचौलकर्मणोस्तयोस्त्रयीवर्जमितरास्तिस्रो विद्याः सावधानेन परिनिष्ठापिताः । तदनन्तरं गर्भैकादशे वर्षे क्षात्रेण

भाव । तेभ्य अधिगन्तुं तत्कृतव्याख्यानेन ज्ञातुम् । 'आख्यातोपयोगे' (पा. १।४।२९) इति पञ्चमी । पर्यटामि । 'अट गतौ' ॥३॥ **यदा तावदिति** । पुराणश्चासौ ब्रह्मवादी चेति विग्रहः । ब्रह्म परमात्मानं वेदान् वा वदतीति णिनि । पुराणत्वे प्राचेतसमिति हेतुकथनम् । ब्रह्मपारायणाय वेदान्तविद्याध्ययनाय । पारायण नाम आदित आरभ्यान्तादविच्छेदेनाध्ययनमुपासते । **तदिति** । प्रवासो देशान्तरगमनम् ॥ **तस्मिन्निति** । प्रत्यूहो विघ्न । **तस्येति** । स्तन्यत्यागमात्र यस्मिन्निति बहुव्रीहि कप्प्रत्यय । दारकद्वयं शिशुद्वयम् । **तदिति** । तस्य वाल्मीके तिरश्चामपि मृगाणामप्यन्त करणानि हृदयरूपाणि तत्त्वानि पदार्थानुपस्नेहयति सन्निधानीकरोति ॥ **अपीति** । नाम्नोऽभिज्ञापकशब्दस्य संज्ञान संकेतसंबन्धकरणम् ॥ **तयोरिति** । जन्मसिद्धानि जन्मना ज्ञातानि, न तूपदेशेन ॥ **तौ चेति** । धात्रीकर्मत उपमातृव्यापारेण । पोषितौ क्षीरादिना वर्धितौ रक्षितौ पिपीलिकादिभ्य इति भाव । **निर्वृत्तेति** । निर्वृत्त निष्पन्नम् । त्रयीवर्जं त्रयीं वर्जयित्वा, अत्रान्यपीति शेष । इतरा 'आयुर्वेदो धनुर्वेदस्तथा गान्धर्वनामक' इत्युक्ता इत्यर्थ । सावधानेन । वाल्मीकिनेति शेष । परिनिष्ठापिता सम्यङ्निष्पादिता । **तदनन्तरमिति** । एकादशाना पूरणः [illegible]

पाठा०—१ 'तत्र'. २ 'त्रयीणा'. ३ 'आ जन्म°'.

कल्पेनोपनीय गुरुणा त्रयीविद्यामध्यापितौ । न त्वेताभ्यामतिदीप्तप्रज्ञाभ्यामस्मदादेः सहाध्ययनयोगोऽस्ति । यतः,—

वितरति गुरुः प्राज्ञे विद्यां यथैव तथा जडे
न तु खलु तयोर्ज्ञाने शक्तिं करोत्यपहन्ति वा ।
भवति हि पुनर्भूयान्भेदः फलं प्रति तद्यथा
प्रभवति शुचिर्बिम्बग्राहे मणिर्न मृदादयः ॥ ४ ॥

वनदेवता—अयमध्ययनप्रत्यूहः ।

आत्रेयी—अन्यश्च ।

वनदेवता—अथापरः कः ?

आत्रेयी—अथ स ब्रह्मर्षिरेकदा माध्यंदिनसवनाय नदीं तमसामनुप्रपन्नः । तत्र युग्मचारिणोः क्रौञ्चयोरेकं व्याधेन वध्यमानं ददर्श । आकस्मिकप्रत्यवभासां देवीं वाचमानुष्टुभेन छन्दसा परिणतामभ्युदैरयत् ।

मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ ५ ॥

वनदेवता—आम्नायादन्यत्र नूतनच्छन्दसामवतारः ।

आत्रेयी—तेन हि पुनः समयेन तं भगवन्तमाविर्भूतशब्दप्रकाशमृषिमुपसंगम्य भगवान्भूतभावनः पद्मयोनिरवोचत्—'ऋषे ! प्रबुद्धोऽसि वागात्मनि ब्रह्मणि । तद्ब्रूहि रामचरितम् । अव्याहतज्योतिरार्षं ते चक्षुः प्रतिभातु । आद्यः कविरसि' इत्युक्त्वाऽन्तर्हितः । अथ स भगवान्प्राचेतसः प्रथमं मनुष्येषु शब्दब्रह्मणस्तादृशं विवर्तमितिहासं रामायणं प्रणिनाय ।

वनदेवता—हन्त, पण्डितः संसारः ।

आत्रेयी—तस्मादेव हि ब्रवीमि तत्र महानध्ययनप्रत्यूह इति ।

वनदेवता—युज्यते ।

आत्रेयी—विश्रान्तास्मि । भद्रे ! संप्रत्यगस्त्याश्रमस्य पन्थानं ब्रूहि ।

वनदेवता—इतः पञ्चवटीमनुप्रविश्य गम्यतामनेन गोदावरीतीरेण ।

आत्रेयी—(सास्रम् ।) अप्येतत्तपोवनम् ? अप्येषा पञ्चवटी ? अपि सरिदियं गोदावरी ? अप्ययं गिरिः प्रस्रवणः ? अपि जनस्थानवनदेवता त्वं वासन्ती ?

वनदेवता—तथैव तत्सर्वम् ।

आत्रेयी—हा वत्से जानकि !

स एष ते वल्लभशाखिवर्गः
प्रासङ्गिकीनां विषयः कथानाम् ।

माशब्देन अडागमसमर्थनं तु क्लिष्टम्, प्रतिष्ठां आस्पदम् । व्याधपक्षे,-सा गम न गच्छे । भगवत्पक्षे,-अगम प्राप्तवानिति । शमा संवत्सरान् । अत्यन्तसंयोगे द्वितीया ॥ ५ ॥ आम्नायात् वेदात् ॥ तेनेति । तेन समयेन कालेन । भूतेन प्रजा भावयति उत्पादयतीति विग्रह । यद्वा,-भूतं सत्यम्, निर्विरोधमिति वा । भावना अध्यवसाय यस्येति वा । पद्मयोनि भगवन्नाभिकमलजात । अनेन पूर्वोक्तभूतभावनत्वप्रयुक्तपरत्वशङ्का निराकृता । प्रबुद्धोऽसि प्रकृष्टज्ञानवानसि । वागेव आत्मा यस्य तस्मिन् ब्रह्मणि शब्दब्रह्मणि । वाचो वैपुल्याभिप्रायकं ब्रह्मत्वरूपणं ब्रह्मतत्त्वमेव शब्दरूपेण भातीत्यर्थ इति वैयाकरणमतानुसारेण वा । अव्याहतज्योति अप्रतिहतप्रकाशं आर्षं ऋषिसंबन्धि योगजन्यज्ञानं चक्षु नेत्रं ज्ञानमिति फलितोऽर्थः । 'तत्सर्वं मत्प्रसादेन विदितं ते भविष्यति' इत्यादि रामायणे द्रष्टव्यम् । 'आद्य. कविरसि' इत्युक्त्वा अनुगृह्य । अन्तर्हित परोक्षता गत. ॥ स इति । दृश्यमान दृष्टि-

पाठ०-१ 'प्रतिभाचक्षु.'. २ 'मण्डित.'.

त्वां नामशेषामपि दृश्यमानः
प्रत्यक्षदृष्टामिव नः करोति ॥ ६ ॥

वासन्ती—(सभयम्। सावेगम्।) कथं नामशेषेत्याह। (सबाष्पम्।) आर्ये! किमत्याहितं सीतादेव्याः?

आत्रेयी—न केवलमत्याहितम्, सापवादमपि। (कर्णे।) एवमिति।

वासन्ती—हा, दारुणो दैवनिर्घातः। (इति मूर्च्छति।)

आत्रेयी—भद्रे! समाश्वसिहि समाश्वसिहि।

वासन्ती—हा, प्रियसखि! ईदृशस्ते निर्माणभागः। हा रामभद्र! अथवा अलं त्वया। आर्ये आत्रेयि! अथ तस्मादरण्यात्परित्यज्य निवृत्ते लक्ष्मणे सीतायाः किं वृत्तमिति काचिदस्ति प्रवृत्तिः?

आत्रेयी—नहि नहि।

वासन्ती—कष्टम्। आर्यारुन्धतीवसिष्ठाधिष्ठितेषु नः कुलेषु जीवन्तीषु च वृद्धासु राज्ञीषु कथमिदं जातम्?

आत्रेयी—ऋष्यशृङ्गसत्रे गुरुजनस्तदासीत्। संप्रति परिसमाप्तं द्वादशवार्षिकं सत्रम्। ऋष्यशृङ्गेण च संपूज्य विसर्जिता गुरवः। ततो भगवत्यरुन्धती नाहं वधूविरहितामयोध्यां गच्छामीत्याह। तदेव राममातृभिरनुमोदितम्। तदनुरोधाद्भगवतो वसिष्ठस्यापि श्रद्धा वाल्मीकितपोवनं गत्वा वत्स्याम इति।

वासन्ती—अथ स रामभद्रः किमाचारः?

आत्रेयी—तेन राज्ञा राजक्रतुरश्वमेधः प्रक्रान्तः।

विषयीभूतः। प्रावृट्कालीनं प्रत्यक्षवदनुभूततया ज्ञाताना कथानां प्रत्यक्षवचनरूपाणां प्रकरणसंदर्भाणां विषयः प्रतिपादः पदशायिनां स्वयं वर्णितत्वात् अत्यन्तविदेहमयानां वृत्तान्तं ... इति वचनं सीतायाः स्मरणानुकूलमित्यर्थः ॥६॥ दैवनिर्घातः दैववज्रपातः। दारुणः दीनः। हा, प्रियसखीति। निर्माणभागः सृष्टिरूपम्। अथवेति त्वया विधानस्य दुःखमस्तीति भावः। किं वृत्तमिति किमवस्थितिः। प्रवृत्तिः वार्ता। आसीत् अभवत्। किमिति कथा दोषमेतत् ॥ संप्रति परिसमाप्तमिति। इत्येव विशेषात् पूर्वोक्ताद्धनादिति न विलम्बनम्। वधूविरहितां वधूविरहिताम्। तदन्विति। तदनुरोधात् तदनुसरणात्। श्रद्धा निश्चयः। अथेति। किमाचारः कीदृशाचारवान्? तेनेति। राजक्रतुः राज्ञां

पाठा०—1 'ऋषि'.

वासन्ती—अहह धिक्, परिणीतमपि ?

आत्रेयी—शान्तम्, नहि नहि ।

वासन्ती—का तर्हि यज्ञे सहधर्मचारिणी ?

आत्रेयी—हिरण्मयी सीताप्रतिकृतिर्गृहिणीकृता ।

वासन्ती—हन्त भोः,

वज्रादपि कठोराणि मृदूनि कुसुमादपि ।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति ? ॥ ७ ॥

आत्रेयी—वसिष्ठश्च वामदेवानुमन्त्रितो मेध्याश्वः । प्रक्लृप्ताश्च तस्य यथाशास्त्रं रक्षितारः । तेषामधिष्ठाता लक्ष्मणात्मजश्चन्द्रकेतुर्दत्तदिव्यास्त्रसंप्रदायश्चतुरङ्गसाधनान्वितोऽनुप्रहितः ।

वासन्ती—(सहर्षकौतुकास्रम् ।) कुमारलक्ष्मणस्यापि पुत्र इति मातर् ! जीवामि ।

आत्रेयी—अत्रान्तरे ब्राह्मणेन मृतं पुत्रमुत्क्षिप्य राजद्वारे सोरस्ताडनमब्रह्मण्यमुद्घोषितम् । ततो न राजापचारमन्तरेण प्रजानामकालमृत्युः संचरतीत्यात्मदोषं निरूपयति करुणामये रामभद्रे सहसैवाशरीरिणी वागुदचरत्—

साधारणो य क्रतु क्रतुराजो वा अश्वमेध । राजदन्तादित्वात् परनिपात । सीतेति । सीताया प्रतिकृति प्रतिमा । गृहिणीकृता धर्मपत्नीकृता ॥ वज्रादपीति । अयमाशय —निर्दोषाया सीताया रामहृदयस्य मृदुत्वमेव स्वाभाविकम् । कठोरत्वं तु मूर्खलोकानुसरणार्थत्वादागन्तुकमिति प्रतिकृतिकरणादवगम्यत इति । नच 'यस्य भार्या विदूरस्था यदि सा दूषितापि वा । अनिच्छु प्रतिकूला च तस्या प्रतिकृती क्रिया ॥' इति स्मरणात् । प्रतिकृतिकरण मृदुत्वानुपपादकमिति वाच्यम्, तस्य परिणयान्तराशक्तनिरवकाशक्रियाविषयत्वात् । अश्वमेधादे सावकाशत्वात् परिणयान्तरदायकत्वात् । किंच सीतासदृशप्रतिमाकरणं मृदुत्वापादकमेव । एतादृग्विचारसाध्यत्वात् 'को हि विज्ञातुमर्हति' इति ? तज्ज्ञानस्वरूपयोग्यतापि दुर्लभेत्युक्तम् । अत्रार्थान्तरन्यासालंकार ॥ ७ ॥ वामदेवेन अनुमन्त्रित अनुज्ञात । वसिष्ठासंनिधानादिति भाव । मेध्याश्व यज्ञीयाश्व । प्रक्लृप्ता इति । यथाशास्त्रं शास्त्रोक्तन्यायेन । तेषामिति 'चतु शता रक्षन्ति यज्ञस्याघाता ये' इत्यादिश्रुतिमनुसृत्य अधिष्ठाता नियामक अनुप्रहित । अत्रान्तर इति । अब्रह्मण्यमिति वचनम् । उद्घोषितं उच्चैरुच्चारितम् । तत इति । राजापचार राजदोषम् । निरूपयति मीमांसमाने । करुणामये परदु खदु खितत्वरूपानुकम्पाप्रचुरे । उदचरत् उद्गतवती ।

पाठा०—१ 'उपकल्पिता.'. २ 'अयास°'. ३ 'हन्त'.

शम्बूको नाम वृषलः पृथिव्यां तप्यते तपः ।
शीर्षच्छेद्यः स ते राम ! तं हत्वा जीवय द्विजम् ॥ ८ ॥

इत्युपश्रुत्यैवाकृष्टकृपाणपाणिः पुष्पकमधिरुह्य सर्वा दिशो विदिशश्च शूद्रतापसान्वेषणाय जगत्पतिः संचारं समारब्धवान् ।

वासन्ती—शम्बूको नामाधोमुखो धूमपः शूद्रोऽस्मिन्नेव जनस्थाने तपश्चरति । अपि नाम रामभद्रः पुनरिदं वनमलंकुर्यात् ।

आत्रेयी—भद्रे ! गम्यतेऽधुना ।

वासन्ती—आर्ये आत्रेयि ! एवमस्तु । कठोरश्च दिवसः ।

कण्डूलद्विपगण्डपिण्डकषणाकम्पेन संपातिभि-
र्घर्मस्रंसितबन्धनैश्च कुसुमैरर्चन्ति गोदावरीम् ।
छायापस्किरमाणविष्किरमुखव्याकृष्टकीटत्वचः
कूजत्क्लान्तकपोतकुक्कुटकुलाः कूले कुलायद्रुमाः ॥ ९ ॥

(इति परिक्रम्य निष्क्रान्ते ।)

इति शुद्धविष्कम्भः ।

(ततः प्रविशति सद्योयतखड्गो रामभद्रः ।)

शम्बूक इति । तपः तप्यते तपश्चरति । 'तप ऐश्वर्ये वा' इति तङ् । दिवादित्वात् श्यन् । शीर्षच्छेद्यः 'शीर्षच्छेदाद्यच्च' (पा. ५।१।६५) इति यत्प्रत्ययः ॥ ८ ॥ दिशः प्राच्यादयः, विदिशः आग्नेय्यादयः ॥ अपि नामेति अलंकुर्यादित्यनेनान्वयः । संभावनायामपिशब्दः ॥ कण्डूलेति । कण्डूलानां कण्डूमतां द्विपगण्डपिण्डानां पिण्डाकारगजकपोलानां कषणेन सघट्टनया आकम्पेन असमर्थचलनेन संपतन्तीति संपातिनः तथाविधैः घर्मेण निदाघौष्ण्येन स्रंसितबन्धनैः शिथिलितवृन्तैः छायायां अनातपे । अपस्किरमाणाः भक्षार्थं चञ्च्वा भूमिं लिखन्तः । 'किरतेर्हर्षजीविकाकुलायकरणेष्विति वाच्यम्' । (वा. ९०७) । 'अपाच्चतुष्पाच्छकुनिष्वालेखने' (पा. ६।१।१४२) इति वार्तिकसूत्राभ्यां तङ्सुटौ । तथाविधानां विष्किराणां वायसादीनां मुखैः व्याकृष्टा कीटत्वक् येषामिति विग्रहः । कपोताः पारावताः कुक्कुटाः चरणायुधाश्च ते कूजन्तः क्लान्ताश्च येष्विति विग्रहः । कूले, तीरवर्तिन इत्यर्थः । कुलायद्रुमाः पक्षिनीडयुक्तद्रुमाः स्वकुसुमैः गोदावरीं अर्चन्ति पूजयन्ति इति संबन्धः । अत्र वृक्षवर्णनया वैदिकशिरोमणीनां गृहमेधिनां मध्याह्नकालवृत्तान्तः प्रतीयते । कण्डूलेत्यादिविशेषणेन द्रव्याणां दुरूहशास्त्रार्थसंदेहनिर्णयार्थमुपसन्नैः तैः तत्कृतोपदेशनिवृत्तसंशयतया संतुष्टैः भूमिपतिभिः

पाठा०—१ 'कठोरीभूतः'.

रामः—

हे हस्त दक्षिण ! मृतस्य शिशोर्द्विजस्य
जीवातवे विसृज शूद्रमुनौ कृपाणम् ।
रामस्य बाहुरसि निर्भरगर्भखिन्न-
सीताविवासनपटोः करुणा कुतस्ते ॥ १० ॥

(कथंचित्प्रहृत्य ।) कृतं रामसदृशं कर्म । अपि जीवेत्स ब्राह्मणपुत्रः ।

(प्रविश्य ।)

दिव्यपुरुषः—जयतु देव ।

समर्पितत्वं प्रतीयते । 'धर्मसंसिते' इत्यनेन तेषां 'कषाये कर्मभिः पक्वे' इति निवृत्तकामलोभादितया द्रव्याणां देवताराधनतया प्रतिहस्तप्रदानं प्रतीयते । 'छायापस्किरमाण–' इत्यनेन तेषां गृहेषु अतिथयः स्वयमागत्य भोज्यानि भुञ्जत इति प्रतीयते । 'कूजत्कान्त–' इत्यनेन तेषां मध्याह्नकालप्रयुक्त–श्रान्तियुक्तनानाशाखाश्रितनानाविहङ्गसमाजपौष्कल्यं प्रतीयते । 'कुलाय–' इत्यनेन तेषामनेककुटुम्बभरणं प्रतीयत इति सहृदया दया कुर्वन्तु ॥ अत्र कुसुमपतनस्य गोदावरीपूजात्वोत्प्रेक्षा कृता । सा च गम्या वाचकशब्दप्रयोगाभावात् । 'तस्य भगवत प्रचेतसोऽपि' इत्यारभ्य 'अयमध्ययनप्रत्यूह' इत्यन्तेन अष्टावक्रप्रवेशात् लक्ष्यस्य सीतावनप्रापणेनालक्ष्यस्य बीजस्योद्भेदात् प्रतिमुखसन्धिरियम् । 'लक्ष्यालक्ष्यस्य बीजस्य व्यक्तिः प्रतिमुखं मतम्' इति लक्षणात् । 'अप्येतत्तपोवनम्' इत्यारभ्य दृष्टनष्टपदार्थानुसरणरूपपरिसर्प उक्तः । 'हा रामभद्र !' इति प्रमुखनिष्ठुरवचनरूपं वज्रमुक्तम् । 'सीताप्रतिकृति' इत्यादिनानुरागप्रकाशनरूपप्रगम उक्तः । 'वज्रादपि' इत्यत्र अप्युपशमनात्मकः शम उक्तः । 'विसृष्टश्च वामदेवानुमन्त्रितः' इत्यारभ्य 'जनस्थान एव तपश्चरति' इत्यन्तेन ब्राह्मणनियमशूद्राणां कीर्तनात् वर्णसंहार उक्तः—इयं चूलिका । तदुक्तम् (द रू १।६१)—'नेपथ्यान्तःस्थितैः पात्रैश्चूलिकार्थस्य सूचनम्' इति ॥ ९ ॥ उद्यत उन्नमित ॥ हे हस्तेति । दक्षिणहस्त अपसव्यहस्त, कृपाणं खड्गं शूद्रमुनौ विसृज विमुञ्च । निर्भरः पूर्णः । विवासनं निष्कासनम् । पटोरित्यनेन 'छद्मना परिददामि' इत्येतद्विवक्षितम् । अत्र विषमालंकारः ॥ १० ॥ प्रहृत्य प्रक्षिप्येत्यर्थः । इदं चिन्त्यम्—'दूराध्वानं वधम्' इत्यारभ्य 'एतान्युद्वेगकारित्वात्प्रयोगानुचितानि' इति तन्निषेधात् । अत्रानिष्टवस्तुविक्षेपात् विधूतम् । कृतमिति । रामसदृशं कर्म न तु दशरथसदृशं कर्म । दशरथो ह्यबुद्धिपूर्वकं शूद्रतापसवधं कृतवान् । तथा च 'पितुः शतगुणं पुत्रः' इति न्यायेन दोषविषय एव, न तु गुणविषय एतत् सोपालम्भ इह व्यज्यते । अपि जीवेदिति । अपि संभावनायाम् । अशरीरवाण्या शिशुजीवननिश्चयेऽपि पावकवचनेन सीताया निर्दोषत्वनिश्चयेऽपि फलाभाववत् स्वीयदैवविपर्ययेणात्रापि तथा स्यादित्याशयः ॥ प्रविश्येति । दिव्यपुरुषः । शम्बूकशरीरं विहाय देवत्वेनेति भावः । दत्ताभय

पाठा०–१ 'गात्रे'. ।

दत्ताभये त्वयि यमादपि दण्डधारे
संजीवितः शिशुरसौ मम चेयमृद्धिः ।
शम्बूक एष शिरसा चरणौ नतस्ते
सत्सङ्गजानि निधनान्यपि तारयन्ति ॥ ११ ॥

रामः—द्वयमपि प्रियं नः, तदनुभूयतामुग्रस्य तपसः परिपाकः ।

यत्रानन्दाश्च मोदाश्च यत्र पुण्याश्च संपदः ।
वैराजा नाम ते लोकास्तैजसाः सन्तु ते शिवाः ॥ १२ ॥

शम्बूकः—स्वामिन्! युष्मत्प्रसादादेवैष महिमा । किमत्र तपसा ?
अथवा महदुपकृतं तपसा,—

अन्वेष्टव्यो यदसि भुवने भूतनाथः शरण्यो
मामन्विष्यन्निह वृषलकं योजनानां शतानि ।
क्रान्त्वा प्राप्तः स इह तपसां संप्रसादोऽन्यथा तु
क्वायोध्यायाः पुनरुपगमो दण्डकायां वने वः ॥ १३ ॥

इति । यमादपि दत्ताभये त्वयि दण्डधारे सतीत्यन्वयः । यमहेतुकभयनिवारणदातरि यमशासितरि त्वयि सति असौ शिशुः बुद्धिस्थो ब्राह्मणशिशुः । निधनानि मरणानि तारयन्ति । संसाराब्धिमिति शेषः ॥ ११ ॥ तदिति । परिपाकः फलभूमि. अनुभूयताम् । यत्रेति । आनन्दाः आत्मानुभवजन्या हर्षा । मोदाश्च दिव्यविषयानुभवजन्या हर्षाः । संपदोऽणिमादिविभूतयः, वैराजा नाम वैराजा इति प्रसिद्धाः ॥ १२ ॥ युष्मत्प्रसादेति । 'धातुः प्रसादान्महिमानमीशम्' इति श्रुतिः प्रत्यभिज्ञायते । किमत्र तपसा, तपसा किमन्नेत्यर्थ. । अथवेति । तप कर्तृको महोपकार इति भाव. । तदुपपादयति—अन्वेष्टव्य इति । यदसीति प्रसिद्धवन्निर्देशात् 'सोऽन्वेष्टव्य ' इति श्रुतिः प्रत्यभिज्ञायते । अनेन कारणत्वमप्युक्तम् । 'कारणं तु ध्येय.' इति श्रुते· । न केवलं प्रधानहिरण्यगर्भादिवत् कारणत्वम्, किंतु निरुपाधिकस्वामित्वं स्वीकृतमित्याह—भूतनाथ इति । 'एष सर्वभूताधिपति.' इति श्रुतिः प्रत्यभिज्ञायते । पूर्वोक्तान्वेष्टव्यत्वादिफलमाह—शरण्य इति । 'एष सर्वभूतपाल.' इति श्रुतिः प्रत्यभिज्ञायते । तेन हि पालनसामर्थ्यमृते सर्वेश्वरत्वहानिरित्युपबृंहणात् हरहिरण्यगर्भादीनां रक्षकत्वशङ्कानिरास । इदं च घण्टाकर्णादिविषये स्पष्टम् । वृषलकं अज्ञातो वृषलो वृषलकः तम् । अज्ञाते कन्प्रत्ययः । अनेन प्रयासेनान्वेषणीयत्वं स्वस्य सूच्यते । अन्विष्यन् । ननु चारादिना अन्वेषयन्निति भावः । योजनानां शतानि अयोध्यादण्डकयोः योजनेयत्तानिश्चयेऽपि एवमुक्तिः कृत्स्नभूमण्डलान्वेषणानन्तरं अत्र प्राप्त इति सूचयति । तन्मूलं तु 'पृथिव्या तप्यते तप.' इति

पाठा०-१ 'प्रसादोपादानः'. २ 'लोकनाथाः'. ।

रामः—किं नाम दण्डकेयम् ? (सर्वतोऽवलोक्य ।) हा, कथम्—

स्निग्धश्यामाः क्वचिदपरतो भीषणाभोगरूक्षाः
स्थाने स्थाने मुखरककुभो झांकृतैर्निर्झराणाम् ।
एते तीर्थाश्रमगिरिसरिद्गर्तकान्तारमिश्राः
संदृश्यन्ते परिचितभुवो दण्डकारण्यभागाः ॥ १४ ॥

शम्बूकः—दण्डकैवेषा। अत्र किल पूर्वं निवसता देवेन—

चतुर्दश सहस्राणि चतुर्दश च राक्षसाः ।
त्रयश्च दूषणखरत्रिमूर्धानो रणे हताः ॥ १५ ॥

येन सिद्धक्षेत्रेऽस्मिन्मादृशामपि जानपदानामकुतोभयः संचारः संवृत्तः ।

रामः—न केवलं दण्डकैव, जनस्थानमपि ।

शम्बूकः—बाढम् । एतानि खलु सर्वभूतरोमहर्षणान्युन्मत्तचण्डश्वापदकुलाक्रान्तविकटगिरिगह्वराणि जनस्थानपर्यन्तदीर्घारण्यानि दक्षिणां दिशमभिवर्तन्ते । तथा हि,—

निष्कूजस्तिमिताः क्वचित्क्वचिदपि प्रोच्चण्डसत्त्वस्वनाः
स्वेच्छासुप्तगभीरभोगभुजगश्वासप्रदीप्ताग्नयः ।

अशरीरवाण्या पृथिव्यामिति सामान्योक्तिः । मात्र , ननु मा दूतैः प्रापितवानित्यर्थः । वृषलः इत्यत्र वृषं धर्मं लुनातीति वृषल इति व्युत्पत्त्या 'शुश्रूषा शूद्रस्य' इत्युक्तस्वधर्मच्छेदेन स्वतन्त्रतपश्चरणरूपस्वदोषाधीनत्वं विवक्षितम् । तपसा सप्रसादः तपःकृतानुग्रहः । पुलकितस्यनेनापूर्ववनविलोकनस्पृहयान्यथासिद्धिर्वारिता । जनपदः दण्डकायामपि गमनप्रदेशत्वसूचनार्थम् । एवं सर्वप्रकारेणापि दुर्घटभवदागमनसंघटनत्वात् तपसा प्रसाद इति भावः ॥ १३ ॥ स्निग्धेति । श्यामा । नीला । आभोगविपुलचमत्कारः । रूक्षा चित्तक्षोभकरा । गर्ता अवटा ॥ १४ ॥ चतुर्दशेति । दूषणखरत्रिमूर्धान इति समासान्तविधेरनित्यत्वात् 'द्वित्रिभ्यां ष मूर्ध्नः' (५।४।११५) इति षप्रत्ययाभावः । केचित्तु दूषणखरत्रिमूर्धा न इति पदद्वयं कृत्वा न अस्माकं रणे दूषणखरत्रिमूर्धा हता इति षप्रत्ययान्तमेव समर्थयन्ते । अस्माकमिति रामेण समाधिना दिव्यपुरुषवचनं पक्षेऽस्याभिप्रायकम् । वस्तुतस्तु नोशब्दं पृथक्पदमभिस्वाभिप्रेत्य अत्र निवसता देवेन दूषणखरत्रिमूर्धा हता नो किमिति काका योजनीयम् । इयं च प्रत्यभिज्ञापनशैली गौरव्यविषयेष्वनुभवसिद्धा ॥ १५ ॥ येनेति । सिद्धक्षेत्रे सिद्धिप्रदपुण्यक्षेत्रे अकुतोभयः नास्ति कुतो भयं यस्येति विग्रहः । एतानीति । रोमहर्षणानि रोमाञ्चजनकानि । निष्कूजेति । निर्गता कूजा कूजितानि येभ्य इति विग्रहः । कूजितशून्या इत्यर्थः । 'कूज अव्यक्तशब्दे' इत्यस्मात् भावे

पाठा०—१ 'जनस्थाने'. २ 'सङ्कुलवि°'. ३ 'घोर'.

सीमानः प्रदरोदरेषु विरलस्वल्पाम्भसो यास्वयं
तृष्यद्भिः प्रतिसूर्यकैरजगरस्वेदद्रवः पीयते ॥ १६ ॥

रामः—

पश्यामि च जनस्थानं भूतपूर्वखरालयम् ।
प्रत्यक्षानिव वृत्तान्तान्पूर्वाननुभवामि च ॥ १७ ॥

(सर्वतोऽवलोक्य ।) प्रियारामा हि वैदेह्यासीत् । एतानि नाम कान्ताराणि । किमतः परं भयानकं स्यात् । (सास्रम् ।)

त्वया सह निवत्स्यामि वनेषु मधुगन्धिषु ।
इतीवारमते ह्यासौ स्नेहस्तस्याः स तादृशः ॥ १८ ॥
न किंचिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ १९ ॥

शम्बूकः—तदलमेभिर्दुरासदैः । अथैतानि मदकलमयूरकण्ठकोमलच्छविभिरवकीर्णानि पर्यन्तैरविरलनिविष्टनीलबहुलच्छायातरुषण्ड-

घञ्प्रत्ययः । सत्त्वानां जन्तूनाम् । प्रदरोदराणि गुहामध्यानि । प्रतिसूर्यकैः कृकलासकैः ॥ १६ ॥ पश्यामीति । भूतपूर्वो यः खरालयः तथाविधमित्यर्थः । भूतपूर्वः खरालयः खरगृहं यस्मिन्निति वा । प्रत्यक्षानिव पुरोवर्तमानानिव । अनुभवामि स्मृतिवैशद्येन प्रत्यक्षीकरोमि ॥ १७ ॥ कान्ताराणि दुर्गमवर्त्मानि । भयानकं भयजनकम् । त्वयेति । मधुगन्ध एषु अस्तीति मधुगन्धीनि तेषु वनेषु इह कान्तारेषु आरमते प्रीतिं प्राप्नवतीव । कुत इत्यत आह—स्नेहस्तस्याः स तादृश इति । 'हृदयं त्वेव जानाति प्रीतियोगं परस्परम्' इत्युक्तरीत्या परिच्छेदातीत इत्यर्थः ॥ १८ ॥ नेति । यस्य प्रियः प्रीतिमान् प्रीतिविषयो वा यः जनः किंचिदपि न कुर्वाणः सन् किंचित्कारणलेशेनापि शून्यः सन् सौख्यैः सौख्यसुखैः करणैः दुःखान्यपोहति नाशयति । तत् दुःखनाशहेतुभूतो जनः । विधेयप्राधान्यात् नपुंसकत्वम् । तस्य अपोहनीयदुःखवतः पुरुषस्य किमपि विलक्षणं द्रव्यं भव्यवस्तु । 'द्रव्यं च भव्ये' इत्यनुशासनम् । यद्वा,—सौख्यैरिति इत्थंभूतलक्षणे तृतीया । तथा च सौख्यैः विशिष्टः सुखितः प्रियः इष्टो यः जनः यस्य न किंचिदपि कुर्वाणः स्वरूपातिरिक्तव्यापारलेशशून्यः सन् दुःखानि अपोहति तदित्यादि पूर्ववत् । दुःखनिवृत्तिहेतुव्यापारलेशशून्य सन्नपि सौख्यसुखविशिष्टः यः स्वरूपेणैव यद्दुःखनिवृत्तिं प्रति कारणं तं प्रति तस्य निस्तुलभव्यद्रव्यत्वमिति भावः । एवं चाहं सीताविषये किंचित्कारलेशशून्योऽपि सुखितः सन् तद्दुःखनिवर्तकः इति कान्तारगमनं सुखमेवेति हृदयस्थितोऽर्थः ॥ १९ ॥ अथेति । पर्यन्तैः अभ्यर्णप्रदेशैः । छायाप्रधाना-

पाठा०—१ 'स्वल्पाम्भसः'. २ 'भयानकस्य'. ३ 'इतीदारमतेयासौ' ४ 'दुःसदैः'. ५ 'पर्यन्ते.'.

मण्डितान्यसंभ्रान्तविविधमृगयूथानि पश्यतु महाभागः प्रशान्तगम्भीराणि श्वापदकुलशरण्यानि महारण्यानि ।

इह समदशकुन्ताक्रान्तवानीरमुक्त-
प्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥ २० ॥

अपि च,—

दधति कुहरभाजामत्र भल्लूकयूना-
मनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते सल्लकीना-
मिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥ २१ ॥

रामः—(सबाष्पस्तम्भम् ।) भद्र ! शिवास्ते पन्थानो देवयानाः । प्रलीयस्व पुण्येभ्यो लोकेभ्यः ।

शम्बूकः—यावत्पुराणब्रह्मर्षिमगस्त्यमभिवाद्य शाश्वतं पदमनुप्रविशामि । (इति निष्क्रान्तः ।)

रामः—

एतत्पुनर्वनमहो कथमद्य दृष्टं
यस्मिन्नभूम चिरमेव पुरा वसन्तः ।
आरण्यकाश्च गृहिणश्च रताः स्वधर्मे
सांसारिकेषु च सुखेषु वयं रसज्ञाः ॥ २२ ॥
एते त एव गिरयो विरुवन्मयूरा-
स्तान्येव मत्तहरिणानि वनस्थलानि ।

स्तरवः छायातरवः, प्रशान्तानि अनुद्वेगजननानि । इहेति । शकुन्ताः पक्षिणः । वानीराः वेतसविशेषाः । मुखराणि शब्दवन्ति भूरीणि स्रोतांसि यासां ताः ॥ २० ॥ दधतीति । कुहरभाजां गुहावर्तिनां भल्लूकयूनां ऋक्षाणां अनुरसितेन अनुरणनेन गुरूणि महान्ति अम्बूकृतानि निष्ठीवनशब्दानि स्त्यानं वृद्धिं वैपुल्यं वा दधति भजन्ति । निष्यन्दः खरसद्रवः स्त्यायते वर्धते विसरति वा ॥ २१ ॥ देवयानाः देवयाननामकाः । ते च 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्' इत्युक्ताः । लोकेभ्यः लोकाननुभवितुम् । एतदिति । गृहिणः गृहमेधिनः । सांसारिकेषु जन्म-

---

पाठा०—१ 'मध्यमारण्यकानि ।'.

आमञ्जुवञ्जुलरुतानि च तान्यमूनि
नीरन्ध्रनीपनिचुलानि सरित्तटानि ॥ २३ ॥

मेघमालेव यश्चायमारादिव विभाव्यते ।
गिरिः प्रस्रवणः सोऽयं यत्र गोदावरी नदी ॥ २४ ॥

अस्यैवासीन्महति शिखरे गृध्रराजस्य वास-
स्तस्याधस्ताद्वयमपि रतास्तेषु पर्णोटजेषु ।
गोदावर्याः पयसि विततानोकहश्यामलश्री-
रन्तःकूजन्मुखरशकुनो यत्र रम्यो वनान्तः ॥ २५ ॥

अत्रैव सा पञ्चवटी यत्र चिरनिवासेन विविधविस्रम्भातिप्रसङ्गसाक्षिणः प्रदेशाः[1] प्रियायाः प्रियसखी च वासन्ती नाम वनदेवता । किमिदमापतितमद्य रामस्य[2] संप्रति हि,—

चिराद्वेगारम्भी प्रसृत इव तीव्रो विषरसः
कुतश्चित्संवेगात्प्रचल इव शल्यस्य शकलः ।
व्रणो रूढग्रन्थिः स्फुटित इव हृन्मर्मणि पुनः
पुराभूतः शोको विकलयति मां नूतन इव ॥ २६ ॥

फलभूतेषु ॥ २२ ॥ एत इति । विरुवन्मयूरा कूजद्बर्हिण ॥ २३ ॥ मेघमालेति । मेघमालेव मेघमालासदृश य अय पुरोवर्तिपदार्थ आरादिव समीपस्थ इव विभाव्यते ज्ञायते । यत्र गिरौ गोदावरी नदी स प्रस्रवणो गिरि ॥ २४ ॥ अस्यैवेति । मुखरशकुन कूजत्पक्षियुक्त अत एव अन्त कूजन् स्वय कूजन्निव स्थित ॥ २५ ॥ यत्रेति । विस्रम्भा स्वैरविलासा । चिरादिति । तीव्र स्पर्शदशायामपि दु सह । अनेन अज्ञातस्पर्शविषविशेषव्यावृत्ति । चिरात् भूयास काल व्याप्य । वेगं वेदनाशैघ्र्य आरम्भयति उत्पादयतीति वेगारम्भी । अनेन पूर्वावस्थविषविशेषव्यावृत्ति । प्रसृत यत्राहत्यादौ स्पर्श ततोऽन्यत्र सर्वाङ्गेषु प्रसृत दलनादिना दु सहप्रसरण य विषरस तत्सदृश इत्यर्थ । 'रस'शब्देन विशेषोत्कर्षो विवक्षित । कुतश्चित् यस्मात्कस्माच्चित् संवेगात् सम्भ्रमादिजन्यात् निर्घातात् प्रचल शल्यस्य बाणाग्रस्य शकल खण्ड इव स्थित । स हि मरणभयादनुद्धृत एव तिष्ठति । रूढा प्रादुर्भूता ग्रन्थय उपनाहा यस्मात् स तथोक्त । स्फुटित दीर्ण हृन्मर्मणि व्रण इव हृदयमर्मवर्तिव्रणसदृश । प्राचि वस्तुशोचनाशक्तिप्रसारणाभ्यां प्रथमो दृष्टान्त । अनिवार्यत्वशङ्काव्युदासाय द्वितीय । स्वरूपकालत्वव्यापनाय तृतीय । विशेषमाह—नूतन इवेति । विकलयति व्यर्थं करोति ॥ २६ ॥

पाठ०—१ '°लतानि', २ '°नीर°', ३ '°वहश्यामलानो°', ४ 'घनीभूतः'.

[1]तथाविधानपि तावत्पूर्वसुहृदो भूमिभागान्पश्यामि । (निरूप्य ।) अहो, अनवस्थितो भूतसंनिवेशः । तथा हि,—

पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां
विपर्यासं यातो घनविरलभावः क्षितिरुहाम् ।
बहोर्दृष्टं कालादपरमिव मन्ये वनमिदं
निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति ॥ २७ ॥

हन्त हन्त, परिहरन्तमपि मां पञ्चवटी [2]स्नेहाद्बलादाकर्षतीव । (सकरुणम् ।)

यस्यां ते दिवसास्तया सह मया नीता यथा स्वे गृहे
यत्सं[3]बन्धकथाभिरेव सततं दीर्घाभिरास्थीयत ।
एकः संप्रति नाशितप्रियतमस्ता[4]मेव रामः कथं
पापः पञ्चवटीं विलोकयतु वा गच्छत्वसंभाव्य वा ॥ २८

अनवस्थितो भूतसंनिवेशः अनियता पदार्थस्थितिः । **पुरेति** । बहोः कालात् दृष्टं बहुकालमदृष्ट्वा दृष्टम् । ल्यब्लोपे पञ्चमी । यद्वा,—पूर्वदर्शनकालबहुविप्रकृष्टकाले दृष्टम् । 'सप्तमीपञ्चम्यौ' (पा २।३।७) इति पञ्चमी । तदिदमिति बुद्धिं प्रत्यभिज्ञानम् । अत्र प्रस्तुतवृत्तान्तवर्णनात् अप्रस्तुतप्राणिकुटुम्बोपचयापचयपरिस्फूर्तिरिति ध्रुवल्यानन्दवृत्त ॥ २७ ॥ **यस्यामिति** । स्वे गृहे यथा यस्यां ते दिवसाः नीता निरुपप्लवत्वरामणीयकादिभिः स्वगृहतुल्यायां यस्यां पञ्चवट्यां नीता अतिवाहिता । न केवलं रात्रयो नीता, किंतु दिवसा अपि नीता इति 'दिवस'-पदेन व्यज्यते । तेन स्वगृहापेक्षया वैलक्षण्यमपि पञ्चवट्याः । तत्र हि राज्यतन्त्रादिना दिवसेषु न सहावस्थानं घटते । तया सह मयेति चाऽन्वयः । स्वगृहे गुरुसंनिधितिरोहितप्रणयपारतन्त्र्यसंकोचात् स्वगृहाद्विशेषः । यत्संबन्धकथाभिः कर्त्रीभिः । आस्थीयत । तिष्ठतेर्भावे लङ् । एवकारेण वाग्व्यापारान्तरप्रतिषेधः । 'यत्कथाभिः' इत्यनुक्त्वा 'यत्संबन्धकथाभिः' इत्युक्ते पञ्चवटीपरिसरवर्तिनामपि रामणीयकं व्यज्यते । अत्र 'सानन्दमनपत्राक्षी राम सध्यामुपागमत्' इत्युपरीत्या सर्वकालं बुद्धिस्थत्वात् तथेत्युक्तम् । तामेव, न तु या काचिदित्यर्थः । वियोगे हि रमणीयवस्तुदर्शनमात्रं दुःसहम्, किं पुनः सहानुभूतरमणीयदर्शनं दुःसहमिति । एकः केवलः । सीताशून्य इति भावः । ननु राज्ञः शुद्धान्त एव स्थितिरर्हा या कथं सहगमनं घटते ? पुरं प्रतिगमने तु सुलभमेव तद्दर्शनमिति किमिदास्याहितमित्यत्राह— **नाशितप्रियतम** इति । नाशितत्वमपि दैवाधीनं चेत् कथंचित् सह्यत एव, ननु तथा, किंतु मदधीन एव नाश इति दुःसातिशयो व्यज्यते । ननु तर्हि यत्र सा

पाठा०—१ 'तथापि तत्पूर्वं'. २ '°स्नेहो बला°'. ३ 'संबन्धि°'. ४ 'तामद्य'.

(प्रविश्य ।)

शम्बूकः—जयतु देवः । देव ! भगवानगस्त्यो मत्तः श्रुतसंनिधानस्त्वामाह—'परिकल्पितावरणमङ्गला प्रतीक्षते वत्सला लोपामुद्रा, सर्वे च महर्षयः । तदेहि, संभावयास्मान् । अथ प्रजविना पुष्पकेण स्वदेशमुपगत्याश्वमेधाय सज्जो भव' इति ।

रामः—यथाज्ञापयति भगवान् ।

शम्बूकः—इत इतो देवः ।

रामः—(पुष्पकं प्रवर्तयन् ।) भगवति पञ्चवटि ! गुरुजनादेशोपरोधात्क्षणं क्षम्यतामतिक्रमो रामस्य ।

शम्बूकः—देव ! पश्य,—

गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चाभिधोऽयं गिरिः ।
एतस्मिन्प्रचलाकिनां प्रचलतामुद्वेजिताः कूजितै-
रुद्वेल्लन्ति पुराणरोहिणतरुस्कन्धेषु कुम्भीनसाः ॥२९॥

तत्रैव गम्यतामित्यत्राह—पाप इति । मरणप्रतिबन्धकपापवानित्यर्थः । 'तथाप्येष प्राणः स्फुरति न तु पापो विरमति' इत्युक्तेः । असंभाव्य असनान्य रामः पञ्चवटीं विलोकयतु । वेत्यन्यादृशाशीत्याद् सर्वथा न मत्स्वरूपविज्ञानमसंभाव्यं गमनं चेति व्यज्यते । 'संप्रति नास्तिप्रियतम' इत्यनेन आर्द्रदुःसत्त्वं व्यज्यते । सर्वथा प्रिया-रामेत्यारभ्य एतच्छ्लोकपर्यन्तमनुरागप्रकाशनविशिष्टवचनरूपं पुष्पं नाम सन्ध्यङ्गमुखम् ॥ २८ ॥ भगवानिति । मत्तः श्रुतं संनिधानं त्वत्सामीप्यं येन सः । 'मत्तः' इति रामागमनाख्यानु दिव्यपुरुषस्यागस्त्यं प्रति गुरुप्रायत्वं कवेरभिमतमिति व्यज्यते । 'आख्यातोपयोगे' (पा १।४।२९) इति पञ्चमीविधानात् । परिक-ल्पितेति । आवरणमङ्गलं नीराजनादिकम् । लोपामुद्रा अगस्त्यपत्नी प्रतीक्षते कृतक्षणा तिष्ठति, त्यक्तसर्वव्यापारा तिष्ठतीत्यर्थः । अथ प्रजविना प्रकृष्टवेगवता । एतच्चेति-नेति ज्ञापनात् कर्मधारयादिति ॥ प्रवर्तयन् गमयन् । गुरुजनस्य अगस्त्यस्य आदे-शोपरोधात् आज्ञानुसरणाद्धेतोः । अतिक्रमः असंभाव्यगमनरूपः । अभीष्टजनानुनयात् पर्युपासनं नाम सन्ध्यङ्गमुखम् ॥ गुञ्जदिति । गुञ्जा एव कुटीरा गुञ्जत

पाठा०-१ 'भवन्'. २ °'रचिमानावरण°' ३ ('इतस्तर्हि देवः प्रवर्तयतु पुष्पकम्)' ४ '°घूत्कार°'. ५ 'शैवलम'.

टिप्प०—1 तच्चोक्तं दशरूपके (१।३८) 'पुष्पं वाक्यविशेषवत्' इति । 2 'पर्युपासनमनुनय' इति दशरूपके (१।३४) इति तद्लक्षणम् ।

अपि च,—

एते ते कुहरेषु गद्गदनदद्गोदावरीवारयो
मेघालम्बितमौलिनीलशिखराः क्षोणीभृतो दाक्षिणाः ।
अन्योन्यप्रतिघातसंकुलचलत्कल्लोलकोलाहलै-
रुत्तालास्त इमे गभीरपयसः पुण्याः सरित्संगमाः ॥३०॥

(इति निष्क्रान्ताः सर्वे ।

इति द्वितीयोऽङ्कः ।



अव्यक्तशब्दवन्त कुञ्जकुटीरा येषा ते । कौशिकघटा घूकपङ्क्तय तासा घुत्कारा एषु सन्तीति तद्वन्त कीचका तेषा रन्ध्रगता वेणुविशेषाणा स्तम्बा काण्डा तेषामाडम्बर सम्भ्रम तेन मूकानि भयभीतानि मौकुलिकुलानि यस्य स तथोक्त । क्रौञ्चाभिध तन्नामकोऽयं गिरि । प्रचलाकिना मयूराणाम् । रोहिणतरव हरिचन्दनवृक्षा । कुम्भीनसा सर्पा । उद्वेजन्ति वेपन्ते । 'वेजृ चलने' ॥ २९ ॥ एत इति । कुहरेषु गुहासु गद्गद यथा तथा नदन्ति शब्दवन्ति गोदावरीवारीणि येषु तथोक्ता । शिखराग्रं मौलि । पर्वताग्रं शिखरमिति इह भेदः। क्षोणीभृत पर्वता । दाक्षिणा दक्षिणदिशावर्तिन । एते ते पूर्वं भवता दृष्टा । अन्योन्यप्रतिघातेन परस्परप्रस्फालनेन सङ्कुला निबिडा चलन्त कल्लोला तरङ्गा तेषा कोलाहले कलकले उत्ताला उल्बणा सरित्सङ्गमा नदीसङ्गमा ॥ ३० ॥

वाधूलवंशजनुषो भूसारजवीरराघवार्यस्य ।
उत्तररामचरितव्याख्यायामवसितो द्वितीयोऽङ्क ॥

इति श्रीवाधूलवीरराघवविरचितायां भवभूतिभावतलस्पर्शिनी-
समाख्यायामुत्तररामचरितव्याख्यायां द्वितीयोऽङ्कः ।

तृतीयाङ्कस्य कथावस्तु ।

प्रस्तुते नृदेहधृक्तमसा-मुरलानदीसंवादात्मके विष्कम्भके वक्ष्यमाणमितिवृत्तम् । रामो ह्यगस्त्याश्रमात् परावृत्तो दण्डकारण्यं संप्राप्तस्तत्रस्यवृक्षगिर्यादिकमवलोक्य पूर्ववृत्तं समनुस्मरन् सीताया विप्रलम्भशोकेन परामूतः; स किं करिष्यतीति साशङ्कान्तःकरणा तत्रभवती भागीरथी वैदेहीसमन्विता गोदावरीपरिसरे दण्डकारण्यस्यैकदेशं संप्राप्तवती। भूतलवर्तिन्यपि वैदेही न कस्यापि प्राणिमात्रस्य दृष्टिगोचराऽभवत्। सीतावियोगविषण्णं रामं संमूर्च्छितमवेक्ष्य दूनहृदया सीतापि ससंभ्रमं तत्रागत्य अदृश्यस्वरूपतयैव सस्वपाणिसंस्पर्शं तं परामृष्टवती। सोऽपि तस्याः करस्पर्शेन सम्यगानन्दितः सन् सद्य एव संज्ञां लेभे। ततो नयने चोन्मील्य इतस्ततः प्रसारितदृष्टिर्न किमपि प्राणिमात्रं तत्रालक्षयत्। अथ च तीर्थाश्रमकरिकलभगिरिहरिणकादिपूर्वपरिचितानवलोक्य पूर्ववृत्तान्तान्प्रत्यक्षानिवानुभवन् रामो हि पुनः क्रोधपराहतः रुदन् वनदेवतया वासन्त्या सम्यगुपालब्धः सन् पुनश्च मूर्च्छामासादितवान्। सीताप्यदृष्टिगोचरा सती पूर्ववदेव रामं वक्षसि ललाटे च समस्पृशत्। तेन च पुनरपि रामश्चेतनां समाससाद। ततश्च रामः स्मारं स्मारं बहु विलप्य समुपक्रान्तमश्वमेधयज्ञं समापयिष्यन् यथाकथमपि पुष्पकविमानं समारुह्यायोध्यां संप्रतस्थे।

तृतीयोऽङ्कः।

(ततः प्रविशति नदीद्वयम्।)

एका—सखि मुरले! किमसि संभ्रान्तेव?

मुरला—सखि तमसे! प्रेषितास्मि भगवतोऽगस्त्यस्य पत्न्या लोपामुद्रया सरिद्वरां गोदावरीमभिधातुम्। जानास्येव यथा वधूपरित्यागात्प्रभृति—

अनिर्भिन्नो गभीरत्वादन्तर्गूढघनव्यथः।
पुटपाकप्रतीकाशो रामस्य करुणो रसः॥ १॥

तेन च तथाविधेष्टजनकष्टविनिपातजन्मना प्रकृष्टगद्गदेन[1] दीर्घशोकसंतानेन संप्रति परिक्षीणो रामभद्रः। तमवलोक्य कम्पितमिव[2] कुसुमसमबन्धनं[3] मे हृदयम्। अधुना च प्रतिनिवर्तमानेन रामभद्रेण नियतमेव पञ्चवटीवने वधूसहनिवासविस्रम्भसाक्षिणः प्रदेशा द्रष्टव्याः। तत्र च निसर्गधीरस्याप्येवंविधायामवस्थायामतिगम्भीराभोगशोकक्षोभसंवेगात्पदे पदे महाप्रमादानि[4] शोकस्थानानि शङ्कनीयानि रामभद्रस्य। तद्भगवति गोदावरि! त्वया तत्रभवत्या सावधानया भवितव्यम्।

वधूपरित्यागात् सुषापरित्यागात्। **अनिर्भिन्न** इति। करुणो रस- इष्टजनवियोगजन्यदुःखातिशयात्मकरसः पुटपाकप्रतीकाशः लोहादिमयसंपुटान्तर्वर्तिसंतापनसदृश इत्यर्थः॥ १॥ **तेनेति**। तथाविधेष्टजनस्य सीतायाः कष्टविनिपातात् दुःखमयविक्षेपात् जन्म उत्पत्तिः यस्य तथोक्तेन। प्रकृष्टोऽधिक- गद्गदः गद्गदशब्दः येन तथोक्तेन। 'प्रकर्षगद्गदेन' इति पाठे प्रकर्षेण गद्गदो यस्मिन्निति विग्रहः। दीर्घशोकसंतानेन दीर्घदुःखपरिवाहेण- परिक्षीणः कार्श्यदौर्बल्यादियुक्तः। कुसुमेन समं बन्धनं यस्येति विग्रहः, कुसुमसमबन्धनम्। तद्वत् सुच्छेदमित्यर्थः। **अधुनेति**। वधूसहनिवासे ये विस्रम्भाः स्वैरलीलाः तत्साक्षिणः तत्साक्षात्कर्तारः प्रदेशाः वनोद्देशाः नियतमिति संदेहवाचि। **तत्रेति**। गम्भीर आभोग आयामो यस्य तथोक्तो यः शोक- तेन जातस्य क्षोभस्य प्रकृतिविपर्यासस्य संवेगात् वेगातिशयात्। महान् प्रमादः अनवधानता येषु तथोक्तानि। संज्ञाच्छेदकारीणीत्यर्थः। शोकस्थानानि जगतां शोकनिमित्तानि। रामाख्यादितानीति भावः। सावधानया अवधानं मनसो विषया-

---

पाठा०—१ 'प्रकृष्टतो गतेन'. २ 'अतितरां'. ३ 'सबन्धनं'. ४ '°निप्रमादस्था°'.

टिप्प०—1 पुटपकविधिरुक्तः शार्ङ्गधरसंहितायां 'पुटपाकस्य मात्रेयं लेपस्याङ्गारवर्णता। लेपं च द्व्यङ्गुलं स्थूलं कुर्याद्वाङ्गुष्ठमात्रया' इति।

वीचीवातैः शीकरक्षोदशीतैराकर्षद्भिः पद्मकिञ्जल्कगन्धान् । मोहे मोहे रामभद्रस्य जीवं स्वैरं स्वैरं प्रेरितैस्तर्पयेति ॥ २ ॥

तमसा—उचितमेव दाक्षिण्यं स्नेहस्य । संजीवनोपायस्तु मूलत एव रामभद्रस्य संनिहितः ।

मुरला—कथमिव ?

तमसा—तत्सर्वं श्रूयताम्—अस्ति खलु वाल्मीकितपोवनोपकण्ठात्परित्यज्य निवृत्ते सति लक्ष्मणे सीता देवी प्राप्तप्रसववेदनमतिदुःखसंवेगादात्मानं गङ्गाप्रवाहे निक्षिप्तवती । तदैव तत्र दारकद्वयं च प्रसूता । भगवतीभ्यां पृथ्वीभागीरथीभ्यामभ्युपपन्ना रसातलं च नीता । स्तन्यत्यागात्परेण दारकद्वयं च तस्य प्राचेतसस्य महर्षेर्गङ्गादेव्या समर्पितं स्वयम् ।

मुरला—(सविस्मयम् ।)

ईदृशानां विपाकोऽपि जायते परमाद्भुतः ।
यत्रोपकरणीभावमायात्येवंविधो जनः ॥ ३ ॥

तमसा—इदानीं तु शम्बूकवृत्तान्तेनानेन संभावितजनस्थानं रामभद्रं सरयूमुखादुपश्रुत्य भगवती भागीरथी यदेव भगवत्या लोपामुद्रया स्नेहादाशङ्कितं तदेवाभिशङ्क्य सीतासमेता केनचिदिव गृहाचारव्यपदेशेन गोदावरीमुपागता ।

न्तरसंचारविमुखता तत्सहितया ॥ **वीचीति** । शीकराणां क्षोदैः सूक्ष्मांशैः । पद्मकिञ्जल्कानां अरविन्दकेसराणां गन्धान् सौरभ्याणि आकर्षद्भिः हरद्भिः । 'शीकरक्षोद' इत्यनेन शैत्यमुक्तम् । 'पद्मकिञ्जल्कगन्धान्' इत्यनेन सौरभ्यमुक्तम् । 'आकर्षद्भिः' इत्यनेन मान्द्यमुक्तम्; वहनाशक्तावेव कर्षणसंभवात् । स्वैरं निःशङ्कम् । अत्र स्वैरमित्युक्त्या सुरभिशीतलमृदुवाता अपि विरहिणामनर्थकारिण इति न शङ्क्यम् । विरहिणां चैतन्यदशायामेव दुःसहा इमे । मूर्छितानां तु प्राणप्रतिष्ठापनकरा एव । नातस्त्वयातिशङ्का कर्तव्येति व्यज्यते ॥ २ ॥ **उचितमिति** । दाक्षिण्यं सामर्थ्यं, ऊहापोहात्मकज्ञानवत्त्वं वा । मूलतः सीताङ्कुरात्, मूलमिति सीतोच्यते । मौलिक इति पाठेऽप्यर्थः प्रागिव । **वाल्मीकीति** । प्राप्तप्रसववेदनं जातप्रसवदुःखम् । आत्मानं स्वम् । दारकद्वयं शिशुद्वयम् । प्रसूता प्रसूतवती । अभ्युपपन्ना संगता । स्तन्यत्यागात्परेण स्तन्यत्यागानन्तरम् ॥ **ईदृशानामिति** । विपाकः दशा । उपकरणीभावमुपकरणत्वम् ॥ ३ ॥ **इदानीं त्विति** । उपश्रुत्याकर्ण्य । तत् सर्वं श्रूयता-

---

पाठा०—१ "°नागमनं°" २ "°रीं त्रिलोकिनुमा°".

मुरला—सुष्ठु चिन्तितं भगवत्या भागीरथ्या । राजनीतिस्थितस्यास्य खलु तैश्च तैश्च जगतामाभ्युदयिकैः कार्यैर्व्यापृतस्य रामभद्रस्य नियताश्चित्तविक्षेपाः । अव्यग्रस्य पुनरस्य शोकमात्रद्वितीयस्य पञ्चवटीप्रवेशो महानन्र्थ इति । तत्कथं सीतया रामभद्रोऽयमाश्वासनीयः स्यात् ?

तमसा—उक्तमत्र भगवत्या भागीरथ्या 'वत्से देवयजनसंभवे सीते ! अद्य खल्वायुष्मतोः कुशलवयोर्द्वादशस्य जन्मवत्सरस्य संख्यामङ्गलग्रन्थिरभिवर्तते । तदात्मनः पुराणश्वशुरमेतावतो मानवस्य राजर्षिवंशस्य प्रसवितारं सवितारमपहतपाप्मानं देवं स्वहस्तावचितैः पुष्पैरुपतिष्ठस्व । न त्वामवनिपृष्ठवर्तिनीमस्मत्प्रभावाद्वनदेवता अपि द्रक्ष्यन्ति किमुत मर्त्याः ?' इति । अहमप्याज्ञापिता 'तमसे ! त्वयि प्रकृष्टप्रेमैव वधूर्जानकी । अतस्त्वमेवास्याः प्रत्यनन्तरीभव' इति । साहमधुना यथादिष्टमनुतिष्ठामि ।

मुरला—अहमप्येतं वृत्तान्तं भगवत्यै लोपामुद्रायै निवेदयामि । रामभद्रोऽप्यागत एवेति तर्कयामि ।

तमसा—तदियं गोदावरीह्रदान्निर्गत्य,—

मित्यारभ्य ऋषिश्रेयोवितरणरूपबीजस्य अन्वेषणात् गर्भसंधिरयम् । 'गर्भस्तु दृष्टनष्टस्य बीजस्यान्वेषणं मुहुः' (द.रू.१।३६) इत्युक्तेः । केनचिदिव गृहाचारव्यपदेशेनेत्यत्र प्रस्तुतोपयोगिच्छद्माचरणरूपं अभूताहरणं नाम संध्यङ्गमुक्तम् ॥ सुष्ठ्विति । राजनीतिस्थितस्य क्षत्रियोचितराज्यपरिपालनात्मकधर्मनिष्ठस्य । अभ्युदयाय भवन्तीत्याभ्युदयिकानि इति विग्रहः । तैः आभ्युदयिकैः । चित्तविक्षेपाः हृदयतोदाः । अव्यग्रस्य व्यापारान्तरशून्यस्य । अनर्थः तद्दुःखहेतुः । एष तत्त्वार्थानुकीर्तनरूपो मार्ग उक्तः ॥ द्वादशस्य जन्मवत्सरस्य संख्यामङ्गलग्रन्थिरभिवर्तते संख्यापूर्तिहेतुकमङ्गलग्रन्थिः । वत्सरे वत्सरे शिशूनां जन्मनक्षत्रे शान्त्युत्सवं कृत्वा मङ्गलार्थं करे पट्टसूत्रादिना स्त्रियो ग्रन्थिं कुर्वन्ति । स तु करे वलयरूपेण तिष्ठतीत्युपदेशः । मानवस्य मनुसंबन्धिनः । प्रसवितारं जनकम् । अपहतपाप्मानं निरस्तसमस्ताविद्यादिदोषगन्धम् । देवं जगत्सृष्ट्यादिलीलाशालिनम् । अत्र 'एष सर्वेभ्यः पाप्मभ्य उदेति' इत्यन्तरादित्यविद्या प्रत्यभिज्ञापिता । तत्र च कप्यासश्रुत्या नारायण एव प्रतिपाद्य इति स्पष्टमेव । उपतिष्ठस्व सेवस्व । अत इति । प्रत्यनन्तरीभव अनुचरीभव ॥ **रामभद्र** इति । तर्कयामि

पाठा०—१ 'राजधानीस्थित°'. २ 'चारिणीं'. ३ 'निष्क्रम्य'.

टिप्प०—1 'अभूताहरणं छद्म' इति दशरूपकम् ।

परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकबरीकमाननम् ।
करुणस्य मूर्तिरथवा शरीरिणी
विरहव्यथेव वनमेति जानकी ॥ ४ ॥

मुरला—इयं हि सा,—

किसलयमिव मुग्धं बन्धनाद्विप्रलूनं
हृदयकमलशोषी दारुणो दीर्घशोकः ।
ग्लपयति परिपाण्डु क्षाममस्याः शरीरं
शरदिज इव घर्मः केतकीगर्भपत्रम् ॥ ५ ॥

(इति परिक्रम्य निष्क्रान्ते।)

इति शुद्धविष्कम्भः।

(नेपथ्ये)

जात जात!

(ततः प्रविशति पुष्पावचयव्यग्रा सकरुणौत्सुक्यमाकर्णयन्ती सीता।

सीता—अम्महे, जाणामि पिअसही वासंदी व्याहरदिचि।
[अहो, जानामि प्रियसखी वासन्ती व्याहरतीति।]

(पुनर्नेपथ्ये।)

सीतादेव्या स्वकरकलितैः सल्लकीपल्लवाग्रै-
रग्रे लोलः करिकलभको यः पुरा वर्धितोऽभूत्।

अनुमिनोमि । **परिपाण्ड्विति**। करुणस्य इष्टवियोगजन्यदुःखातिशयस्य मूर्तिः आकारो वा। विरहव्यथा विरहजन्यसंतापादिरूपा ॥ ४ ॥ **किसलयमिति**। परिपाण्डु उक्तरीत्या अतिम्लानत्वेऽपि लावण्याविरोधिपाण्डुतोक्ता। ग्रीष्मविरहतापयोरयमेव विशेषः—यत् ग्रीष्मस्य लावण्यनाशकत्वम्, विरहस्य तु तदभाव इति। तथा च **कालिदासः**—'समस्तापः कामं मनसिजनिदाघप्रसरयोर्न तु ग्रीष्मस्यैवं सुभगमपराद्धं युवतिषु' इति। एवं सुभगं न, एवं लावण्यापरित्यागेन रमणीयं न भवतीत्यर्थः। तथाह भगवान्वाल्मीकिः—'ज्योत्स्नातुषारमलिना पौर्णमास्यां हि लक्ष्मण!। शीतेन चातपश्यामा दृश्यते न च शोभते ॥' इति। ग्रीष्मस्यातपश्यामेति लावण्यनाशकत्वम्। क्षामं कृशं ग्लपयति म्लानं करोति। शरदिजः शरत्कालजः। 'प्रावृट्शरत्–' (पा. ६।३।१५) इत्यादिसूत्रेणालुक्। अत्र लिङ्गादभ्यूहनरूपं अनुमानं नाम संध्यङ्गमुक्तम् ॥ ५ ॥ **शुद्धविष्कम्भ** इति। संस्कृतात्मकविष्कम्भ इत्यर्थः। विष्कम्भस्वरूपं तु—'वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः। संक्षेपार्थस्तु विष्कम्भो मध्यपात्रप्रयोजितः ॥' (द. रू. १।५९) इति। केवलसंस्कृतप्रायः

पाठा०—१ "°कुसुम°". २ 'प्रमादः प्रमादः'.

सीता—किं तस्स ! [किं तस्य?]

(पुनर्नेपथ्ये।)

वध्वा सार्धं पयसि विहरन्सोऽहमन्येन दर्पा-
दुद्दामेन द्विरदपतिना संनिपत्याभियुक्तः ॥ ६ ॥

सीता—(ससंभ्रमं कतिचित्पदानि गत्वा।) अज्जउत्त! परित्ताहि परित्ताहि मह तं पुत्तअं। (विचिन्त्य।) हद्धी हद्धी, ताइं एव्व चिरपरिइदाइं अक्खराइं पंचवटीदंसणेण मं मंदभाइणिं अणुबंधंति। हा अज्जउत्त!। [आर्यपुत्र! परित्रायस्व परित्रायस्व मम तं पुत्रकम्। हा धिक् हा धिक्, तान्येव चिरपरिचितान्यक्षराणि पञ्चवटीदर्शनेन मां मन्दभागिनीमनुबध्नन्ति। हा आर्यपुत्र!] (इति मूर्च्छति।)

(प्रविश्य।)

तमसा—समाश्वसिहि समाश्वसिहि।

(नेपथ्ये।)

विमानराज! अत्रैव स्थीयताम्।

सीता—(समाश्वस्य, ससाध्वसोल्लासम्) अम्महे, जलभरभरिअमेहमंथरत्थणिअगंभीरमंसलो कुदो णु भारईणिग्घोसो भरंतकण्णविवरं मं वि मंदभाइणिं झत्ति उस्सुआवेइ। [अहो, जलभरभरितमेघमन्थरस्तनितगम्भीरमांसलः कुतो नु भारतीनिर्घोषो भ्रियमाणकर्णविवरां मामपि मन्दभागिनीं झटित्युत्सुकापयति।]

तमसा—(सस्मितास्रम्।) अयि वत्से!

अपरिस्फुटनिक्वाणे कुतस्त्येऽपि त्वमीदृशी।
स्तनयित्नोर्मयूरीव चकितोत्कण्ठितं स्थिता ॥ ७ ॥[2]

युद्ध इति ॥ व्याहरति वदति ॥ सीतेति। स्वकरस्थितैः स्वकराभ्यां दत्तैरित्यर्थः। वध्वा सार्धं स्त्रिया सह। उद्दामेन उत्कटेन संनिपत्य स्वयमापत्य। अभियुक्तः प्रत्यर्थितया संगतः ॥ ६ ॥ आर्यपुत्रेति। परित्रायस्वेति। एष व्यवहारिजनात् भीतिरूप उद्वेग उक्तः। तानीति। अक्षराणि आर्यपुत्रेति वर्णाः। अनुबध्नन्ति अनुसरन्ति। मन्दभागिनीं अल्पपुण्यफलाम् ॥ जलेति। मांसलः स्फीतः। भारतीनिर्घोषः वर्णोच्चारणध्वनिः। उत्सुकापयति उत्कण्ठितां करोति। स्वरसंयोगेन

पाठा०—१ 'निस्वाने'. २ सप्तमश्लोकस्य टीका नोपलब्धा।

सीता—भअवदि ! किं भणासि अपरिप्फुडेत्ति ! सरसंजोएण पच्चहिजाणामि णं अज्जउत्तेण एव्व एदं वाहरिदं। [भगवति! किं भणस्यपरिस्फुटेति ? स्वरसंयोगेन प्रत्यभिजानामि नन्वार्यपुत्रेणैवैतद्व्याहृतम्।]

तमसा—श्रूयते तपस्यतः किल शूद्रस्य दण्डधारणार्थमैक्ष्वाको राजा दण्डकारण्यमागत इति।

सीता—दिट्ठिआ अपरिहीणधम्मो खु सो राआ। [दिष्ट्या अपरिहीनधर्मः खलु स राजा।]

(नेपथ्ये।)

यत्र द्रुमा अपि मृगा अपि बन्धवो मे
यानि प्रियासहचरश्चिरमध्यवात्सम्।
एतानि तानि बहुकन्दरनिर्झराणि
गोदावरीपरिसरस्य गिरेस्तटानि ॥ ८ ॥

सीता—(दृष्ट्वा।) दिट्ठिआ कहंपहादचंदमंडलपंडरपरिक्खामदुब्बलेन आआरेण णिअसोम्हगंभीराणुभावमेत्तपच्चहिजेज्जो एव्व अज्जउत्तो होदि। भअवदि तमसे! धारेहि मं। [दिष्ट्या कथं प्रभातचन्द्रमंडलापाण्डरपरिक्षामदुर्बलेनाकारेण निजसौम्यगम्भीरानुभावमात्रप्रत्यभिज्ञेय एवार्यपुत्रो भवति। भगवति तमसे! धारय माम्।]

(इति तमसामाश्लिष्य मूर्च्छति।)

तमसा—वत्से! समाश्वसिहि समाश्वसिहि।

(नेपथ्ये।)

अनेन पञ्चवटीदर्शनेन—

अन्तर्लीनस्य दुःखाग्नेरद्योद्दामं ज्वलिष्यतः।
उत्पीड इव धूमस्य मोहः प्रागावृणोति माम् ॥ ९ ॥

स्वरसंदर्भेण प्रत्यभिजानामि तदिदमिति वेद्मि। श्रूयत इति। तपस्यतः तपश्चरतः कण्वादिरयम्। दण्डधारणार्थं अपराधानुगुणशिक्षणार्थम्। ऐक्ष्वाकः इक्ष्वाकुवंश्यः। 'दाण्डिनायन-' (पा. ६।४।१७४) इत्यादिसूत्रेण टिलोपः ॥ अपरिहीनधर्मः अन्यूनधर्मः ॥ यत्रेति। अध्यवात्सम् उषितवानस्मि। 'उपान्वध्याङ्वसः' (पा. १।४।४८) इति कर्मत्वम्। एतानीति। गोदावरीपरिसरस्य गोदावरीसमीपवर्तिनः ॥ ८ ॥ परिक्षामदुर्बलेन दुर्बलायमानेन। पाठान्तरम् 'परिक्षामधूसरेण' इति। अतिकृशेन दुर्बलेन चेत्यर्थः ॥ अनुभावमात्रप्रत्यभिज्ञेयः प्रभावेन केवलं प्रत्यभिज्ञातुं शक्यः ॥ अन्तर्लीनस्येति। अन्तर्लीनस्य अन्तर्गूढस्य।

पाठा०-१ '- '

हा प्रिये जानकि !

तमसा—(स्वगतम् ।) इदं तावदाशङ्कितं गुरुजनेन ।

सीता—(समाश्वस्य ।) हा, कहं एदं ? [हा, कथमेतत् ?]

(पुनर्नेपथ्ये ।)

हा देवि दण्डकारण्यवासप्रियसखि विदेहराजपुत्रि ! । (इति मूर्च्छति ।)

सीता—हद्धी हद्धी, मं मंदभाइणिं वाहरिअ आमीलिदणेत्तणीलुप्पलो मुच्छिदो एव्व । हा, कहं धरणीपिट्ठे णिरुद्धणिस्सासणीसहं विपल्हत्थो ? भअवदि तमसे ! परित्ताएहि परित्ताएहि । जीवावेहि अज्जउत्तं । [हा धिक् हा धिक्, मां मन्दभागिनीं व्याहृत्यामीलितनेत्रनीलोत्पलो मूर्च्छित एव । हा, कथं धरणीपृष्ठे निरुद्धनिःश्वासनिःसहं विपर्यस्तः ? भगवति तमसे ! परित्रायस्व परित्रायस्व । जीवयार्यपुत्रम् ।] (इति पादयोः पतति ।)

तमसा—

त्वमेव ननु कल्याणि ! संजीवय जगत्पतिम् ।
प्रियस्पर्शो हि पाणिस्ते तत्रैष निरतो जनः ॥ १० ॥

सीता—जं होदु तं होदु । जह भअवई आणवेइ । [यद्भवतु तद्भवतु । यथा भगवत्याज्ञापयति ।] (इति ससंभ्रमं निष्क्रान्ता ।)

उद्दामं उल्बणं यथा तथा अथ ज्वलिष्यतः एतदव्यवहितोत्तरक्षणभाविज्वलनवतः धूमस्य उत्पीड इव धूमसंवन्धिसंघात इव, संमर्द इवेति वा । मोहः मूर्च्छा, प्राक् ज्वलनात् पूर्वम् । आवृणोति संछादयति ॥ ९ ॥ इदमिति । गुरुजनेन । लोपामुद्राप्रभृतिनेत्यर्थः । एष संचितार्थप्राप्तिरुपक्रम उक्तः ॥ हेति । धरणीपृष्ठे भूतले निरुद्धनिःश्वासनिःसहं निरुद्धः प्रवृत्तिहीनः निःश्वासः यस्मिन् कर्मणि तद्यथा भवति तथा निःसहं दुर्बलं विपर्यस्तः ॥ त्वमेवेति । 'त्वमेव ननु कल्याणि' इत्यस्यार्थं भावः । त्वय्येवायं सञ्जीवनीय इति चिरंतनी प्रसिद्धिः । 'आनीद वातं स्वधया तदेकम्' इति श्रुत्यायमर्थोऽवगम्यते । एकं जगतां प्रलीनत्वादसहायम् । अतो निर्व्यापारम् । तत् परं ब्रह्म स्वधया 'त्वं सिद्धिस्त्वं स्वधा स्वाहा' (दे. मा. १।७३) इति 'स्वधा'शब्दवाच्यया लक्ष्म्या आनीद जीवत् इति । एवं च अद्य कथमहं वैदेशिकी जीवयामि ? त्वमेव जीवयेति । अत्र 'मां मन्दभागिनी' मित्यारभ्य 'परित्रायस्वे' त्यन्तसंदर्भेण दाक्षाबाधरूपसंभ्रम उक्तः ॥ १० ॥ आह्लाद आनन्दः, उच्छ्वासः

पाठा०-१ 'तत्'. २ 'आमीलित'.

(तत प्रविशति भूम्या निपतित सास्रया सीतया स्पृश्यमान साह्लादोच्छ्वासो राम ।)

सीता—(किंचित्सहर्षम् ।) जाणे उण पच्चाअदं विअ जीविअं तेल्लोअस्स । [जाने पुन प्रत्यागतमिव जीवित त्रैलोक्यस्स ।]

रामः—हन्त भो', किमेतत् ?

आश्च्योतनं नु हरिचन्दनपल्लवानां
निष्पीडितेन्दुकरकन्दलजो नु सेकः ।
आतृप्तजीवितपुनःपरितर्पणोऽयं
संजीवनौषधिरसो हृदि नु प्रसक्तः ॥ ११ ॥

अपि च,—

स्पर्शः पुरा परिचितो नियतं स एव
संजीवनश्च मनसः परितोषणश्च ।
संतापजः सपदि यः परिहृत्य मूर्च्छा-
मानन्दनेन जडतां पुनरातनोति ॥ १२ ॥

सीता—(ससाध्वसकरुणमुपसृत्य ।) एत्तिअ एव्व दाणिं मह बहुदरं । [एतावदेवेदानीं मम बहुतरम् ।]

रामः—(उपविश्य) न खलु वत्सलया देव्याऽभ्युपपन्नोऽस्मि

सीता—हद्धी हद्धी, किं त्ति अज्जउत्तो मं णिंदिस्सदि ? [हा धिक् हा धिक्, किमित्यार्यपुत्रो मा निन्दिष्यति ?]

रामः—भवतु, पश्यामि।

श्वाससचार ,ताभ्या सहितं यथा तथा ॥ **जाने** इति। प्रत्यागत पुनरागतम् । त्रया णामपि लोकाना राममयजीवितत्वात् रामजीवने तज्जीवनमिति भाव । तदुक्तम्— 'रामो रामो राम इति प्रजानामभवन्कथा । रामभूत जगदभूद्रामे राज्य प्रशासति ॥' इति॥ **आश्च्योतन**मिति। हरिचन्दनपल्लवाना आश्च्योतन नु कल्पतरुकिसलयक्षरणाद्द्रवीकरण किम् ? कन्दलज अङ्कुरज ॥११॥ **स्पर्श** इति। सजीवनश्च प्राणधारणहेतुभूतश्च परितोषणश्च आह्लादजनकश्च मूर्च्छां प्रज्ञाशून्यता आनन्दनेन जडता आनन्दाधिक्यप्रयुक्तप्रज्ञाशून्यता आतनोति आ समन्तात् विस्तारयति ॥ १२ ॥ एतावदेव मत्स्पर्शे पुरा परिचितत्वकथनमेव । इदानीं वियोगसमये । वत्सलया प्रीतिमत्या मदीयदोष सहमानया वा । अभ्युपपन्नोऽस्मि अनुगृहीतोऽस्मि । इद इष्टजनातिसधानात्मकमधिबल नाम सध्यङ्गमुक्तम् ॥ अनभ्यनुज्ञातेन

पाठा०—१ 'आतप्त°'. २ 'सतापजा' ३ 'मग्गिस्सदि' (=मार्गिष्यते)

टिप्प०—1 तल्लक्षण 'अधिबलमभिसंधि (द रू. १,४०) इति चोक्तम् ।

सीता—भअवदि तमसे ! ओसरम्ह दाव । मं पेक्खिअ अणब्भणुण्णादेण संणिहाणेण राआ अहिअं कुपिस्सदि । [भगवति तमसे ! अपसराव तावत् । मां प्रेक्ष्यानभ्यनुज्ञातेन संनिधानेन राजाधिकं कोपिष्यति ।]

तमसा—अयि वत्से ! भागीरथीप्रसादाद्वनदेवतानामप्यदृश्यासि संवृत्ता ।

सीता—अत्थि खु एदं । [अस्ति खल्वेतत् ।]

रामः—हा, प्रिये जानकि ! ।

सीता—(ससाध्वसगद्गदम् ।) अज्जउत्त ! असरिसं खु एदं इमस्स वुत्तंतस्स (सास्रम् ।) भअवदि ! किं त्ति वज्जमई जम्मंतरेसु वि पुणो वि असंभाविअदुल्लहदंसणस्स मं एव्व मंदभाइणिं उद्दिसिअ एव्वं वच्छलस्स एव्वंवादिणो अज्जउत्तस्स उवरि णिरणुक्कोसा भविस्सं ? अहं एव्व एदस्स हिअअं जाणामि, मह एसो । [आर्यपुत्र ! असदृशं खल्वेतदस्य वृत्तान्तस्य । भगवति ! किमिति वज्रमयी जन्मान्तरेष्वपि पुनरप्यसंभावितदुर्लभदर्शनस्य मामेव मन्दभागिनीमुद्दिश्यैवं वत्सलस्यैवंवादिन आर्यपुत्रस्योपरि निरनुक्रोशा भविष्यामि ? अहमेवैतस्य हृदयं जानामि, ममैषः ।]

रामः—(सर्वतोऽवलोक्य सनिर्वेदम् ।) हा, न किंचिदत्र ।

सीता—भअवदि ! णिक्कारणपरिच्चाइणो वि एदस्स एव्वंविहेण दंसणेण कीदिसी मे हिअआवत्था । [भगवति ! निष्कारणपरित्यागिनोऽप्येतस्य दर्शनेनैवंविधेन कीदृशी मे हृदयावस्था ।]

तमसा—जानामि वत्से ! जानामि,—

तटस्थं नैराश्यादपि च कलुषं विप्रियवशा-

द्वियोगे दीर्घेऽस्मिञ्झटितिघटनात्स्तम्भितमिव ।

अनभ्यनुमतेन । संनिधानेन समीपस्थित्या । आर्यपुत्रेति । एतत् प्रियेत्यामन्त्रणम् । अस्य वृत्तान्तस्य । परित्यागरूपस्येत्यर्थः । वज्रमयी अत्यन्तकाठिन्ययुक्ता । मन्दभाग्या मामुद्दिश्य वत्सलस्य निर्दोषत्वनिश्चयपूर्वकं मयि प्रीतिमत. निरनुक्रोशा निर्दया । 'अनुक्रोश'पदेन रामदशामिमां दृष्ट्वा मुक्तकण्ठं मया रोदितव्यम्, तत् किमेवं कठिना भवामीति व्यज्यते । 'अनुक्रोशति मुक्तकण्ठं रोदित्यनेनेति अनुक्रोशः' इत्यमरव्याख्या । कीदृशी मे हृदयावस्था ? 'आर्यपुत्र ! परिनायस्य मम पुनर'मित्यारभ्य 'ममाप्येष' इत्यन्तेन सदर्भेण प्रतिपादिता मम हृदयावस्था कीदृशीत्यर्थः ॥ तटस्थ-

---

पाठा०—१ 'ममावि'. २ 'कीदिसो मे हिअआणुबन्धो त्ति ण आणामि' (=कीदृश इव मे हृदयानुबन्ध इति न जानामि).

प्रसन्नं सौजन्याद्दयितकरुणैर्गाढकरुणं
द्रवीभूतं प्रेम्णा तव हृदयमस्मिन्क्षण इव ॥ १३ ॥

रामः—देवि !

प्रसाद इव मूर्तस्ते स्पर्शः स्नेहार्द्रशीतलः ।
अद्याप्यानन्दयति मां त्वं पुनः क्वासि नन्दिनि ! ॥ १४ ॥

सीता—एदे खु ते अगाधमाणसदंसिदसिणेहसंभारा आणंदणिस्संदिणो सुहामआ अज्जउत्तस्स उल्लावा । जेंणे पच्चएण णिक्कालणपरिच्चाअसल्लिदो वि बहुमदो मह जम्मलाहो । [एते खलु तेऽगाधमानसदर्शितस्नेहसंभारा आनन्दनिष्यन्दिनः सुधामया आर्यपुत्रस्योल्लापाः । जाने प्रत्ययेन निष्कारणपरित्यागशल्यितोऽपि बहुमतो मम जन्मलाभः ।]

रामः—अथवा कुतः प्रियतमा ? नूनं संकल्पाभ्यासपाटवोपादान एष भ्रमो रामभद्रस्य ।

(नेपथ्ये ।)

अहो, महान्प्रमादः प्रमादः । ('सीतादेव्या स्वकरकलितैः' इत्यर्धं पठ्यते ।)

मिति । तव हृदयं अस्मिन् क्षणे नैराश्यात् तटस्थमिवेत्यादिविभिन्नवाक्यतया योजना । नैराश्यात् प्रत्याशाभावात् । तटस्थं प्रसादकालुष्यादिरहितम् । विप्रियवशात् कलुषं परित्यागरूपादप्रियाद्धेतो कलुषं क्रोधयुक्तम् । दीर्घे अस्मिन् वियोगे आमरणान्तभावित्वेन ज्ञातेऽस्मिन् विरहे झटितिघटनात् आकस्मिकसंघटनात् स्तम्भितमिव विस्मयस्तिमितमिव सौजन्यात् प्रकृत्या कल्याणत्वात् प्रसन्नं भविष्यतानुसधानेन निवृत्तकालुष्यम् । दयितकरुणैः रामस्य दुःखात्मकावस्थाविशेषैः गाढकरुणं परं दुःखदु खितरूपकरुणासान्द्रम् । प्रेम्णा प्रणयेन द्रवीभूतं विलीनम् । अत्र 'तटस्थं नैराश्यात्' इत्यनेन 'तान्येव चिरपरिचितान्यक्षराणि' इति वाक्याभिमता सीतावस्था प्रतिपादिता । अपि च 'कलुषं विप्रियवशात्' इत्यनेन 'असदृशं खल्वमुष्य वृत्तान्तस्य' इत्येतद्वाक्याभिगतावस्था प्रतिपादिता । 'वियोगे दीर्घेऽस्मिन्' इत्यनेन 'कथं प्रभातचन्द्रमण्डले'त्यादिविवक्षितावस्था प्रतिपादिता । कथमित्यस्य विस्मयार्थकत्वात् । 'प्रसन्नं सौजन्यात्' इत्यनेन अथवा 'किमिति वज्रमयीवे'त्यादिप्रतिपादितावस्था दर्शिता । 'दयितकरुणैर्गाढकरुणम्' इत्यनेन 'हा धिक् इद मां मन्दभागिनीं व्याहृत्य' इत्यादिवाक्यविवक्षितावस्था प्रतिपादिता । 'द्रवीभूतं प्रेम्णा' इत्यनेन 'उत्सुकयति उत्कण्ठित स्थिताम्' इत्यादिवाक्यप्रतिपादितावस्थोक्ता ॥ १३ ॥ प्रसाद इति । स्नेहार्द्रशीतल स्नेहार्द्रश्चासौ शीतलश्चेति विग्रह । स्नेहहेतुकत्वात् स्नेहार्द्रत्वम् ॥ १४ ॥ प्रत्ययेन विश्वासेन । शल्यितोऽपि शल्यवान्कृतोऽपि । 'तदस्य संजातम्' (पा ५।२।३६) इति सूत्रेणेतच् ॥ नूनमिति । संकल्पाभ्यासस्य

पाठा०—१ 'जाण' (=येपा).

रामः—(सकरुणौत्सुक्यम्।) किं तस्य?

(पुनर्नेपथ्ये।)

('वध्वा सार्धं' इत्युत्तरार्धं पठ्यते।)

सीता—को दाणिं अभिजुज्जइ? [क इदानीमभियुज्यते?]

रामः—क्वासौ दुरात्मा यः प्रियायाः पुत्रं वधूद्वितीयमभिभवति? (इत्युत्तिष्ठति।)

(प्रविश्य।)

वासन्ती—(संभ्रान्ता।) देव! त्वर्यताम्।

सीता—हा कहं मे पिअसही वासंदी? [हा कथं मे प्रियसखी वासन्ती?]

रामः—कथं देव्याः प्रियसखी वासन्ती?

वासन्ती—देव! त्वर्यतां त्वर्यताम्। इतो जटायुशिखरस्य दक्षिणेन सीतातीर्थेन गोदावरीमवतीर्य समाश्वासयतु देव्याः पुत्रकं देवः।

सीता—हा ताद जडाओ! सुण्णं तुए विणा इदं जणट्ठाणं। [हा तात जटायो! शून्यं त्वया विनेदं जनस्थानम्।]

रामः—अहह, हृदयमर्मच्छिदः खल्वमी कथोद्घाताः।

वासन्ती—इत इतो देवः।

सीता—भअवदि! सच्चं एव्व वणदेवदा वि मं ण पेक्खदि। [भगवति! सत्यमेव वनदेवतापि मां न पश्यति।]

तमसा—अयि वत्से! सर्वदेवताभ्यः प्रकृष्टतममैश्वर्यं मन्दाकिन्याः। तत्किमिति विशङ्कसे?

सीता—तदो अणुसरम्ह। [ततोऽनुसरावः।] (इति परिक्रामति।)

रामः—भगवति गोदावरि! नमस्ते।

वासन्ती—(निरूप्य।) देव! मोदस्व विजयिना वधूद्वितीयेन देव्याः पुत्रकेण।

स्मृतिसंतानस्य पाटवं स्फूर्तिः तदेव उपादान कारणं यस्य तथोक्तः भ्रमः सीता स्पृष्टवतीत्याकारकान्यथाज्ञानम्॥ अहहेति। हृदयमर्माणि छिन्दन्तीति विग्रहः। कथोद्घाताः पुरावृत्तोपन्यासाः॥ अयीति। प्रकृष्टमुत्कृष्टम्। अत्र प्रस्तुतोत्कर्षाभिधानरूपोदाहृतिरुक्ता॥ येनेति। तरणे वयसि यत् कल्याणं भद्रनापारे-

---

पाठा०—१ 'अहिउजिस्सदि (=अभियोक्ष्यते)'. २ 'कथं देवो रघुनन्दनः'.

रामः—विजयतामायुष्मान् ।

सीता—अम्महे, ईदिसो मे पुत्तओ संवुत्तो । [अहो, ईदृशो मे पुत्रक संवृत्त ।]

रामः—हा देवि ! दिष्ट्या वर्धसे ।

येनोद्गच्छद्बिसकिसलयस्निग्धदन्ताङ्कुरेण
व्याकृष्टस्ते सुतनु ! लवलीपल्लवः कर्णमूलात् ।
सोऽयं पुत्रस्तव मदमुचां वारणानां विजेता
यत्कल्याणं वयसि तरुणे भाजनं तस्य जातः ॥ १५ ॥

सीता—अविउत्तो दाणिं दीहाऊ इमाए सोम्हतादंसणाए होदु । [अवियुक्त इदानीं दीर्घायुरनया सौम्यदर्शनया भवतु ।]

रामः—सखि वासन्ति ! पश्य पश्य । कान्तानुवृत्तिचातुर्यमपि शिक्षितं वत्सेन ।

लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ १६ ॥

सीता—भअवदि तमसे ! अअं दाव ईरसो जादो । दे उण ण आणामि एत्तिएण कालेण कुसलवा कीरिसा संवुत्तेत्ति । [भगवति तमसे ! अयं तावदीदृशो जात । तौ पुनर्न जानाम्येतावता कालेन कुशलवौ कीदृशौ संवृत्ताविति ।]

तमसा—यादृशोऽयं तादृशौ तावपि ।

सीता—ईरिसम्हि मदभाइणी जाए ण केवलं अज्जउत्तविरहो पुत्तविरहो वि । [ईदृश्यस्मि मन्दभागिनी यस्या न केवलमार्यपुत्रविरह पुत्रविरहोऽपि ।]

स्वहरूप मङ्गलं तस्य भाजनं पात्रं जात ॥ १५ ॥ **लीलेति** । लीलया उत्खाता उद्धृता मृणालकाण्डा एव कवला ग्रासा तेषां छेदेषु अवसानेषु पुष्यद्भि वर्धमानै पुष्करै पद्मै वासितस्य सुरभितस्य पयस जलस्य गण्डूष संक्रान्तय पयःसंबन्धिगण्डूषसंक्रमणानि संपादिता निर्व्यूढा । अथवा,—पुष्यति उपचयवति पुष्करे शुण्डाग्रे वासितस्य सनालवासस्य पयस जलस्य गण्डूषसंक्रान्तय । लीलोत्खातमृणालकाण्डरूपकवलच्छेदेषु कवलार्धखण्डेषु अधिकरणे सप्तमी ।

तमसा—भवितव्यतेयमीदृशी ।

सीता—किंवा मए पसूदाए जेण एआरिसं मह पुत्तआणं ईसिविरलधवलदसणकुम्हलुज्जलं अणुबद्धमुद्धकाअलीविहसिदं णिब्बुज्जलं महपुंडरीअजुअलं ण परिचुंबिअं अज्जउत्तेण? [किंवा मया प्रसूतया येनैतादृशं मम पुत्रकयोरीषद्विरलधवलदशनकुड्मलोज्ज्वलमनुबद्धमुग्धकाकलीविहसितं निर्मलोज्ज्वलं मुखपुण्डरीकयुगलं न परिचुम्बितमार्यपुत्रेण?]

तमसा—अस्तु देवताप्रसादात् ।

सीता—भअवदि तमसे! एदिणा अवच्चसंसुमरणेण उस्ससिदपण्हुदत्थणी दाणिं वच्चाणं पिदुणो संणिहाणेण खणमेत्तं संसारिणी संवुत्तम्हि । [भगवति तमसे! एतेनापत्यसंस्मरणेनोच्छ्वसितप्रस्नुतस्तनी इदानीं वत्सयोः पितुः संनिधानेन क्षणमात्रं संसारिणी संवृत्तास्मि ।]

तमसा—किमत्रोच्यते? प्रसवः खलु प्रकृष्टपर्यन्तः स्नेहस्य । परं चैतदन्योन्यसंश्लेषणं पित्रोः ।

अन्तःकरणतत्त्वस्य दम्पत्योः स्नेहसंश्रयात् ।
आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते ॥ १७ ॥

वासन्ती—इतोऽपि देवः पश्यतु ।

अनुदिवसमवर्धयत्प्रिया ते
यमचिरनिर्गतमुग्धलोलबर्हम् ।
मणिमुकुट इवोच्छिखः कदम्बे
नदति स एष वधूसखः शिखण्डी ॥ १८ ॥

संपादिताः निर्व्यूढाः । तत्र हि 'अच्छिद्राणि भूयासि' इति भावः । अनरालं अवक्रम् ॥ १६ ॥ अनुबद्धमुग्धकाकलीविहसितं उत्पन्नसूक्ष्ममधुरास्फुटध्वनिमुग्धहसितम् ॥ देवताप्रसादाद्देवतानुग्रहात् ॥ प्रसव इति । पर्यन्तः परा कोटिः । अन्योन्यसंश्लेषणं अविनाभावहेतुभूतम् । तदुभयमपीत्याह—अन्तःकरणेति । दम्पत्योः जायापत्योः अन्तःकरणतत्त्वस्य हृदयवस्तुनः स्नेहसंश्रयात् । स्नेहः प्रीतिः संश्रयः संश्लेषणम् । अविश्लेष इति यावत् । स्नेहश्च संश्रयश्चेति समाहारद्वन्द्वः । तस्मान्निमित्तादित्यर्थः । अन्नाद्धेतोर्वसतीत्यत्र अन्नफलको वास इति बोधः । तद्वदत्रापि स्नेहसंश्रयणफलकानन्दग्रन्थिरिति । आनन्दग्रन्थिः आनन्दमयग्रन्थिः । 'आनन्द'पदेन ग्रन्थ्यन्तरव्यावृत्तिः । अपत्यमिति पठ्यते परिभाष्यते ॥ १७ ॥ अनुदिवसमिति । अचिरनिर्गतमुग्धलोलबर्हं प्रसभोत्पन्नसुन्दरचलत्पिच्छं यं अवर्धयत् स एष शिखण्डी

पाठा०-१ 'तारिसंपि'.

सीता—(सकौतुकस्नेहास्यम्।) एसो सो। [एष सः।]

रामः—मोदस्व वत्स!। वयमद्य वर्धामहे।

सीता—एव्वं होदु। [एवं भवतु।]

रामः—

भ्रमिषु कृतपुटान्तर्मण्डलावृत्तिचक्षुः-
प्रचलितचटुलभ्रूताण्डवैर्मण्डयन्त्या।
करकिसलयतालैर्मुग्धया नर्त्यमानं
सुतमिव मनसा त्वां वत्सलेन स्मरामि॥ १९॥

हन्त, तिर्यञ्चोऽपि परिचयमनुरुन्धन्ते।

कतिपयकुसुमोद्गमः कदम्बः
प्रियतमया परिवर्धितोऽयमासीत्।

सीता—(सास्रम्।)सुट्ठु पच्चहिजाणिद अज्जउत्तेण। [सुष्ठु प्रत्यभिज्ञातमार्यपुत्रेण।]

रामः—

स्मरति गिरिमयूर एष देव्याः
स्वजन इवात्र यतः प्रमोदमेति॥ २०॥

वधूसख मन्द् कदम्बे वृक्षे मणिमुकुट इव। आनुपूर्व्यात् पृथुकृशत्वात् नानावर्णत्वाच्च रत्नमयकिरीटसादृश्यम्। नदति केका करोति॥ १८॥ **भ्रमिष्विति।** मण्डल यथा भवति तथा आवृत्ति मण्डलावृत्ति। पुटे अन्त पुटान्त। पुटान्त मण्डलावृत्ति पुटान्तमण्डलावृत्ति। भ्रमिषु भ्रमणेषु। मयूरस्य मण्डलाकारनाट्यचारिष्विति यावत् कृता रचिता पुटा तर्मण्डलवृत्तिर्ययोस्तथोक्ते चक्षुषी यैस्तथोक्तानि कृतपुटान्तर्मण्डलावृत्तिचक्षूंषि। प्रचलितयो चटुलयो सुन्दरयो भ्रुवो ताण्डवानि नर्तनानि कृतपुटान्तर्मण्डलावृत्तिचक्षूंषि च तानि प्रचलितचटुलभ्रूताण्डवानि चेति विग्रह। तै। तदुक्त **कनककविना**-'किं चाधस्तादुपरि च नयन्त्यानतोन्निद्रपक्ष्मा चक्राकारं भ्रमयति मुहुर्विश्वमावर्तयन्ती' इति। करकिसलयतालै करसघट्टनजाततालध्वनिभि। जातिभेदाभिप्रायक बहुवचनम्। वत्सलेन सस्नेहेन॥ १९॥ अनुरुन्धन्ते अनुसरन्ति। **कतिपय** इति। कतिपयकुसुमानामुद्गम उत्पत्ति यस्मिन्निति विग्रह। **स्मरतीति।** एष गिरिमयूर गिरिप्रियो मयूर गिरिमयूर। शाकपार्थिववत्समास। गिरे प्रियत्व उन्नतत्वनिरुपद्रवत्वादिना। अत्र अस्मिन् प्रियतमापरिवर्धितकदम्बवृक्षे स्वजन इव स्वबन्धुविषय इव यत यस्मात्कारणात् प्रमोदं प्रीतिं एति प्राप्नोति। तस्मादेष देव्या स्मरति। सीता स्मरतीत्यर्थ॥ २०॥

वासन्ती—अत्र तावदासनपरिग्रहं करोतु देवः । एतत्तु देवस्याश्रमम् ।

(राम उपविशति)

वासन्ती—

नीरन्ध्रबालकदलीवनमध्यवर्ति
कान्तासखस्य शयनीयशिलातलं ते ।
अत्र स्थिता तृणमदार्द्रनगोचरेभ्यः
सीता ततो हरिणकैर्न विमुच्यते स्म ॥ २१ ॥

रामः—इदं तावदशक्यमेव द्रष्टुम् (इत्यन्यतो रुदन्नुपविशति ।)

सीता—सहि वासंदि! किं तुए किदं अज्जउत्तस्स मह अ एदं दंसअंतीए? हद्धी हद्धी, सो एव्व अज्जउत्तो । तं एव्व पंचवडीवणं । सा एव्व पिअसही वासंदी । दे एव्व विविहविस्संभसक्खिणो गोदावरीकाणणुद्देसा । दे एव्व जादणिव्विसेसा मिअपक्खिणो पाअवा अ । मह उण मंदभाइणीए दीसंतं वि सव्वं एव्व एदं णत्थि । ईरिसो जीवलोअस्स परिणामो संवुत्तो । [सखि वासन्ति! किं त्वया कृतमार्यपुत्रस्य मम चैतद्दर्शयन्त्या? हा धिक् हा धिक्, स एवार्यपुत्रः । तदेव पञ्चवटीवनम् । सैव प्रियसखी वासन्ती । त एव विविधविस्रम्भसाक्षिणो गोदावरीकाननोद्देशाः । त एव जातनिर्विशेषा मृगपक्षिणः पादपाश्च । मम पुनर्मन्दभाग्याया दृश्यमानमपि सर्वमेवैतन्नास्ति । ईदृशो जीवलोकस्य परिणामः संवृत्तः ।]

वासन्ती—सखि सीते! कथं न पश्यसि रामभद्रस्यावस्थाम्?

नवकुवलयस्निग्धैरङ्गैर्ददन्नयनोत्सवं
सततमपि नः स्वेच्छादृश्यो नवो नव एव सः ।
विकलकरणः पाण्डुच्छायः शुचा परिदुर्बलः
कथमपि स इत्युन्नेतव्यस्तथापि दृशोः प्रियः ॥ २२ ॥

सीता—सहि! पेक्खामि । [सखि! पश्यामि ।]

तमसा—पश्य प्रियं भूयः ।

॥ २१ ॥ नवेति । विकलकरणः शून्यचक्षुरादिकरणः. शुचा दुःखेन परिदुर्बलः स्वधारणेऽप्यसमर्थः । बलं हि धारणसामर्थ्यम् । उन्नेतव्यः अनुमेयः । तथापि दृशोः

पाठा०—१ 'बहुशो यदेभ्यः'. २ 'यः'. ३ 'पश्यन्ती प्रियं भूयः'.

सीता—हा देव्व! एसो मए विणा अहं वि एदेण विणेत्ति केण संभाविदं आसि। ता मुहुत्तमेत्तं जम्मंतरादो वि दुल्लहलद्धदंसणं बाहसलिलंतरेसु पेक्खामि दाव वच्छलं अज्जउत्तं। [हा दैव! एष मया विना अहमप्येतेन विनेति केन संभावितमासीत्। तन्मुहूर्तमात्रं जन्मान्तरादपि दुर्लभलब्धदर्शनं बाष्पसलिलान्तरेषु पश्यामि तावद्वत्सलमार्यपुत्रम्।]
(इति पश्यन्ती स्थिता)

तमसा—(परिष्वज्य, सास्रम्)

विलुलितमतिपूरैर्बाष्पमानन्दशोक-
प्रभवमवसृजन्ती पक्ष्मलोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलमधुरमुग्धा दुग्धकुल्येव दृष्टिः॥ २३॥

वासन्ती—

ददतु तरवः पुष्पैरर्घ्यं फलैश्च मधुश्च्युतः
स्फुटितकमलामोदप्रायाः प्रवान्तु वनानिलाः।
कलमविरलं रज्यत्कण्ठाः क्वणन्तु शकुन्तयः
पुनरिदमयं देवो रामः स्वयं वनमागतः॥ २४॥

रामः—एहि सखि वासन्ति! नन्वित स्थीयताम्।

प्रिय। अनुपहतलावण्यत्वादिति भाव॥ २२॥ हा इति। केन संभावितमासीत् केन हेतुना संभावित उत्पादितम्। त्वयेति शेष। दुर्लभलब्धदर्शनं यदृच्छया लब्धदर्शनमिति व्याख्यातार॥ विलुलितमिति। 'विलुठितम्' इति पाठान्तरम्। अतिपूरै अतिशयितस्रोतोभि विलुलित विकीर्णं आनन्दशोकप्रभव आनन्दशोकहेतुक बाष्प अश्रु अवसृजन्ती उत्पादयन्ती। पक्ष्मला च सा उत्ताना च सा दीर्घा च इति विग्रहे विशेषणसमास। उत्तानविपुला। स्नेहस्य अनुरागस्य निष्यन्द यस्यामस्तीति विग्रह। दुग्धकुल्येव सुधामयकृत्रिमाल्पसरिदिव स्नपयति स्नान करोति। आदन्तत्वात् पुगागमे 'ग्लास्नावनुमा च' इति वैकल्पिको ह्रस्व॥२३॥ ददत्विति। मधूनि मकरन्दानि श्च्योतयन्ति क्षरन्तीति विग्रह। 'श्चुतिर् क्षरणे' इत्यस्मादन्तर्भावितण्यर्थात् कर्तरि क्विप्प्रत्यय॥ यद्वा मधुभि मकरन्दै श्च्योतन्ति आर्द्रीकुर्वन्तीति विग्रह। 'श्चुतिर् आसेचने' इत्यस्मात् क्विप्। इदं च वनानिलाना विशेषणम्। तृतीयान्तपाठे फलविशेषण पुष्पविशेषण वा। 'च्यु च्यवने' इत्यस्मात् भावे क्तप्रत्यये मधूना च्युत च्यवन येभ्य इति पुष्पपक्षे, फलपक्षे तु कर्मणि क्तप्र-

पाठा०-१ 'विअ लद्धदंसणं' (=इव लब्धदर्शनं)

वासन्ती—(उपविश्य सास्रम्।) महाराज! अपि कुशलं कुमारलक्ष्मणस्य?

रामः—(अनाकर्णनमभिनीय।)

करकमलवितीर्णैरम्बुनीवारशष्पै-
स्तरुशकुनिकुरङ्गान्मैथिली यानपुष्यत्।
भवति मम विकारस्तेषु दृष्टेषु कोऽपि
द्रव इव हृदयस्य प्रस्रवोद्भेदयोग्यः ॥ २५ ॥

वासन्ती—महाराज! ननु पृच्छामि अपि कुशलं कुमारलक्ष्मणस्येति।

रामः—(आत्मगतम्) अये, महाराजेति निष्प्रणयमामन्त्रणपदम्। सौमित्रिमात्रके बाष्पस्खलिताक्षरः कुशलप्रश्नः। तथा मन्ये विदितसीता वृत्तान्तेयमिति। (प्रकाशम्।) आः, कुशलं कुमारलक्ष्मणस्य।

वासन्ती—(रुदति।) अयि देव! किं दारुणः परं खल्वसि।

सीता—सहि वासंदि! किं तुमं एव्वंवादिणी होसि? पूआरुहो सव्वस्स अज्जउत्तो विसेसदो मह पिअसहीए। [सखि वासन्ति! किं त्वमेवंवादिनी भवसि? पूजार्हः सर्वस्यार्यपुत्रो विशेषतो मम प्रियसख्याः।]

वासन्ती—

त्वं जीवितं त्वमसि मे हृदयं द्वितीयं
त्वं कौमुदी नयनयोरमृतं त्वमङ्गे।

त्ययेन मधुभ्यः च्युतैरिति पञ्चमीतत्पुरुषः। पुष्परससमृद्धौ तात्पर्यम्। तदेवं पद्यत्रये-आद्यः शकारचकाराभ्यां युक्तः पाठः। द्वितीयः शकारचकारयकारैर्युक्तः। तृतीयस्तु चकारयकाराभ्यामिति विवेकः। रज्यत्कण्ठाः रागयुक्तकण्ठाः क्वणन्तु गीतवाद्यभेदेन शब्दं कुर्वन्तु। अत एव कूजन्त्विति नोक्तम् ॥ २४ ॥ आकर्णनं अनाकर्णनाभावम्। **करकमलेति**। करकमलवितीर्णैः करकमलदत्तैः अम्बुनीवारशष्पैः नीवारो धान्यविशेषः। शष्पं बालतृणं तैः अपुष्यत् अवर्धयत्। अनाम्बुना तरून्, अम्बुनीवाराभ्यां शकुनीन्, अम्बुनीवारशष्पैः कुरङ्गानिति विवेकः। तेषु दृष्टेषु सत्सु प्रस्रवोद्भेदयोग्यः प्रसरणोत्पत्तियोग्यः द्रव इव कोऽपि विकारः मम हृदयस्य भवति उत्पद्यते ॥ २५ ॥ महाराजेत्यामन्त्रणपदं संबोधनशब्दः ॥ आः इति सोपालम्भाङ्गीकारे ॥ **त्वमिति**। त्वं जीवितं प्राणाः। त्वं मे द्वितीयं हृदयमसि। त्वं नयनयोः कौमुदी तद्वदानन्दिनी। 'कौ मोदन्ते जना यस्मात्तेनेयं कौमुदी मता' इति

पाठा०-१ 'प्रस्रवोद्भेदयोग्यः'. २ 'पिआरुहो (=प्रियार्हो)'.

इत्यादिभिः प्रियशतैरनुरुध्य मुग्धां
तामेव शान्तमथवा किमतः परेण ॥ २६ ॥

(इति मुह्यति।)

तमसा—स्थाने वाक्यनिवृत्तिर्मोहश्च।

रामः—सखि! समाश्वसिहि समाश्वसिहि।

वासन्ती—(समाश्वस्य।) तत्किमिदमकार्यमनुष्ठितं देवेन?

सीता—सहि वासंदि! विरम विरम। [सखि वासन्ति! विरम विरम।]

रामः—लोको न मृष्यतीति।

वासन्ती—कस्य हेतोः?

रामः—स एव जानाति किमपि।

तमसा—चिरादुपालम्भः।

वासन्ती—

अयि कठोरयशः किल ते प्रियं
किमयशो ननु घोरमतः परम्।
किमभवद्विपिने हरिणीदृशः
कथय नाथ! कथं बत मन्यसे? ॥ २७ ॥

सीता—सहि वासंदि! तुमं एव्व दारुणा कठोरा अ। जा एव्वं पलवंतं पलावेसि। [सखि वासन्ति! त्वमेव दारुणा कठोरा च यैवं प्रलपन्तं प्रलापयसि।]

कौमुदीपदनिरुक्तेः। त्वमङ्गे विषये अमृतं पीयूषम्। तद्वज्जराप्रतिबन्धेन नित्ययौवनावहेत्यर्थः। अत्र प्राणाः प्राणा एव, हृदयं हृदयमेव, कौमुदी कौमुद्येव, अमृतं अमृतमेव। त्वं तु प्राणा हृदयं कौमुद्यमृतमेतत् सर्वमिति प्राणाद्यपेक्षया वैलक्षण्यमपि सूच्यते। देवता ग्रः खस्था अपि ज्ञातुं वक्तुं चाशक्यत्वादाह—इत्यादिभिरिति। प्रियाणां प्रियवचनानां शतैः। अनन्तवाची 'शत'शब्दः। 'शतं सहस्रमयुतं सर्वमानन्त्यवाचकम्' इत्युक्तेः। मुग्धां अनुरुध्य। 'उदययौवना मुग्धा' इति लक्षणलक्षितां सुन्दरीम्। त्वत्कौर्यमजानन्तीमिति वार्थः। अनुरुध्य अनुनीय तामेव पूर्वोक्तानुनयविषयभूतामेवात्र कथं त्यक्तवानसि, नाशितवानसीति वा? वाक्यशेषस्य दुःखातिशयेन वक्तुमशक्यतया प्रकरणाद्यनुप्रहेणार्थाध्याहारवादे विवक्षितार्थलाभासंभवात् शब्दाध्याहारवादे तस्य सुलभत्वात् प्रयोगे हेतुभूततत्स्मरणेन मूर्च्छोत्पत्तिमाह—मुह्यतीति। अथवेति पूर्वोक्ताक्षेपे। शान्तं त्वामुपलभ्यालम्। अतः परेण

पाठा०—१ 'किमिहोत्तरेण'. २ 'भअउत्तं पलित्तं पदीवेसि'.

तमसा—प्रणय एवं व्याहरति शोकश्च ।

रामः—सखि! किमत्र मन्तव्यम्?

त्रस्तैकहायनकुरङ्गविलोलदृष्टे-
स्तस्याः परिस्फुरितगर्भभरालसायाः ।
ज्योत्स्नामयीव मृदुबालमृणालकल्पा
क्रव्याद्भिरङ्गलतिका नियतं विलुप्ता ॥ २८ ॥

सीता—अज्जउत्त! धरामि एसा धरामि । [आर्यपुत्र! धराम्येषा धरामि ।]

रामः—हा प्रिये जानकि! क्वासि?

सीता—हद्धी हद्धी, अण्णो विअ अज्जउत्तो पमुक्ककंठं [1]परुण्णो होदि । [हा धिक् हा धिक्, अन्य इवार्यपुत्रः प्रमुक्तकण्ठं प्ररुदितो भवति ।]

तमसा—वत्से! सांप्रतिकमेवैतत् । कर्तव्यानि खलु दुःखितैर्दुःख-[2]निर्धारणानि ।

पूरोत्पीडे तडाकस्य परीवाहः प्रतिक्रिया ।
शोकक्षोभे च हृदयं प्रलापै[3]रवधार्यते ॥ २९ ॥

विशेषतो रामभद्रस्य बहुप्रकारकष्टो जीवलोकः ।

इदं विश्वं पाल्यं विधिवदभियुक्तेन मनसा
प्रियाशोकं जीवं कुसुममिव घर्मो ग्लपयति ।
स्वयं कृत्वा त्यागं विलपनविनोदोऽप्यसुलभ-
स्तदद्याप्युच्छ्वासो भवति ननु लाभो हि रुदितम् ॥ ३० ॥

रामः—कष्टं भोः, कष्टम्,—

किम्? अतिक्रान्तत्वादिति भावः ॥ २६–२७ ॥ त्रस्तेति । ज्योत्स्नामयीव ज्योत्स्नाप्रकृतिरिव स्थिता क्रव्याद्भिः विलुप्ता नाशितेति भावः । नियतमिति संभावनायाम् । अत्र प्रकरणे उपायापायशङ्काभ्यां कार्यसंभवरूपप्राप्त्याशा प्रतिपादिता ॥ २८ ॥ अन्य इव सामान्यजन इव । पूरोत्पीड इति । पूरोत्पीडे स्रोतोभूयस्त्वे । परीवाहः जलनिःसारणम् । प्रतिक्रिया प्रतीकारः चिकित्सा । शोकक्षोभे शोकाधिक्यप्रयुक्तप्रकृतिविपर्यासे प्रलापैः परिदेवनैः ॥ २९ ॥ बहुप्रकाराणि कष्टानि बहुविधानि दुःखानि यस्मिन् तथोक्तः । इदमिति । अभियुक्तेन तत्परेण विधिवत् यथाशास्त्रं विलपनं

पाठा०—१ 'रोइदि'. २ "निर्वापणानि'. ३ 'एव धार्यते'.

दलति हृदयं शोकोद्वेगाद्द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसा-
त्प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥३१॥

हे भगवन्तः पौरजानपदाः !

न खलु भवतां देव्याः स्थानं गृहेऽभिमतं तत-
स्तृणमिव वने शून्ये त्यक्ता न चाप्यनुशोचिता ।
चिरपरिचितास्ते ते भावास्तथा द्रवयन्ति मा-
मिदमशरणैरद्यास्माभिः प्रसीदत रुद्यते ॥ ३२ ॥

वासन्ती—(स्वगतम् ।) अतिगभीरमापूरणं मन्युभारस्य । (प्रकाशम्) देव ! अतिक्रान्ते धैर्यमवलम्ब्यताम् ।

रामः—किमुच्यते धैर्यमिति ?

देव्या शून्यस्य जगतो द्वादशः परिवत्सरः ।
प्रनष्टमिव नामापि न च रामो न जीवति ॥ ३३ ॥

सीता—ओहरामि अ मोहिआ विअ एदेहिं अज्जउत्तस्स पिअवअणेहिं । [अपहरामि च मोहितेव एतैरार्यपुत्रस्य प्रियवचनैः ।]

तमसा—एवमेव वत्से !

नैताः प्रियतमा वाचः स्नेहार्द्राः शोकदारुणाः ।
एतास्ता मधुनो धाराः श्च्योतन्ति सविपास्त्वयि ॥ ३४ ॥

चासौ विनोदश्चेति विग्रहः । उच्छ्वासः प्राणधारणम् ॥ ३० ॥ दलतीति । दलति स्फुटति । द्विधा न भिद्यते । पृथक्कारेण शकलद्वयं न भवतीत्यर्थः । न कृन्तति न छिनत्ति ॥ ३१ ॥ न खल्विति । देव्याः सीताया गृहे स्थानं गृहस्थितिः न चाप्यनुशोचिता । तत्परित्यागहेतुकशोकोऽपि युष्माकं नेति भावः । भावा अभिप्रायाः । तथा द्रवयन्ति वाचामगोचरं यथा तथा विलापयन्ति । 'परिद्रवयन्ति' इत्यपि पाठः । रुद्यते रोदनं करोमि । भावे लट् । प्रसीदत प्रसादं कुरुत ॥ ३२ ॥ मन्युभारस्य शोकातिशयस्य आपूरणमाविष्करणम् । अतिगभीरमतिगूढम् । अवलम्ब्यतां आश्रीयताम् । त्वयेति शेषः ॥ देव्या इति । द्वादशानां पूरणो द्वादशः । 'तस्य पूरणे डट्' (पा. ५।२।४८) । परिवत्सरः संवत्सरः । रामः न जीवतीति न, जीवत्येवेत्यर्थः । जीवनाभावो न्याय्य इति व्यज्यते ॥ ३३ ॥ नैता इति । प्रियतमा इष्टतमाः

पाठा०—१ 'गाढोद्वेगं'. २ 'किल'. ३ 'भावाः परि°'. ४ 'सखि'. ५ 'मोहिदम्हि एदेहिं अज्जउत्तवअणेहिं'.

रामः—अयि वासन्ति ! मया खलु,—

> यथा तिरश्चीनमलातशल्यं
> प्रत्युप्तमन्तः सविषश्च दन्तः ।
> तथैव तीव्रो हृदि शोकशङ्कु-
> र्मर्माणि कृन्तन्नपि किं न सोढः ॥ ३५ ॥

सीता—एव्वं वि मंदभाइणी अहं जा पुणो आआसआरिणी अज्जउत्तस्स । [एवमपि मन्दभागिन्यहं या पुनरायासकारिणी आर्यपुत्रस्य ।]

रामः—एवमतिगूढस्तम्भितान्तःकरणस्यापि मम सन्तुतर्वस्तुदर्शनादेवायमावेगः । तथा हि—

> वेलोल्लोलक्षुभितकरुणोज्जृम्भणस्तम्भनार्थं
> यो यो यत्नः कथमपि समाधीयते तं तमन्तः ।
> भित्त्वा भित्त्वा प्रसरति बलात्कोऽपि चेतोविकार-
> स्तोयस्येवाप्रतिहतरयः सैकतं सेतुमोघः ॥ ३६ ॥

स्नेहार्द्रा अनुरागशीतला शोकदारुणा दुःखेन रूक्षा एता वाचः न । किंतु एता सविषा मधुनो धारा श्च्योतन्ति स्रवन्ति । अपह्नुतिरलंकारः ॥ ३४ ॥ यथेति । तिरश्चीनं तिर्यग्भूतं प्रत्युप्तं निखातं अलातशल्यं उल्कामयं लोहकीलाग्रं सविषो दन्तश्च यथा तीव्र तथैव तीव्र मर्माणि हृदयादीनि कृन्तन्सन्नपि छिन्दन्संश्चपि हृदि शोकशङ्कुः दुःखात्मकः कीलः किं न सोढः न व्यपहृत किम्? सहते (कर्मणि क्त ॥ ३५ ॥ वेलेति । वेलाया मर्यादाया उल्लोल उद्वृत्त, अतिवेल इत्यर्थः । क्षुभित प्रवाहभूयस्तया नदीवत् क्षोभवांश्च य करुण प्रियजनविश्लेषजन्यदुःखातिशय तस्य उज्जृम्भणमभिवृद्धि तस्य स्तम्भन प्रतिहति तदर्थम् । 'करुणस्तम्भनार्थम्' इति पाठे वेलोल्लोलं वेलातिक्रान्त क्षुभितं क्षोभ यस्य तथोक्तस्य करुणस्य । हृदयाबेरित्यर्थ । कथमपि प्रयासेन समाधीयते उत्पाद्यते । चेतोविकार सम्भ्रमातिशय । ओघ

पाठा०—१ 'दंश'. २ 'एव्व म्हि'. ३ 'अतिनिष्कम्प°'. ४ 'तत्तप्रिय°'. ५ 'उद्दामोघ' ६ 'मया धी°'.

टिप्प०—१ उपमेयं 'स्नेहार्द्रा शीकरदारुणा वाच' इत्यादसत्यतामापाद्य 'सविषा मधुनो धारा' इति उपमान सत्यतया स्थापनादत्रापह्नुति । 'प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः (का प्र. १०।१४६) इति तल्लक्षणम् ।

सीता—अज्जउत्तस्स एदिणा दुव्वारदारुणारंभेण दुःखसंजोएण परिमुसिअणिअदुक्खं पमुक्कजीविअं मे हिअअं फुडइ। [आर्यपुत्रस्यैतेन दुर्वारदारुणारम्भेण दुःखसंयोगेन परिमुषितनिजदुःखं प्रमुक्तजीवितं मे हृदयं स्फुटति।]

वासन्ती—(स्वगतम्।) कष्टमत्यासक्तो देवः। तदाक्षिपामि तावत्। (प्रकाशम्।) चिरपरिचितानिदानीं जनस्थानाभोगानवलोकनेन मानयतु देवः।

रामः—एवमस्तु। (इत्युत्थाय परिक्रामति।)

सीता—संदीवण एव्व दुक्खस्स पिअसहीए विणोदणोवाओ त्ति तक्केमि। [संदीपन एव दुःखस्य प्रियसख्या विनोदनोपाय इति तर्कयामि।]

वासन्ती—देव देव!

अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः
सा हंसैः कृतकौतुका चिरमभूद्गोदावरीसैकते।
आयान्त्या परिदुर्मनायितमिव त्वां वीक्ष्य बद्धस्तया
कातर्यादरविन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः ३७॥

दीर्घः प्रवाहः॥ ३६॥ **आर्यपुत्रस्येति**। दुर्वारो दुर्निवर्त्यः दारुणानां क्रूरमूर्च्छासंतापादीनां आरम्भ उपादानं येनेति विग्रहः। परिमुषितं निजदुःखं स्वीयदुःखं यस्येति यथोक्तम्। स्फुटति दलति॥ आक्षिपामि। अन्यत्र नयामीत्यर्थः॥ **संदीपन** इति। विनोदनोपायः चिरपरिचितजनस्थानाभोगावलोकनरूपः दुःखस्य संदीपन एव उद्दीपनहेतुरेवेति तर्कयामि जानामि॥ **अस्मिन्निति**। अस्मिन्नेव लतागृहे त्वं अभवः स्थितवान्। तन्मार्गे सीताया आगमनमार्गे दत्तं ईक्षणं नेत्रं येन तथोक्तः। हंसैः कृतं उत्पादितं कौतुकं हर्षः यस्यास्तथोक्ता। गोदावरीसैकते पुलिनोच्चये। आयान्त्या आगच्छन्त्या तया सीतया परिदुर्मनायितमिव परिकुपितमनस्कमिव स्थितम्, नतु वस्तुतः कुपितहृदित्यर्थः। त्वां वीक्ष्य कातर्यात् अपराधप्रतिसंधानजनितसाध्वसात् अरविन्दकुड्मलनिभः पद्मकोशसदृशो मुग्धः सुन्दरः प्रणामाञ्जलिः मस्तकन्यस्तकरपुटादिप्रणामाङ्गभूताञ्जलिरित्यर्थः। अथवा 'नामयत्यपि वा देवं प्रह्वीभावयति ध्रुवम्। प्रह्वीभवति नीचे हि परो नैच्यं विलोकयन्॥ अतो वा नम उक्तीदं यत्तं नामयति स्वयम्। वाचा नम इति प्रोच्य वपुषा मनसा च यत्॥' इति भगवच्छास्त्रोक्तरीत्या प्रणामः कोपोद्धतरामहृदयनमनहेतुभूतोऽञ्जलिरित्यर्थः। उक्तं च—'अञ्जलिः परमा मुद्रा क्षिप्रं देवप्रसादिनी' इति। अत एव रामायणे—

पाठा०—१ 'संजोएण'. २ 'किंपि पमुद्धं मे हिअअं'. ३ 'अभ्यापन्नः'. ४ 'तदन्यतः'.

सीता—दालुणासि वासंति ! दालुणासि। जा एदेहिं हिअअम्म[1]-म्मुग्घाडिअसल्लसंघट्टणेहिं पुणो पुणो वि मं मंदभाइणिं अज्जउत्तं अ सुमरावेसि। [दारुणासि वासन्ति ! दारुणासि। या एतैर्हृदयमर्मोद्घाटितशल्यसंघट्टनैः पुनः पुनरपि मां मन्दभागिनीमार्यपुत्रं च स्मरयसि।]

रामः—अयि चण्डि जानकि! इतस्ततो दृश्यस इव नानुकम्पसे।

हा हा देवि! स्फुटति हृदयं ध्वंसते देहबन्धः
शून्यं मन्ये जगदविरलज्वालमन्तर्ज्वलामि।
सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि॥ ३८॥

(इति मूर्च्छति।)

सीता—हद्धी हद्धी, पुणोवि मुद्धो[3] अज्जउत्तो। [हा धिक् हा धिक्, पुनरपि मूढ आर्यपुत्रः।]

वासन्ती—देव! समाश्वसिहि समाश्वसिहि।

'कृतापराधस्य हि ते नान्यत्पश्याम्यहं क्षमम्। अन्तरेणाञ्जलिं बद्ध्वा लक्ष्मणस्य प्रसादनात्॥' इति। बद्धः घटितः॥ ३७॥ दारुणेति। हृदयमर्मोद्घाटितशल्यस्य हृदयमर्मणि स्थितकीलामस्थसंघट्टनैः संचलनैः एतैः पुरावृत्तान्तकथनैः आर्यपुत्रं मां च स्मरयसि, मद्विषयकस्मृतिं आर्यपुत्रस्य जनयसीत्यर्थः। या स्मरयसि सा त्वं दारुणेति पूर्वेणान्वयः। चण्डि कठिने जानकि जनकपुत्रि। नानुकम्पसे दयां न करोषि? जानकीत्युक्त्या परमदयालुजनकराजपुत्र्यास्तवेदं निर्दयत्वं नोचितमिति व्यज्यते। हा हेति। 'हाहा'शब्दो दुःखातिशयद्योतकः। हृदयं स्फुटति दलति। देहबन्धः शरीरावयवानां सन्धिः। जातावेकवचनम्। ध्वंसते विशीर्णो भवति। जगत् लोकं शून्यं असत्कल्पम्। अभावप्रतियोगीति यावत्। मन्ये जानामि। अविरलाः अविच्छिन्नाः ज्वालाः यस्मिन्कर्मणि तत्तथोक्तम्। अन्तः शरीरान्तः ज्वलामि। काष्ठवज्ज्वलामीति यावत्। विधुरः ज्ञानादिशून्यः सीदन् विशीर्णीभवन् अन्तरात्मा अन्धे अन्धयति लोकानित्यन्धं तस्मिन् तमसि मज्जति अवगाढं भवति। मोहः मूर्च्छा विष्वक् परितः स्थगयति सञ्छादयति कथं करोमि किं करोमि? किं हृदयस्फोटादि निवारयामि, उत त्वदागमनार्थं लोकाननुनयामि, अथवा त्वामानेष्यामि वेति भावः॥ ३८॥ पुनरपि मूढो मूर्च्छितः वारंवारं पदे पदे संशयितजीवितः संशयितं संशयविषयं जीवितं यस्मिंस्तथोक्तः। मरणपर्यवसायीति

पाठा०—१ "मम्मगूढ". २ 'संदावेसि' (=संतापयसि). ३ 'पमुद्धो'.

सीता—अज्जउत्त ! मं मंदभाइणिं उद्दिसिअ सअलजीवलोअमंगलिअजम्मलाहस्स दे वारंवारं ससइदजीविअदालुणो दसापरिणामो त्ति हा हदम्हि । (इति मूर्च्छति।) [आर्यपुत्र[1] मां मन्दभागिनीमुद्दिश्य सकलजीवलोकमाङ्गलिकजन्मलाभस्य ते वारंवारं संशयितजीवितदारुणो दशापरिणाम इति हा हतास्मि ।]

तमसा—वत्से ! समाश्वसिहि समाश्वसिहि । पुनस्ते पाणिस्पर्शो रामभद्रस्य जीवनोपायः[2] ।

वासन्ती—कथमद्यापि नोच्छ्वसिति ? हा प्रियसखि सीते ! क्वासि । संभावयात्मनो जीवितेश्वरम् ।

(सीता ससंभ्रममुपसृत्य हृदि ललाटे च स्पृशति ।)

वासन्ती—दिष्ट्या प्रत्यापन्नचेतनो रामभद्रः ।

रामः—

आलिम्पन्नमृतमयैरिव प्रलेपै-
रन्तर्वा बहिरपि वा शरीरधातून् ।
संस्पर्शः पुनरपि जीवयन्नकस्मा-
दानन्दादपरमिवादधाति मोहम् ॥ ३९ ॥

(सानन्दमुन्मीलिताक्ष एव ।) सखि वासन्ति ! दिष्ट्या वर्धसे ।

वासन्ती—देव ! कथमिव ?

भाव । अत एव दारुणः क्रूरः दशापरिणामः दशापरिपाकः ॥ हा प्रियसखीति । जीवितेश्वरं प्राणनाथं रामं संभावय संभावितं कुरु । रामप्रभवः परिहरस्तेलयं ॥ हृदि ललाटे च स्पृशति । इदं च श्लोकेऽनुमयसिद्धम् । दिष्ट्येति । दिष्ट्येत्यानन्दे । प्रत्यापन्ना पुनरागता चेतना प्रज्ञा यस्य स तथोक्तः ॥ आलिम्पन्निति । अमृतमयैः अमृतस्वरूपैः । चिन्मयमित्यादाविव स्वार्थिको मयट्प्रत्ययः । प्रलेपैः लेपैः लेपसाधनद्रव्यैः अन्तर्वा बहिरपि वा अन्तर्बहिश्च शरीरं धातूंश्च । नाडीश्च अन्तर्नाडी, बहिः शरीरमिति विवेकः । आलिम्पन्निव । सर्वाङ्गीणं लेपनकर्तेति संभावनीयः । जीवयन् प्राणप्रतिष्ठाहेतुभूतः अकस्मात् निर्हेतुकः संस्पर्शः पुनरपि आनन्दात् आनन्दस्योपायापरं मोहं तु सहेतुपूर्वकमूर्च्छातिरिक्तमूर्च्छाम्, आनन्दादिति ल्यब्लोपे पञ्चमी । यद्वा,-आनन्दादिति हेतौ पञ्चमी । तथा च तु गतानन्दपूर्वमूर्च्छातिरिक्ताम् । आनन्दहेतुकां मूर्च्छामादधातीव उत्पादयतीव । अन्ये तु परो न भवतीत्यपरः । अनन्य इत्यर्थः । आनन्दादपरं मोहं आनन्दात्मकमूर्च्छामित्याहुः ॥ ३९ ॥ सानन्द

पाठा०—१ "मंगळावारस्स". २ 'त्वत्पाणिस्पर्श एव'.

रामः—सखि! किमन्यत्। पुनरपि प्राप्ता जानकी?

वासन्ती—अयि देव रामभद्र! क सा?

रामः—(सस्पर्शसुखमभिनीय।) पश्य नन्वियं पुरत एव।

वासन्ती—अयि देव रामभद्र! किमिति मर्मच्छेददारुणैरतिप्रलापैः प्रियसखीविपत्तिदुःखदग्धामपि मां पुनः पुनर्मन्दभाग्यां दहसि?

सीता—ओसरिदु इच्छम्मि। एसो उण चिरप्पणअसंभारसोम्मसीअलेण अज्जउत्तप्परिसेण दीहदारुणं वि झत्ति संदावं उल्लाहअन्तेण वज्जलेहोवणद्धो विअ परिअद्धवावारो आसजिओ विअ मे अग्गहत्थो। [अपसर्तुमिच्छामि। एष पुनः चिरप्रणयसंभारसौम्यशीतलेन आर्यपुत्रस्पर्शेन दीर्घदारुणमपि झटिति संतापं उल्लाघयता वज्रलेपोपनद्ध इव पर्यस्तव्यापार आसञ्जित इव मेऽग्रहस्तः।]

रामः—सखि! कुतः प्रलापः?

> **गृहीतो यः पूर्वं परिणयविधौ कंकणधरः**
> **सुधासूतेः पादैरमृतशिशिरैर्यः परिचितः।**

सीता—अज्जउत्त! सो एव्व दाणिं सि तुमं। [आर्यपुत्र! स एवेदानीमसि त्वम्।]

मुन्मीलिताक्ष एव उन्मीलिते त्यक्तमुकुलीभावे अक्षिणी यस्य स तथोक्तः। अत्र 'हृदि स्फाटे च' इत्यादिना इष्टार्थोपायानुसरणात्मकाक्षेप उक्तः॥ अयीति। मर्मच्छेदवत् हृदयाद्यवयवक्षतिवत् दारुणैः दुःसहैः प्रलापैः अनर्थकवचोभिः दहसीत्यन्वयः। प्रियसख्याः सीतायाः विपत्त्या विपदा यद्दुःखं तेन दग्धां मन्दभाग्याम्॥ अपसर्तुमिति। चिरस्य बहुकालरूढस्य प्रणयस्य स्नेहस्य संभारेण अतिशयेन हेतुना सौम्यः आह्लादकरः शीतलः शीतश्च तथाविधेन। दीर्घश्चासौ दारुणश्चेति विग्रहः। खञ्जकुब्जादिवत् समासः। तथाविधं संतापं झटिति उल्लाघयता लघूकुर्वता आर्यपुत्रस्पर्शेन वज्रलेपेन उपनद्ध इव घटित इव पर्यस्तव्यापारः। निष्पन्द इत्यर्थः। मे अग्रहस्तः आसञ्जित इव लग्न इव। प्रलापैरिति वासन्तीवाक्यस्योत्तरमाह—'सखि! कुतः प्रलापाः?' इति। गृहीत इति। यः परिणयविधौ विवाहविधौ कङ्कणधरः गृहीतः यः करः सुधायाः अमृतस्य सूतिरुत्पत्तिः यस्मात्तस्य चन्द्रस्य अमृतशिशिरैः सुधाशीतलैः पादैः किरणैः परिचितः संश्लिष्टः। उक्तविशेषणसाम्यादाह—'आर्यपुत्र! स एवेदानीं त्वमसि' इति। यः करः कङ्कणधरो गृहीतः सुधासूतेः पादैः परिचितः स एव त्वमिदानीमित्यर्थः। उभयत्रापि परिणयविधौ कंकणधरत्व लावण्यश्लिष्टत्व-

---

पाठा०—१ 'चिरसंभावसोम्म°'. २ 'हरतेण'. ३ 'णिव्वत्तणीसहविअलहत्थो वेवणसीलो अवसो विअ'.

रामः—

स एवायं तस्यास्तदितरकरौपम्यसुभगो
मया लब्धः पाणिर्ललितलवलीकन्दलनिभः ॥४०॥

(इति गृह्णाति ।)

सीता—हद्धी हद्धी, अज्जउत्तप्परिसमोहिदाए पमादो मे संवुत्तो ।
[हा धिक् हा धिक्, आर्यपुत्रस्पर्शमोहितायाः प्रमादो मे संवृत्तः ।]

रामः—सखि वासन्ति! आनन्दमीलितः प्रियास्पर्शसाध्वसेन परवानस्मि । त्वमपि धारय माम् ।

वासन्ती—कष्टमुन्माद एव ।

(सीता ससंभ्रमं हस्तमाक्षिप्यापसर्पति ।)

रामः—हा धिक्, प्रमादः,—

करपल्लवः स तस्याः सहसैव जडो जडात्परिभ्रष्टः ।
परिकम्पिनः प्रकम्पी करान्मम स्विद्यतः स्विद्यन् ॥ ४१ ॥

सीता—हद्धी हद्धी, अज्जवि अणुबद्धबहुघुम्मंतवेअणं ण संठावेमि अत्ताणं । [हा धिक् हा धिक्, अद्याप्यनुबद्धबहुघूर्णमानवेदनं न संस्थापयाम्यात्मानम् ।]

तमसा—(सस्नेहकौतुकस्मितं निर्वर्ण्य ।)

सस्वेदरोमाञ्चितकम्पिताङ्गी
जाता प्रियस्पर्शसुखेन वत्सा ।
मरुन्नवाम्भःपरिधूतसिक्ता
कदम्बयष्टिः स्फुटकोरकेव ॥ ४२ ॥

पसुधासूतिकिरणपरिचितत्वं चाविशिष्टमिति श्रुत्वा सीतावाक्यं प्रकृतम् । राम आह—स एवायमिति । ललितेन सुकुमारेण लवलीकन्दलेन लवलीनामकलताङ्कुरेण निभः सदृशः तदितरकरेण गृहीतान्यकरेण औपम्येन सादृश्येन सुभगः मनोज्ञः । सव्यकरसादृश्यं दक्षिणकरस्य तथा दक्षिणकरसादृश्यं सव्यकरस्येति भावः । तस्याः स एव पाणि. मया लब्धः ॥ ४० ॥ गृह्णाति ग्रहणमभिनयति ॥ प्रमादः अनवधानम् ॥ प्रियास्पर्शसाध्वसेन प्रियायाः सीतायाः स्पर्शेन यत् साध्वसं शृङ्गारजं भयं तेन परवान् परवशः ॥ उन्मादः चित्तविभ्रमः ॥ हस्तमाक्षिप्य रामहस्तं निरस्य ॥ करपल्लव इति । प्रकम्पी चपलः स्विद्यन् स्वेदवान् तस्याः स करपल्लवः परिकम्पिनः चपलात् जडात् मम करात् अनवधानतो जडात्मनः मम करात् सहसा परिभ्रष्टः परिच्युतोऽभवत् ॥ ४१ ॥ अनुबद्धा उत्पन्ना बह्वी घूर्णमाना उद्गच्छन्ती वेदना यस्य तमात्मानं

पाठा०-१ 'तुहिननिकरौपम्य°'.

सीता—(स्वगतम्।) अवसेन एदेण अत्तणएण लज्जाविदम्हि भअवदीए तमसाए। किं ति किल एसा मण्णिस्सदि एसो परिच्चाओ एसो अहिसंगे त्ति। [अवशेनैतेनात्मना लज्जापितास्मि भगवत्या तमसया। किमिति किलैषा मंस्यत एष परित्याग एषोऽभिषङ्ग इति।]

रामः—(सर्वतोऽवलोक्य।) हा, कथं नास्त्येव? नन्वकरुणे वैदेहि!।

सीता—अकरुणम्हि जा एव्वंविहं तुमं पेक्खंदी एव्व जीवेमि। [अकरुणास्मि यैवंविधं त्वां पश्यन्त्येव जीवामि।]

रामः—क्वासि प्रिये! देवि! प्रसीद प्रसीद। न मामेवंविधं परित्यक्तुमर्हसि।

सीता—अयि अज्जउत्त! विप्पदीवं विअ। [अयि आर्यपुत्र! विप्रतीपमिव।]

वासन्ती—देव! प्रसीद प्रसीद। स्वेनैव लोकोत्तरेण धैर्येण संस्तम्भयातिभूमिं गतमात्मानम्। कुत्र मे प्रियसखी?

रामः—व्यक्तं नास्त्येव। कथमन्यथा वासन्त्यपि तां न पश्येत्? अपि खलु स्वप्न एष स्यात्। न चास्मि सुप्तः। कुतो रामस्य निद्रा? सर्वथापि स एवैष भगवाननेकवारपरिकल्पितो विप्रलम्भः पुनः पुनरनुबध्नाति माम्।

न संस्थापयामि न स्थिरं करोमि ॥ ४२ ॥ कथं नास्त्येवेति व्यक्तम्। स्फुटमित्यर्थः। कथमन्यथा वासन्ती न पश्येत्? अन्यथा सीताया अस्तित्वे वासन्ती कथं कस्माद्धेतोः न पश्येत्? खलु भ्रान्तिशङ्कया वनदेवतायाः प्रतीतिप्रकर्षं विभाव्य वासन्तीत्युक्तम्। एवं योग्यानुपलम्भेन सीताया नास्तित्वं निश्चित्य पूर्वोक्तस्पर्शनस्य भ्रमरूपत्वं मीमांस्यते ॥ अपि खलु स्वप्न एषः स्यात्। एष सीतास्पर्शः स्वप्नः स्यात्। स्वाप्निकज्ञानविषयः स्यादिति संभावना। यद्वा,—एष सीतास्पर्शः स्वप्नः स्यात्स्वप्नावस्थोत्पादितः किमु? स्वप्नावस्थाया हि 'संध्ये सृष्टिराह हि' इति सूत्रप्रामाण्यात्। तदनुरूपानुभाव्यतत्तत्पदार्थसृष्टिः परमात्मकर्तृकाभ्युपगम्यते। विस्तरस्तूत्तरमीमांसायां द्रष्टव्यः। स्वप्नं प्रति सुप्तेः कारणत्वादाह—**न चास्मि सुप्त** इति। तदुपपादयति—**कुतो रामस्य निद्रेति**। 'अनिद्रः सततं रामः' इति सीतावियोगे रामस्य निद्रा नास्तीति प्रसिद्धमेवेति नक्तूपपत्तिरिति भावः। पर्यवसितमाह—**सर्वथेत्यादि**ना। मम वासन्त्याश्चानुपलम्भान्निद्राया अभावेन स्वप्नानुपपत्तेश्च सर्वप्रकारेणापि सीतास्पर्शनं भ्रमरूपमिति भावः। विप्रलम्भः भ्रमः। 'भगवान्' इत्यनतिलङ्घनीय-

सीता—मए एव्व दारुणाए विप्पलद्धो अज्जउत्तो । [मयैव दारुणया विप्रलब्ध आर्यपुत्र ।]

वासन्ती—देव ! पश्य पश्य,—

पौलस्त्यस्य जटायुषा विघटितः कार्ष्णायसोऽयं रथ-
स्ते चैते पुरतः पिशाचवदनाः कङ्कालशेषाः खराः ।
खड्गच्छिन्नजटायुपक्षतिरितः सीतां चलन्तीं वह-
न्नन्तर्व्याप्तविद्युदम्बुद इव द्यामभ्युदस्थादरिः ॥४३॥

सीता—(सभयम्) अज्जउत्त ! तादो वावादीअदि । ता परित्ताहि परित्ताहि । अहं वि अवहरिज्जामि । [आर्यपुत्र ! तातो व्यापाद्यते । तस्मात्परित्रायस्व परित्रायस्व । अहमप्यपह्रिये ।]

रामः—(सवेगमुत्थाय ।) आः पाप तातप्राणसीतापहारिन् लङ्कापते, क्व यास्यसि ?

वासन्ती—अयि देव राक्षसकुलप्रलयधूमकेतो ! किमद्यापि ते मन्युविषय ?

सीता—अम्महे, उब्भन्तम्हि । [अहो, उद्भ्रान्तास्मि ।]

रामः—अन्य एवायमधुना विपर्ययो वर्तते ।

उपायानां भावादविरतविनोदव्यतिकरै-
विमर्दैर्वीराणां जनितजगदत्यद्भुतरसः।
वियोगो मुग्धाक्ष्याः स खलु रिपुघातावधिरभू-
त्कटुस्तूष्णीं सह्यो निरवधिरयं तु प्रविलयः॥४४॥

सीता—बहुमाणिदम्हि पुव्वविरहे। णिरवधि त्ति हा हदम्हि।
[बहुमानितास्मि पूर्वविरहे। निरवधिरिति हा हतास्मि।]

रामः—कष्टं भोः!

व्यर्थं यत्र कपीन्द्रसख्यमपि मे, वीर्यं हरीणां वृथा,
प्रज्ञा जाम्बवतो, न यत्र न गतिः पुत्रस्य वायोरपि।
मार्गं यत्र न विश्वकर्मतनयः कर्तुं नलोऽपि क्षमः
सौमित्रेरपि पत्रिणामविषये तत्र प्रिये! क्वासि मे॥४५॥

रूपविपर्यासः। वैलक्षण्यमेवाह—उपायानामिति। उपायानां सेनासंनाहसेतुबन्धादि-साधनानां भावात्सत्त्वादविरताः संतताः विनोदानां दुःखविस्मरणहेतूनां व्यतिकराः संबन्धा येषु तथोक्ताः तथाविधैः वीराणां सुग्रीवप्रभृतीनां विमर्दैः परस्परसंप्रहारै-र्जनित उत्पादितः जगतामत्यद्भुतरसो वीररसमयरसो येनेति तथोक्तः। वीररसाद-द्भुतरसस्योत्पत्तिरिति रसविदः। तदुक्तम्—'हास्यो भवति शृङ्गारात्करुणो रौद्रकर्मणः। अद्भुतश्च तथा वीराद्बीभत्साच्च भयानकः॥' इति। मुग्धे सुन्दरे अक्षिणी यस्या इति बहुव्रीहिः। 'न त्वामिहस्थां जानीते रामः कमललोचने। तेन त्वां नानयत्याशु शचीमिव पुरंदरः॥' इत्युक्तम्। स वियोगः पूर्वकालिकविरहः। रिपुघातावधिरभू-द्रावणसंहारपर्यन्तोऽभूत्। कटुः क्रूरः। तूष्णीं सह्यः उपायाद्यभावात् जोषभावेन सह्यः। अयं तु प्रविलयः इदानींतनवियोगः। पुनर्दर्शनाभावाभिप्रायेण वियोगस्य प्रलयत्वोक्तिः। निरवधिर्यावज्जीवभावीत्यर्थः॥ ४४॥ बहुमानितास्मि पूर्वविरहे-तुकबहुमानवत्यस्मि। रिपुघातावधिरिति रावणसंहारस्य तन्मूलकत्वोक्तेरिति भावः। 'न त्वदर्थं मया कृतम्' इति हि पूर्वं रामेणोक्तम्। निरवधिरिति हा हतास्मि। अस्य वियोगस्य निरवधित्वोक्तेः प्रत्याशा छिन्नेति भावः। व्यर्थमिति। यत्र प्रदेशे कपीन्द्रसख्यं सुग्रीवमैत्रम्। इदमुपलक्षणं सुग्रीवापेक्षयोपसर्जनत्वस्यापि। तदुक्तं रामायणे—'लोकनाथः पुरा भूत्वा सुग्रीवं नाथमिच्छति' इति, 'स रामो वानरेन्द्रस्य प्रसादमभिकाङ्क्षते' इति च। व्यर्थं निरर्थकम्। हरीणां वान-राणां वीर्यं पराक्रमः यत्र वृथा निष्प्रयोजकः। जाम्बवतः प्रज्ञा युक्तायुक्तकुशलता यत्र न सार्थिकेत्यध्याहारः। वायोः पुत्रस्य हनूमतः गतिरपि न सार्थिका। मार्गं सेतुं कर्तुम्। न क्षमः न योग्यः। सौमित्रेरपि लक्ष्मणस्य। अपिशब्दात् स्वस्य। पत्रिणां बाणानामविषये अगोचरे तत्र तथाविधे क्व कस्मिन्देशे असि भवसि॥ ४५॥

पाठा०—१ 'अविरत°'. २ 'जाम्बवतोऽपि यत्र न'.

टिप्प०—1 दैन्य सम्भवोतयवीर सीतावचनम्।

सीता—बहुमाणिदम्हि पुव्वविरहे । [बहुमानितास्मि पूर्वविरहे ।]

रामः—सखि वासन्ति ! दुःखायैव सुहृदामिदानीं रामदर्शनम् । कियच्चिरं त्वा रोदयिष्यामि ? तदनुजानीहि मां गमनाय ।

सीता—(सोद्वेगमोहं तमसामाश्लिष्य ।) हा भअवदि तमसे ! गच्छदि दाणिं अज्जउत्तो ? किं करिस्सं । (इति मूर्च्छति ।) [हा भवति तमसे ! गच्छतीदानीमार्यपुत्रः । किं करोमि ?]

तमसा—वत्से जानकि ! समाश्वसिहि समाश्वसिहि विधिस्तवानुकूलो भविष्यति । तदायुष्मतोः कुशलवयोर्वर्षर्द्धिमङ्गलानि संपादयितुं भागीरथीपदान्तिकमेव गच्छावः ।

सीता—भअवदि ! पसीद ! खणमेत्तं वि दुल्लहदंसणं जणं पेक्खामि । [भगवति ! प्रसीद । क्षणमात्रमपि दुर्लभदर्शनं जनं पश्यामि]

रामः—अस्ति चेदानीमश्वमेधसहधर्मचारिणी मे ।

सीता—(साक्षेपम् ।) अज्जउत्त ! का ? [आर्यपुत्र ! का ?]

वासन्ती—परिणीतमपि किम् ?

रामः—नहि नहि, हिरण्मयी सीताप्रतिकृतिः ।

सुहृदां मित्राणां रामदर्शनं दुःखायैव दुःखफलदमेव । रोदयिष्यामि रुदन्तीं करोमि । अनुजानीहि अनुमतिं कुरु ॥ वर्षर्द्धिमङ्गलानि द्वादशवर्षपूर्तिमङ्गलानि देवतापूजादीनि शुभानि । आयुष्मतोः कुशलवयोः कुशलवोद्देशेन संपादयितुमुत्पादयितुम् । भागीरथ्याः संबन्धद्योतनायेयमुक्तिः ॥ अश्वमेधस्य सहधर्मचारिणीति विग्रहः । दम्पत्योः सहाधिकारत्वात् । अश्वमेधनिरूपितकर्तृकत्ववती जायास्तीति भावः ॥ साक्षेपम् । आक्षेपश्चोदनं तेन सह वर्तत इत्यर्थः । क्रियाविशेषणम् । आर्यपुत्र, का ? सहधर्मचारिणीति शेषः ॥ परिणीतमपि भावे क्तः । परिणयोऽपि, किमिति काका योजनीयम् । सीतापरित्यागानन्तरं न केवलं शरीरधारणं किंतु परिणयोऽपि जातः किमिति समुच्चयार्थः । सीतावियोगे रामस्य शरीरधारणमाश्चर्यमिति प्रसिद्धम् । तदुक्तं हनूमता—'दुष्करं कृतवान्रामो हीनो यदनया प्रभुः । धारयत्यात्मनो देहं न शोकेनावसीदति ॥' इति, 'दुष्करं कुरुते रामो य इमां मत्तकाशिनीम् । विना सीतां महाबाहुर्मुहूर्तमपि जीवति ॥' इति च ॥ नहि नहि । परिणयप्रसक्तिरप्यनिष्टेति द्विरुक्त्या व्यज्यते । इदानीमपि त्वम् । 'स्वापहेतुरनुपाश्रितोऽन्यया' इत्युक्तरीत्या एकदारव्रतत्वं तथेदानीमेव प्रकटितमिति भावः । परित्याग एव शल्यं परित्यागशल्यम् । निष्कारणपरित्यागस्य प्रत्यवायहेतुत्वप्रयुक्तदुःखजनकत्वाच्छल्यत्वरूपणम् । ननु वास्तवदोषाभावेऽपि

पाठा०—१ 'बहुमण्णाविदम्हि तं पुव्वविरहं'. २ 'नन्वावामायुष्मतोः'. ३ 'वर्षवर्धनमङ्गलानि'. ४ 'अश्वमेधाय'

सीता—(सोच्छ्वासास्रम् ।) अज्जउत्त ! दाणिं सि तुमं । अम्महे, उक्खाइदं दाणिं मे परिच्चाअसल्लं अज्जउत्तेण । [आर्यपुत्र ! इदानीमसि त्वम् । अहो, उत्खातितमिदानीं मे परित्यागशल्यमार्यपुत्रेण ।]

रामः—तत्रापि तावद्बाष्पदिग्धं चक्षुर्विनोदयामि ।

सीता—धण्णा खु सा जा एव्वं अज्जउत्तेण बहुमण्णीअदि । जा एव्वं अज्जउत्तं विणोदयंदी आसाबंधणं खु जादा जीअलोअस्स । [धन्या खलु सा यैवमार्यपुत्रेण बहुमन्यते । यैवमार्यपुत्रं विनोदयन्त्याशाबन्धनं खलु जाता जीवलोकस्य ।]

तमसा—(सस्मितस्नेहार्द्रं परिष्वज्य ।) अयि वत्से ! एवमात्मा स्तूयते ।

सीता—(सलज्जम् ।) परिहसिदम्हि भअवदीए । [परिहसितास्मि भगवत्या ।]

वासन्ती—महानयं व्यतिकरोऽस्माकं प्रसादः । गमनं प्रति यथा कार्यहानिर्न भवति तथा कार्यम् ।

रामः—तथास्तु ।

सीता—पडिऊला दाणिं मे वासदी संवुत्ता । [प्रतिकूलेदानीं मे वासन्ती संवृत्ता ।]

तमसा—वत्से ! एहि गच्छावः ।

दोषवत्ता वृथारूपमिलभिशस्तिमता परित्यागो धर्मशास्त्रसिद्ध इति चेन्नैवम्, अग्निप्रवेशादिना मिथ्याभिशस्तेरनवकाशात् । उत्खातितम् उद्धृतम् ॥ तत्रापि हिरण्मयीसीताप्रतिकृतौ बाष्पदिग्धमश्रुणा लिप्तम् । विनोदयामि विस्मृतदुःखं करोमि । एव च सीताप्रतिकृतेरश्वमेधसहधर्मचारिणीत्वमानुषङ्गिकम् । मुख्यं तु चक्षुर्विनोदनमिति सूचितम् । एवं बहुमन्यते चक्षुर्विनोदहेतुत्वप्रयुक्तबहुमानविषयीक्रियते सा प्रतिकृतिः धन्या यैवमार्यपुत्रं विनोदयन्ती विस्मृतदुःखं कुर्वन्ती जीवलोकस्याशाबन्धनं रामजीवनप्रत्याशाहेतुत्वात्स्वविषयकाशाहेतुर्जाता सा धन्येत्यन्वयः ॥ परिष्वज्य आलिङ्ग्य । एवं 'धन्या खलु सा' इत्यादिपूर्वोक्तरीत्या आत्मा स्तूयते स्तुतिविषयीक्रियते । त्वयेति शेषः ॥ भगवत्या । तमसयेत्यर्थः ॥ अयं व्यतिकर एष समागमः । अस्माकं महान्प्रसादः । अस्मद्विषयानुग्रहप्रयोजित इत्यर्थः । यथा येन प्रकारेण कार्यस्य कर्तव्यस्य हानिर्लोपो न भवति तथा तेन प्रकारेण गमनं प्रति गमनोद्देशेन कार्यं यत्नः कर्तव्यः ॥ इदानीं वासन्ती मे प्रतिकूलानिष्टकारिणी संवृत्ता याता । रामगमनं प्रत्यनुज्ञाकरणा

पाठा०—१ 'परिच्चाअसल्लं'.

टिप्प०—1 अनेन वाक्येन धृतिः स्फोर्यते । 2 ईर्ष्या व्यज्यते वाक्येनानेन । 3 इदं च वाक्यं सीताया लज्जातिशयं द्योतयति । 4 असत्साविजृम्भितमिद सीतावाक्यम् ।

सीता—एव्वं करेम्ह । [एवं कुर्वः ।]

तमसा—कथं वा गम्यते ? यस्यास्तव,—

प्रत्युप्तस्येव दयिते तृष्णादीर्घस्य चक्षुषः ।
मर्मच्छेदोपमैर्यत्नैः संनिकर्षो निरुध्यते ॥ ४६ ॥

सीता—णमो सुकिदपुण्णजणदंसणिज्जाणं अज्जउत्तचलणकमलाणं । [नमः सुकृतपुण्यजनदर्शनीयाभ्यामार्यपुत्रचरणकमलाभ्याम् ।]

(इति मूर्च्छति ।)

तमसा—वत्से ! समाससिहि ।

सीता—(आश्वस्य ।) किअच्चिरं वा मेहंतरेण न पुण्णचंददंसणं ? [कियच्चिरं वा मेघान्तरेण न पूर्णचन्द्रदर्शनम् ?]

दिति भावः । एवं कुर्वः । गच्छाव इत्यर्थः । **यस्यास्तव । प्रत्युप्तस्येवेति** । तृष्णया अवलोकनस्पृहया । दीर्घस्य आयतस्य । दयिते रामे प्रत्युप्तस्येव कीलितस्येव स्थितस्य यस्यास्तव चक्षुषो नेत्रस्य संनिकर्षः दयिते संबन्धः । मर्मच्छेदोपमैर्हृदयादिप्रदेशकृन्तनसदृशैर्यत्नैर्निरुध्यते निवर्त्यते । तथाविधया त्वया कथं गम्यत इति पूर्वेणान्वयः । 'तृष्णादीर्घस्ये'त्युक्त्या दयिते 'प्रत्युप्तस्येवे'ति दयितपदविवक्षितरामस्यामृतसादृश्यं व्यज्यते ॥ ४६ ॥ **नम** इति । प्राकृते चतुर्थीस्थाने षष्ठीद्विवचनस्य बहुवचनत्वम् । सुकृतानि पुण्यानि यैस्ते सुकृतपुण्याः । सुकृतपुण्याश्च ते जनाश्चेति विग्रहे कर्मधारयः । तथाविधैः दर्शनीयाभ्यां सेवितुं शक्याभ्याम् । नतु मादृशपापकृज्जनदर्शनार्हाभ्यामित्यर्थः । 'न ते मनुष्या देवास्ते ये चारुशुभकुण्डलम्' इत्यादि दशरथोक्तरीत्या पुण्यकृद्दर्शनीयत्वं रामचरणयोरिति भावः । 'ममैव दुष्कृतं किंचिन्महदस्ति न संशयः' इत्युक्तरीत्या स्वस्याः पापकृत्त्वमिति तात्पर्यम् । अत्र सुष्ठु कृतं यैस्ते सुकृताः । तथाविधाश्च ते पुण्यजना राक्षसाश्चेति । ते विभीषणादयः इति कश्चित् । उक्तरीत्याश्रयणे कृतस्यापि संग्रह इति धिक् । इति मूर्च्छति मूर्च्छामभिनयति । कियच्चिरं मेघान्तरेण पूर्णचन्द्रदर्शनं मेघमध्ये पूर्णचन्द्रदर्शनम् ॥ 'वीरशृङ्गारयोरेकः प्रधानं यत्र वर्ण्यते' इत्यौत्सर्गिकस्य शृङ्गारवीरान्यतरप्राधान्यस्य वीरशृङ्गारौ प्रायिकाविलपवादेऽपि करुणरसप्राधान्यकरणे मानाभावः; रसान्तराणां सत्त्वात् । नह्यत्र विनिगमकमस्ति । येन करुणरसस्य प्राधान्यमुपपद्यते । किंच करुणस्य दुःखात्मकत्वेन रसत्वं नास्ति येन रसप्रधाननाटके तस्योक्तिसंभवः स्यादिति शङ्कां कविस्तमसावाक्यव्याजेन परिहरति-**अहो संविधानकमिति** । अपूर्वरूपकनिर्माणं विस्मयनीयमित्यर्थः । **एक** इति ।

तमसा—अहो संविधानकम्,—

एको रसः करुण एव निमित्तभेदा-
द्भिन्नः पृथक्पृथगिवं श्रयते विवर्तान्।
आवर्तबुद्बुदतरंगमयान्विकारा-
नम्भो यथा सलिलमेव हि तत्समस्तम्॥ ४७॥

रामः—अयि विमानराज! इत इतः।

(सर्वे उत्तिष्ठन्ति।)

रसते स्वाद्यत इति रसः काव्यानुशीलनाभ्यासवशविशदीभूतवर्णनीयतन्मयीभवनयोग्यसामाजिकमनोमुकुरभाव्यमानतया निर्भरानन्दसंविद्रूपः। करुणः इष्टजनवियोगजन्यदुःखातिशयः। एक एव सन्नपि निमित्तभेदात् व्यञ्जकविभावादिविच्छित्तिविशेषाद्भिन्नः विलक्षणः। पृथक्पृथग्विवर्तान् परस्परविलक्षणशृङ्गारादात्मना परिणामान्। 'व्यस्तपरिणामः स्याद्विवर्तः' इति कपिलः। श्रयते भजते। एकस्यानेकधा विकारमात्रे दृष्टान्तमाह—आवर्तेति। आवर्तः जलस्य भ्रमः, बुद्बुदः कुड्मलाकारजलसंस्थानविशेषः, तरङ्गः भङ्गः एतद्रूपान्विकारान्। अवस्थान्तराणीत्यर्थः। तत्समस्तमावर्तादिकं सर्व सलिलमेव जलमेव। तरङ्गादीनां जलविवर्तत्वाभावाद्विकारमात्रे दृष्टान्तार्थकमिदम्। अत एव विवर्तानित्युक्तिः। इदमत्र कवेर्मतम्—'यद्यपि शृङ्गार एक एव रस इति शृङ्गारप्रकाशकारादिमतम्, तथापि प्राचुर्याद्रामादिनिरतिशयसाधारण्यात्करुण एक एव रसः। अन्ये तु तद्विकृतयः' इति। करुणस्यानुकार्ये रामादौ दुःखरूपत्वेऽपि सहृदयानामानन्दात्मना परिणमतीत्युक्तरीत्या सामाजिके आनन्दरूपत्वमेव। तर्हि भावकानां करुणात्मककाव्यश्रवणे अश्रुधाराविर्भावः कथमिति चेदाहुः—संभोगसमये स्त्रीणामधरदंशनादौ सीत्कारवदत्राप्युपपत्तिः। 'सुखेऽपि दुःखवदुपचारः कुट्टमितम्' इति तल्लक्षणात्। यद्यस्य सहजदुःखात्मकत्वं स्यात्, न कोऽपि सामाजिकस्तत्र प्रवर्तेत, ततश्च करुणैकरसानां रामायणादीनामुच्छेदप्रसङ्गः स्यात्। तस्माद्रसान्तरवत्करुणस्याप्यानन्दात्मकत्वमेवेति। एवं च रसान्तरापेक्षया प्रकृतित्वमेव करुणस्य प्राधान्ये विनिगमकं शृङ्गारवीरयोः प्रायिकत्वोक्तेस्तदभावेऽसंवेद्यचित्तत्वादिति। यद्वा,—एको रसः रसशब्दवाच्यः। 'अन्न ओदनं पचति' 'अस्य सूत्रस्य पटो वातव्यः' इत्यादाविव भाविनीं वृत्तिमाश्रित्य 'रस'शब्दप्रयोगः। एवम् 'पुटपाक-

---

पाठा०—१ 'वाश्रयते'.

टिप्प०—1 विप्रलम्भानुप्राणितः करुणोऽयं रस इति भावः। तल्लक्षणं चोक्तं वाचस्पतिमिश्रप्रमुखैः—'यूनोरेकतरस्मिन् गतवति लोकान्तरं पुनर्लभ्ये। विमनायते यदैकस्तदा भवेत् करुणविप्रलम्भः॥' इति।

तमसावासन्त्यौ—(सीतारामौ प्रति।)

अवनिरमरसिन्धुः सार्धमस्मद्विधाभिः
स च कुलपतिराद्यश्छन्दसां यः प्रयोक्ता।
स च मुनिरनुयातारुन्धतीको वसिष्ठ-
स्तव वितरतु भद्रं भूयसे मङ्गलाय॥ ४८॥

(इति निष्क्रान्ताः सर्वे।)

तृतीयोऽङ्कः।

प्रतीकाशो रामस्य करुणो रसः' इत्यत्रापि बोध्यम्। करुणः अनुकार्यरामादिगतेष्टजनवियोगजन्यदुःखातिशयः। एक एव सन्नपि निमित्तभेदात्सखित्वपतित्वपत्नीत्वाद्युपाधिभेदाद्भिन्नः विलक्षण इव पृथक्पृथग्विवर्तान् श्रयते। वासन्तीसीतारामप्रभृतिषु परस्परविलक्षणावस्थाविशेषान्भजति अत्र 'विवर्त'शब्दो विकारमात्रपरः। एवं दृष्टान्तसामञ्जस्यमुपपद्यते। शेषं पूर्ववत्। अस्मिन् पक्षे रसान्तरसत्त्वे करुणरसप्राधान्यं तूक्तयुक्त्या ग्रन्थाद्बहिः समर्थनीयम्। तथा चैतादृशकरुणरसप्रधानत्वादपूर्वोऽयं कथासंनिवेश इति पूर्वेणान्वयः॥ ४७॥ तमसावासन्त्यौ सीतारामौ प्रति यथासंख्यं प्रति उद्दिश्य। अवनिरिति। अवनिः भूमिः। अमरसिन्धुः गङ्गा। अस्मद्विधाभिः। तमसापक्षे,–मुरलागोदावरीप्रभृतिभिरित्यर्थः। वासन्तीपक्षे,–अन्याभिर्देवताभिः सहेत्यर्थः। यश्छन्दसां प्रयोक्ता वेदानां प्रवक्ता आद्यः कुलपतिः स च सूर्यश्च। मुनिर्मननशीलः स प्रसिद्धः। अनुयातानुगता अरुन्धती यमिति विग्रहे द्वितीयाबहुव्रीहिः। 'शेषाद्विभाषा' (पा. ५।४।१५४) इति कप्। 'न कपि' (पा. ७।४।१३) इति ह्रस्वप्रतिषेधः। तथाविधो वसिष्ठः। तव भूयसे प्रचुराय मङ्गलाय भद्रं मङ्गलं वितरतु ददातु। अत्र गर्भबीजस्य श्रपिश्रेयोवितरणरूपस्योद्भेदनादाक्षेपो नाम संध्यङ्गमुक्तं भवति। 'यदत्रोच्छृङ्खलं किंचित्कविनानेन कथ्यते। निरङ्कुशतया तत्तु समाधेयं मनीषिभिः॥ भावस्य तु गभीरत्वात्सा कश्चिदिह कथ्यते। कोशव्याकरणे प्रायेणोच्यते ग्रन्थगौरवात्'॥ ४८॥

याधूलवंशजनुषो भूमारनिवामराघवार्यस्य।
उत्तररामचरित्रव्याख्यायामवनिस्तृतीयोऽङ्कः॥

इति श्रीवाधूलवीरराघवविरचितायां भवभूतिभावतलस्पर्शिनी-
समाख्यायामुत्तररामचरितव्याख्यायां तृतीयोऽङ्कः॥

पाठा०–१ 'त्वयि'.

चतुर्थाङ्कस्य कथावस्तु

प्रस्तुतेऽङ्के सौधातकि-दण्डायनाख्यवाल्मीकिशिष्यप्रवेशात्मके मिश्रविष्कम्भके तत्संवादेनेदमावेदितं भवति । ऋष्यशृङ्गमुनिना समुपक्रान्तं द्वादशवार्षिकं सत्रं सांप्रतमेव समवसितम् । तत्रोपस्थितो ह्यरुन्धतीसहितो भगवान्वसिष्ठो महाराजदशरथस्य कौसल्याप्रमुखान्दारानधिष्ठाय वाल्मीकिराश्रमं प्रति संप्राप्तः । एतस्मिन्नेवावसरे विदेहाधिपतिर्जनकोऽपि स्वप्रियसुहृदं महर्षिं वाल्मीकिमुनिं द्रष्टुं तत्र समायातः । कौसल्यादिस्वसुहृत्परिवारमीलनेऽपि पुरावृत्तेन दूनचेता जनको निर्विंदतामाससाद । किंच वैदेहीवियोगाद्विमनस्कान्सर्वानपि समवलोक्यारुन्धती 'सर्वं शुभोदर्कं भविष्यति' इति तत्रभवतो वसिष्ठमुनेराश्वासननिवेदनेन तानखिलान्सद्य समाहितवती । एतस्मिन्नेवान्तरे रूपलावण्यविनयादिभिः पितृसाम्यभाजं रामात्मजं शिशुं लवं समवलोक्य 'कोऽयं कुमारः ?' इति सकुतूहलवृत्तिभिः कौसल्यादिभिरुत्कण्ठया संपृष्टो वाल्मीकिराह 'ज्ञातव्यमेतदवसरे भवद्भिः' इति । अथाश्रमस्था बटवः स्वाश्रमाभ्यासे पर्यटमानं तुरङ्गमवलोक्य 'अश्वोऽश्व इति कोऽपि भूतविशेषः' इति तमदृष्टपूर्वं पशुं मन्यमानास्तद्दर्शनार्थं लवं प्रसभमाहूतवन्तः । स च महाराजाधिराजस्य रामचन्द्रस्याश्वमेधिकोऽयमश्वः शतसंख्यैः कवचिभिः दण्डिभिश्च रक्षित इति पूर्वमेव प्रणीतेन वाल्मीकिरामायणीयाश्वमेधिकेतिवृत्तेन तान्परिचाययामास । लवश्च विजयपताकावर्तीनि सर्वक्षत्रपरिभावीनि संदीपनान्यक्षराणि दृष्ट्वा 'अपि किमक्षत्रिया पृथिवी यदेवमुद्घोष्यते ?' इति संप्रकोपात् वदन् 'उपघ्नन्तो नयतैनमश्वम्, एष आश्रमवर्तिमृगाणां मध्येचरो भवतु' इति बटूनाज्ञापयामास । स्वयं च राजयोधाननुरुन्धन्नाततज्यो बभूव ।

(ततः प्रविशतस्तापसौ ।)

एकः—सौधातके ! दृश्यतामद्य भूयिष्ठसन्निधापितातिथिजनस्य समधिकारम्भरमणीयता भगवतो वाल्मीकेराश्रमपदस्य । तथा हि,—

नीवारौदनमण्डमुष्णमधुरं सद्यःप्रसूतप्रिया-
पीतादभ्यधिकं तपोवनमृगः पर्याप्तमाचामति ।
गन्धेन स्फुरता मनागनुसृतो भक्तस्य सर्पिष्मतः
कर्कन्धूफलमिश्रशाकपचनामोदः परिस्तीर्यते ॥ १ ॥

तत इति । तापसौ तपःशीलौ । एकः, तयोरन्यतर इत्यर्थः । सुधातुरपत्यं सौधातकिः । 'सुधातुरकङ् च' (पा. ४।१।९७) इत्यकङादेश इञ्प्रत्ययश्च । तस्य संबुद्धिः सौधातके इति । अद्य मध्याह्ने भूयिष्ठं यथा भवति तथा सन्निधापितः निकटागमितः अतिथिजनो यस्मिन्निति तथोक्तस्य भगवतो वाल्मीकेः ज्ञानदानक्रियादिपूर्णस्य प्राचेतसस्य यदाश्रमपदं आश्रमस्थानं तस्य समधिकारम्भेण प्रचुरतरमारभ्यमाणातिथिजनसत्कारादिना रमणीयता हृद्यता दृश्यतां चक्षुर्विषयं क्रियताम् । त्वयेति शेषः ।

नीवारेति । तपोवनमृगः तपोवनाश्रयो मुनिसंवर्धितहरिणः । सद्यः समानेऽह्नि । तस्मिन्दिन इत्यर्थः ॥ प्रसूता प्रसववती । कर्तरि क्तः । तथाविधया प्रियया प्रियविषयहरिण्या पीतात् पानं प्राप्य । भावे क्तः । ल्यब्लोपे पञ्चमी । अभ्यधिकं अवशिष्टं प्रचुरं वा हरिणीकर्तृकं वा पानं प्राप्यापि प्रचुरमित्यर्थः । उष्णं च तत् मधुरं च माधुर्ययुक्तं चेति विशेषणसमासः । तथाविधं नीवारौदनमण्डं नीवारो धान्यविशेषः, तत्संबन्ध्योदनस्य यन्मण्डं घनीभूतद्रवविशेषः तत्पर्याप्तं यावदिच्छानिवृत्ति आचामति पिबति । यद्वा,—'सद्यःप्रसूतप्रियापीतात्' इति हेतौ पञ्चमी । सद्यःप्रसूतप्रियाकर्तृकपानाद्धेतोः अभ्यधिकं यथा भवति तथा प्रचुरं यथा भवति तथा उष्णं मधुरं चेत्यर्थः । अत्र 'सद्यःप्रसूतत्वम्' उष्णत्वे हेतुः । 'उष्णत्वं' हि प्रसवपरिक्लान्तशरीरक्लेशपरिहारकम् ।

सौधातकिः—साअदं अणेअपआराणं जिण्णकुच्छाणं अणज्झअकालणाणं तपोधणाणं । [स्वागतमनेकप्रकाराणां जीर्णकूर्चानामनध्यायकारणानां तपोधनानाम् ।]

प्रथमः—(विहस्य ।) अपूर्वः खलु बहुमानहेतुर्गुरुषु सौधातके ! ।

सौधातकिः—भो दंडाअण ! किंणामहेओ दाणिं एसो महत्तस्स इत्थिआसत्थस्स धुरंधरो अज्ज अदिही आअदो ? [भो दण्डायन ! किंनामधेय इदानीमेष महतः स्त्रीसार्थस्य धुरंधरोऽद्यातिथिरागतः ?]

दण्डायनः—धिक्प्रहसनम् । नन्वयमृष्यशृङ्गाश्रमादरुन्धतीं पुरस्कृत्य महाराजदशरथस्य दारानधिष्ठाय भगवान्वसिष्ठः प्राप्तः । तत्किमेवं प्रलपसि ?

सौधातकिः—हुं वसिट्ठो ? [हुं वसिष्ठः ?]

दण्डायनः—अथ किम् ।

सौधातकिः—मए उण जाणिदं को वि वग्घो विअ एसो त्ति । [मया पुनर्ज्ञातः कोऽपि व्याघ्र इवैष इति ।]

अनुक्षणं प्रसर्पन् कर्कन्धूफलमिश्रशाकपचनामोदः वर्मी अभिव्याप्यत इति व्याख्येयम् ॥ १ ॥ साअदमिति । स्वागतम् । सकारस्य न लुक् । गकारस्य प्रायो लुक् । 'कगचजतदपयवाम्–' (हे. प्रा. १।१७७) इति प्राकृतव्याकरणसूत्रेण लोपः । अकारस्य ईषत्स्पृष्टतया श्रुतिरपि । सूत्रे प्रायोग्रहणाद्वकारस्य न लुक् । अनेकप्रकाराणाम्, बहुविधानामित्यर्थः । पूर्ववदेव लोपः । यः श्रुतिर्बोध्यम् । अत्र चकारशब्दस्य 'घञि वा' (प्रा. १।२।३८) इति प्राकृतव्याकरणसूत्रेण पूर्वस्य वैकल्पिकत्वात् 'पआर' इति दीर्घः । पआराणं इति त्वासुपोरिति सूत्रेणानुस्वारः । अनध्ययननिमित्तानामित्यर्थः । शिष्टानध्ययनस्य धर्मशास्त्रसिद्धत्वादिति भावः । जीर्णकूर्चानां शिथिलभ्रूमध्यानाम् । जीर्णशब्दे 'संयोगे च' (हे.प्रा. १।८४) इति प्राकृतव्याकरणसूत्रेण ह्रस्वः । गुरुषु वसिष्ठादिषु । भो दंडाअणेति । नामधेयं तस्य संबुद्धिः । महतः प्रचुरस्य स्त्रीसार्थस्य अङ्गनासमूहस्य धुरंधरो निर्वाहकोऽतिथिरागतः किंनामधेय इत्यन्वयः । दंडाअणेति स्वरस्य बिन्दवमिति ह्रस्वः । किंणामहेअ इत्यत्र 'खघथधभाम्' (हे. प्रा. १।१८७) इति सूत्रेण धकारस्य हकारः । 'स्त्री'शब्दस्य 'स्त्रीभगिनीदुहितृवनितानांइत्थीबहिणीदुआविळआ' (प्रा. १।३।९७) इति प्राकृतसूत्रेण इत्थीआदेशे कप्रत्ययस्य कलोपः । सार्थस्येत्यत्र 'संयोगे' (प्रा. १।२।४०) इति ह्रस्वः । धिक्प्रहसनं हासहेतुभूतं त्वदीयवचः । निन्दनीयमिति भावः । दारान् कौसल्याप्रभृतीन् । अधि-

---

पाठा०–१ 'अकालणाणं'. २ 'ठविरसत्थस्स'. ३ 'दाण्डायनः', 'भाण्डायनः'. ४ 'वग्घो वा विओ वा'.

दण्डायनः—अनिवृत्तमांसानामेवं कल्पं व्याहरन्ति केचित्। निवृत्तमांसस्तु तत्रभवान् जनकः ।

सौधातकिः—किंणिमित्तं ? [किंनिमित्तम् ?]

दण्डायनः—यद्देव्याः सीतायास्तादृशं देवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः, तस्य कतिपयसंवत्सरश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य ।

सौधातकिः—तदो किंति आअदो ? [ततः किमित्यागतः ?]

दण्डायनः—संप्रति च प्रियसुहृदं भगवन्तं प्राचेतसं द्रष्टुम् ।

सौधातकिः—अवि अज्ज संबंधिणीहिं समं णिउँत्तं दंसणं से ण वेत्ति ? [अपि अद्य संबन्धिनीभिः समं निर्वृत्तं दर्शनमस्य न वा? ।]

दण्डायनः—संप्रत्येव भगवता वसिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्यरुन्धती प्रहिता । यथा स्वयमुपेत्य स्नेहादयं द्रष्टव्य इति ।

सौधातकिः—जह एदे ट्ठविरा परप्परं एव्व मिलिदा, तह अम्हे वि वडुहिं सह मिलिअ अणज्झाअमहुस्सवं खेलंतो मणेम्ह । अह कुत्थ सो जणओ ? । [यथैते स्थविराः परस्परमेव मिलिताः, तथावामपि बटुभिः सह मिलित्वाऽनध्यायमहोत्सवं खेलन्तौ मानयावः। अथ कुत्र स जनकः?]

दण्डायनः—तथायं प्रचेतसवसिष्ठावुपास्य संप्रत्याश्रमस्य बहिर्वृक्षमूलमधितिष्ठति । य एषः,—

एव्व' (प्रा.३।२।१८) इति प्राकृतसूत्रेण एव्वादेशः। 'दधिमधुभ्याम्' इत्यनेन दधिमधुसंसृष्टमित्यापस्तम्बवचनमभिप्रेतम् । निर्वर्तितः निष्पादितः । वत्सतरी पुनरिति । विसर्जिता मुक्ता, न त्वालब्धेत्यर्थः॥ **व्याहरन्ति केचिदिति**। ये चिद्धर्मशास्त्रकारा आपस्तम्बादयः । एवंकल्पं मांसवर्जं मधुपर्कानुष्ठानपरमन्थं व्याहरन्ति वदन्ति । निवृत्तमांसो वर्जितमांसः ॥ **यद्देव्या** इत्यादि । वैखानसः वानप्रस्थः । चन्द्रद्वीपतपोवने तपस्तप्यमानस्य तपश्चरतः कतिपयः संवत्सरः, गत इति शेषः । चन्द्रद्वीप इति कश्चिद्द्वीपविशेषः ॥ प्राचेतसं वाल्मीकिम् ॥ संबन्धिनीभिः दर्शनं निर्वृत्तं न वेति ज्ञायते अपीति योजना ॥ अपि अयम् । जनक इत्यर्थः । स्नेहाद्द्रष्टव्यः प्रेम्णा दर्शनीयः ॥ स्थविरा वृद्धाः । अनध्यायः अध्ययनाभावः, स एव महोत्सवः । आनन्दहेतुत्वा-

---

पाठा०—१ 'कतिपये संवत्सराः'. २ 'चिरन्तनप्रियसुहृदं'. ३ 'संवृत्तं'. ४ 'यत्'. ५ 'तथायं मह्मवादी पुराणराजर्षिः'.

टिप्प०—1 'दधि सर्पिर्जलं क्षौद्रं सिता चैतैश्च पञ्चभिः । प्रोच्यते मधुपर्कः' इति निर्मांसो मधुपर्कः । वसिष्ठस्तु-क्षत्रियाभ्यागताय सर्पिष्मदन्नं पचतीति इत्याह ।

दण्डायनः—आः, किमुक्तं भवति ?

सौधातकिः—जेण परावडिदेण एव्व सा वराई कविला कल्लाणी बलामोडिअ मडमडाइआ। [येन परापतितेनैव सा वराकी कपिला कल्याणी बलात्कृत्य मडमडायिता।]

दण्डायनः—[1]समांसो मधुपर्क इत्याम्नायं बहुमन्यमानाः [2]श्रोत्रियायाभ्यागताय वत्सतरीं महोक्षं वा पचन्ति गृहमेधिनः। तं हि धर्मं धर्मसूत्रकाराः समामनन्ति।

सौधातकिः—भो णिग्गिहीदोसि। [भो निगृहीतोऽसि।]

दण्डायनः—कथमिव ?

सौधातकिः—जेण आअदेसु वसिट्ठमिस्सेसु वच्छदरी विससिदा। अज्ज एव्व पच्चाअदस्स राएसिणो जणअस्स भअवदा वम्मीइणा दहिमहूहिं एव्व णिव्वत्तिदो महुवक्को। वच्छतरी उण विसज्जीदा। [येनागतेषु वसिष्ठमिश्रेषु वत्सतरी विशसिता। अद्यैव प्रत्यागतस्य राजर्षेर्जनकस्य भगवता वाल्मीकिना दधिमधुभ्यामेव निर्वर्तितो मधुपर्कः। वत्सतरी पुनर्विसर्जिता।]

घाय। तन्नियामको भूत्वेत्यर्थः। प्रलपसि अनर्थकं वदसि॥ हुमिति प्रश्ने॥ अथ किमित्यङ्गीकारे॥ एष कोऽपि व्याघ्र इति मया ज्ञातमित्यन्वयः। 'संयोगे' (है. प्रा. १।८४) इति ह्रस्वः॥ किमुक्तं भवति कुत एवमुक्तम्?॥ हि तेन वसिष्ठेन हि। वराकी प्रतिकूलदैवा। कपिला नाम गवामवान्तरजातिः। कल्याणी वत्सतरी। द्विहायनीत्यर्थः। बलात्कृत्य मडमडायिता। 'आलम्भन' शब्दानुकरणमिदम्। तथाविधशब्दयुक्ता कृतेत्यर्थः। आलब्धेति यावत्। मडायितेत्यर्थः। 'मृद्नातेर्मट्टपरिहट्टपडवमलजचडमलमडा' (२।४।१५२) इति प्राकृतव्याकरणसूत्रेण मृद्धातोर्मट इत्यादेशः। 'तेन व्याघ्र इति ज्ञातम्' इति पूर्वेण संबन्धः॥ आम्नायं धर्मशास्त्रम्। महांश्चासौ उक्षा चेति विग्रहः। निपातनादकारान्तत्वम्। पचन्ति श्रपयन्ति। समामनन्ति उपदिशन्ति। अत्र मया व्याघ्र इत्यादिना गुरुतिरस्कृतिरमन्व उक्तः॥ भो निगृहीतोऽसि पराजितोऽसि॥ आगतेष्वेवेति। 'मिश्र'शब्दः पूज्यताद्योतकः। 'एतार्थे

पाठा०—१ 'महाजं वा निर्वपन्ति'.

टिप्प०—1 समांसमधुपर्कविषये त्वपरार्के—'महान्तमुक्षाणं बलीवर्दं तदुक्षाणं वा श्रोत्रियाय मधुपर्कार्हाय गृहमागतायोपकल्पयेत् पचेत्, संस्कुर्यादिति भावः' इत्यादि।

2 यथोक्तं याज्ञवल्क्येन (१।१०९) 'महोक्षं वा महाजं वा श्रोत्रियायोपकल्पयेत्।' बह्वृचब्राह्मणेऽपि 'यावन्तः खलु वै राजानमनुयन्ति तेभ्यः सर्वेभ्य आतिथ्यं क्रियते, अत्र महोक्षोपकल्पनेन मधुपर्को विधीयते' इति।

3 'मधुपर्के च यज्ञे च पितृदैवतकर्मणि। अत्रैव पशवो हिंस्या नान्यत्रेत्यब्रवीन्मनुः' 'एष्वर्थेषु पशून्हिंसन् वेदतत्त्वार्थविद् द्विजः। आत्मानं च पशुं चैव गमयत्युत्तमां गतिम्॥' (मनुः ५।४१-४२) इति धर्मसूत्रकारवचनात्।

दण्डायनः—अनिवृत्तमांसानामेवं कल्पं व्याहरन्ति केचित् । निवृत्तमांसस्तु तत्रभवान् जनकः ।

सौधातकिः—किणिमित्तं ? [किंनिमित्तम् ?]

दण्डायनः—यद्देव्याः सीतायास्तादृशं दैवदुर्विपाकमुपश्रुत्य वैखानसः संवृत्तः, तस्य कतिपयसंवत्सरश्चन्द्रद्वीपतपोवने तपस्तप्यमानस्य ।

सौधातकिः—तदो किंति आअदो ? [ततः किमित्यागतः ?]

दण्डायनः—संप्रति च प्रियसुहृदं भगवन्तं प्राचेतसं द्रष्टुम् ।

सौधातकिः—अवि अज्ज संबंधिणीहिं समं णिउँत्तं दंसणं से ण वेत्ति ? [अद्य संबन्धिनीभिः समं निर्वृत्तं दर्शनमस्य न ? ।]

दण्डायनः—संप्रत्येव भगवता वसिष्ठेन देव्याः कौसल्यायाः सकाशं भगवत्यरुन्धती प्रहिता । यथा स्वयमुपेत्य स्नेहादयं द्रष्टव्य इति ।

सौधातकिः—जह एदे ट्टविरा परप्परं एव्व मिलिदा, तह अम्हे वि वडुहिं सह मिलिअ अणज्झाअमहुस्सवं खेलंतो मणेम्ह । अह कुत्थ सो जणओ ? । [यथैते स्थविराः परस्परमेव मिलिताः, तथावामपि बटुभिः सह मिलित्वाऽनध्यायमहोत्सवं खेलन्तो मानयावः। अथ कुत्र स जनकः?]

दण्डायनः—तथायं प्राचेतसवसिष्ठावुपास्य संप्रत्याश्रमस्य बहिर्वृक्षमूलमधितिष्ठति । य एषः,—

एव्व' (प्रा.३।२।१८) इति प्राकृतसूत्रेण एव्वादेशः। 'दधिमधुभ्याम्' इत्यनेन दधिमधुसंसृष्टमित्यापस्तम्बवचनमभिप्रेतम् । निर्वर्तितः निष्पादितः । वत्सतरी पुनरिति । विसर्जिता मुक्ता, न त्वालब्धेत्यर्थः॥ **व्याहरन्ति केचिदिति** । के चिद्धर्मशास्त्रकारा आपस्तम्बादयः । एवंकल्पं मांसवर्जं मधुपर्कानुष्ठानपरग्रन्थं व्याहरन्ति वदन्ति । निवृत्तमांसो वर्जितमांसः ॥ **यद्देव्या** इत्यादि । वैखानसः वानप्रस्थः । चन्द्रद्वीपतपोवने तपस्तप्यमानस्य तपश्चरतः कतिपयः संवत्सरः, गत इति शेषः । चन्द्रद्वीप इति कश्चिद्द्वीपविशेषः ॥ प्राचेतसं वाल्मीकिम् ॥ संबन्धिनीभिः दर्शनं निर्वृत्तं न वेति ज्ञायते अपीति योजना ॥ अपि अयम् । जनक इत्यर्थः । स्नेहाद्द्रष्टव्यः प्रेम्णा दर्शनीयः॥ स्थविरा वृद्धाः । अनध्यायः अध्ययनाभावः, स एव महोत्सवः । आनन्दहेतुत्वा-

---

पाठा०—१ 'कतिपये संवत्सराः'. २ 'चिरन्तनप्रियसुहृदं'. ३ 'संवृत्तं'. ४ 'यत्'. ५ 'तथायं महावादी पुराणराजर्षिः'.

टिप्प०—1 'दधि सर्पिर्जलं क्षौद्रं सिता चैतैश्च पञ्चभिः । प्रोच्यते मधुपर्कः' इति निर्मांसो मधुपर्कः । वसिष्ठस्तु-क्षत्रियाभ्यागताय सर्पिष्मदन्नं पचतीति इत्याह ।

हृदि नित्यानुपक्तेन सीताशोकेन तप्यते ।
अन्तःप्रसृप्तदहनो जरन्निव वनस्पतिः ॥ २ ॥

(इति निष्क्रान्तौ ।)

इति मिश्रविष्कम्भः।

(ततः प्रविशति जनकः ।)

जनकः—

अपत्ये यत्तादृग्दुरितमभवत्तेन महता
विषक्तस्तीव्रेण व्रणितहृदयेन व्यथयता ।
पटुर्धारावाही नव इव चिरेणापि हि न मे
निकृन्तन्मर्माणि क्रकच इव मन्युर्विरमति ॥ ३ ॥

कथं एवं नाम जरया दुःखेन च दुरासदेन भूयः पराकसांतपनप्रभृतिभिस्तपोभिः [1]शोषितान्तःशरीरधातोरवष्टम्भ एव महानद्यापि मम दग्धदेहो न पतति । अन्धतामिस्रा ह्यसूर्या नाम ते लोकाः प्रेत्य तेभ्यः प्रति-

---

दुरसवत्वरूपणम् ॥ उपास्य परिचर्य ॥ हृदीति । य एषः । जनक इत्यर्थः । हृदि नित्यानुपक्तेन नित्यलग्नेन सीताशोकेन सीतानिमित्तदुःखेन तप्यते तप्तो भवति । जरन् वृद्धः अन्यः प्रज्वलद्वह्निः वनस्पतिः पुष्पहीनफलवृक्षः ॥ २ ॥ मिश्रविष्कम्भः। संस्कृतप्राकृतात्मकविष्कम्भ इत्यर्थः ॥ अपत्य इति । यस्मात् अपत्ये । सीतायामित्यर्थः । तादृग्दुरितं कौलीनरूपपापं व्यसनं वाऽभवत् । तीव्रेणातिप्रचुरेण तेन दुरितेन व्यथयता दुःखं प्रापितेन व्रणितहृदयेन विपक्तः प्रसक्तः । पटुः तीक्ष्णः । धारया वहतीति धारावाही । अत्यन्तनैरन्तर्येण प्रवाहीत्यर्थः । चिरेणापि चिरकालेनापि नव इव स्थितः मर्माणि हृदयादीनि निकृन्तन् छिन्दन् क्रकच इव कराल इव स्थितः । मन्युः शोकः कोपो वा न विरमति न शाम्यति ॥ ३ ॥ जरया वयोहान्या । दुरासदेन दुःसहेन । दुःखेन सीताविश्लेषजेन । पराको द्वादशदिनोपवासकृच्छ्रम्, सांतपनं चान्द्रायणविशेषः, एवमादिभिः कायशोधकनियमविशेषैः शोषितान्तःशरीरधातोर्मे कथमवष्टम्भ एव पातप्रतिबन्धकावलम्बनमेव । दग्धदेहः हतहृदयमितिवत् निन्दायां 'दग्ध'शब्दः । अद्यापि न पततीति योजना । अनेकसामग्रीसमवधानेऽपि पाताभावो विस्मयनीय इति भावः । तर्हि मृत्युपतनादिना मुच्यतामित्यत्राह—अन्धतामिस्रा इति । आत्मानं घ्नन्तीति आत्मघातिन इति विग्रहः । 'सुप्यजातौ'

पाठा०—१ 'आत्तरसधातुरनवष्टम्भो नाद्यापि'.

टिप्प०—1 'यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । पराको नाम कृच्छ्रोऽयं सर्वपापापनोदनः' (मनुः ११।२१५) इत्यादिनोक्तं तपः ।

2 कृन्तति पापं कृच्छ्रं नाम तपः, संतपने भवं सांतपनम्, 'गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम्' (मनुः ११।२१२) इत्युक्तम् ।

विधीयन्ते य आत्मघातिन इत्येवमृषयो मन्यन्ते । अनेकसंवत्सरातिक्रमेऽपि प्रतिक्षणपरिभावनास्पष्टनिर्भासः प्रत्यग्र इव न मे दारुणो दुःखसंवेगः प्रशाम्यति । अपि मातः देवयजनसंभवे सीते ! ईदृशस्ते निर्माणभागः परिणतः, येन लज्जया स्वच्छन्दमप्याक्रन्दितुं न शक्यते । हा पुत्रि !

अनियतरुदितस्मितं विराज-
त्कतिपयकोमलदन्तकुड्मलाग्रम् ।
वदनकमलकं शिशोः स्मरामि
स्खलदसमञ्जसमञ्जु जल्पितं ते ॥ ४ ॥

भगवति वसुंधरे ! सत्यमतिदृढासि,—

त्वं वह्निर्मुनयो वसिष्ठगृहिणी गङ्गा च यस्या विदु-
र्माहात्म्यं यदि वा रघोः कुलगुरुर्देवः स्वयं भास्करः ।

(पा. ३।२।७८) इति णिनिः । ये बलात्क्रियन्ते तेभ्यः तान् पातयितुम् । क्रियार्थे चतुर्थी । असूर्या सूर्यरहिता अन्धतामिस्रा अन्धतमसमयास्ते प्रसिद्धा लोका नरकविशेषाः प्रेत्य मरणानन्तरं प्रतिविधीयन्ते इत्येवमृषयो मन्यन्ते । 'असुर्या नाम ते लोका अन्धेन तमसावृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः' (ईशा. ३) इति श्रुतिः । इति धर्मशास्त्रकाराणां मतम् । प्रतिक्षणपरिभावनया संततविचारेण 'भू अवकल्कने' अवकल्कनं चिन्तनम् । स्पष्टनिर्भासः विशदप्रकाशः । प्रत्यग्र इव नव्य इव न प्रशाम्यति न नश्यति । निर्माणभागः सृष्टिफलम् । येन निर्माणभागेनाक्रन्दितुमपि रोदितुमपि । 'अपि'शब्दात्क्रियान्तरानर्हत्वं सूच्यते । दोषवादहेतुकत्वात्त्यागस्येति भावः । अनियतेति । अनियतरुदितस्मितं अव्यवस्थितरोदनहासनम् । विराजन्तः कतिपये त्रिचतुराः कोमला ललिताः दन्ता एव कुड्मलाग्राणि यस्य तथोक्तं तेन 'कुड्मलाग्र'शब्दस्य न पूर्वनिपातः । न वा 'दन्त'शब्दस्य दत्रादेशः । स्खलदपूर्णमसमञ्जसं पूर्वापरसंगतिरहितं मञ्जु सुन्दरं जल्पितं वचनं यस्य तत्तथोक्तं ते वदनकमलकं वदनमेव कमलम् । अनुकम्पायां कन् । स्मरामि उत्कण्ठापूर्वकं चिन्तयामि । अत्रानियतरुदितस्मिते स्खलदसमञ्जसमिति विशेषणानुगुण्याद्वदनकमलकमित्यत्र परिणामालंकारः; केवलकमलस्य प्रकृतक्रियान्वयित्वानुपपत्तेः । 'परिणामः क्रियार्थश्चेद्विषयी विषयात्मना' (कुवल० ६।२१) इति लक्षणात् । दन्तकुड्मलाग्रमित्यत्रापि क्रियान्वयविवक्षायां परिणामः रूपकं वा ॥ ४ ॥ भगवतीति । अतिदृढासि कठिनासीति सत्यम् । अत्र 'यो वा बिभर्ति काठिन्यं तस्मै भूम्यात्मने नमः' इति वचनं द्रष्टव्यम् । तव वसुंधरात्वप्रयुक्तधैर्येण पुत्रीनाशोऽप्यकिंचित्कर एवेत्युपालम्भो व्यज्यते । त्वमिति । यस्याः सीताया माहात्म्यमानुपरत्वं त्वं वेत्थ । विदुरित्यस्य विभक्तिवचनयोर्विपरिणामेन योजना । वह्निर्वेद, मुनयो विदुः, वसिष्ठगृहिणी अरुन्धती वेद

विद्यां वागिव यामसूत भवती शुद्धिं गतायाः पुन-
स्तस्यास्त्वद्दुहितुस्तथाविशसनं किं दारुणे मृष्यथाः॥५॥

इत इतो भगवतीमहादेव्यौ।

जनकः—अये, गृष्टिनोपदिश्यमानमार्गा भगवत्यरुन्धती (उत्थाय) का पुनर्महादेवीत्याह। (निरूप्य।) हा हा, कथमियं महाराजस्य दशरथस्य धर्मदाराः प्रियसखी मे कौसल्या? क एतां प्रत्येति सैवेयमिति नाम?

आसीदियं दशरथस्य गृहे यथा श्रीः
श्रीरेव वा किमुपमानपदेन सैषा।
कष्टं बतान्यदिव दैववशेन जाता
दुःखात्मकं किमपि भूतमहो विकारः॥ ६॥

य एव मे जनः पूर्वमासीन्मूर्तो महोत्सवः।
क्षते क्षारमिवासह्यं जातं तस्यैव दर्शनम्॥ ७॥

(ततः प्रविशत्यरुन्धती कौसल्या कञ्चुकी च।)

अरुन्धती—ननु ब्रवीमि द्रष्टव्यः स्वयमुपेत्यैव वैदेह इत्येवं वः

जानाति, गङ्गा च वेद जानाति। यदि वा किंच रघोः कुलगुरुः रघुवंशजनकस्तदाचार्यो वसिष्ठो वा। देवः दीप्तिशीलः भास्करः स्वयं वेद परानपेक्षं जानाति। अत्र भूम्यादीनामन्योन्यनिरपेक्षप्रामाण्यप्रतिपत्त्यर्थं क्रियैकशेषाकरणाद्विदुरित्यत्र न मध्यमपुरुषः प्रयुक्तः। अत एव पुरुषवचनविपरिणामेन भिन्नानि वाक्यानि। यां प्रसूतवती तस्यास्तथाविधायाः पुनः शुद्धिं गतायाः अग्निप्रवेशादित्यर्थः। त्वद्दु- ... [illegible] ...धाः कथं सोढवत्यसि?॥ ५॥ ... [illegible] ... इयं सैवेति एतां कः प्रत्येति ... [illegible] ... आसीदिति। इयं कौसल्या दशरथस्य गृहे श्रीरिवासीदथवा श्रीरेवासीत्। उपमानत्वबोधक'यथा'शब्देन किम्? न किमपीत्यर्थः। अत्रोपमालंकारः, रूपकालंकारः, आक्षेपालंकारश्च। सैषा श्रीसदृशी श्रीभूता वा इयं कौसल्या दैववशेन दैवेच्छया अन्यदिव जाताऽन्यद्भूतमिव संवृत्ता। अलक्ष्मीरिव जातेत्यर्थः। अत्रेवेति वर्तते। दुःखात्मकं दुःखैकरसं किमपि वाचामपरिच्छेद्यं भूतं प्राणिविशेषः जाता, साक्षादलक्ष्मीः जातेत्यर्थः। यथा श्रीः श्रीरेवेत्यनयोः प्रतिद्वन्द्वभूतमिदमहो विकारः प्राणिनामुपचयापचयरूपागन्तुको विस्मयनीय इत्यर्थः। कष्टं बतेति दुःखातिशये॥ ६॥ य इति। य एष जनः कौसल्या॥ ७॥ आदेशः आज्ञा। अनध्यवसायः संशयः॥ आत्मानं धृतिम्। संस्तभ्य

पाठा०—१ 'बद्धा या दैवतं'. २ 'विपाकः'. ३ 'इत्येव'.

कुलगुरोरादेशः । अत एव चाहं प्रेषिता । तत्कोऽयं पदे पदे महान-
नध्यवसायः ?

कञ्चुकी—देवि ! संस्तभ्यात्मानमनुरुध्यस्व भगवतो वसिष्ठस्यादेश-
मिति विज्ञापयामि ।

कौसल्या—ईरिसे काले मिहिलाहिवो मए दिट्ठव्वो त्ति समं एव्व सव्वदुक्खाइं ओदरंति । ता ण सक्कणोमि उव्वट्टमाणमूलबंधणं हिअअं पज्जवत्थावेदुं । [ईदृशे काले मिथिलाधिपो मया द्रष्टव्य इति सममेव सर्वदुःखा-न्यवतरन्ति । तस्मात् शक्नोम्युद्वर्तमानमूलबन्धनं हृदयं पर्यवस्थापयितुम् ।]

अरुन्धती—अत्र कः संदेहः ?

संतानवाहीन्यपि मानुषाणां
दुःखानि संबन्धिवियोगजानि ।
दृष्टे जने प्रेयसि दुःसहानि
स्रोतःसहस्रैरिव संप्लवन्ते ॥ ८ ॥

कौसल्या—कहं णु खु वच्छाए मे वहूए वैनगदाए तस्सा पिदुणो राएसिणो मुहं दंसम्ह ? [कथं नु खलु वत्साया मे वध्वा वनगतायास्तस्याः पितू राजर्षेर्मुखं दर्शयाम ?]

अरुन्धती—

एष वः श्लाघ्यसंबन्धी जनकानां कुलोद्वहः ।
याज्ञवल्क्यो मुनिर्यस्मै ब्रह्मपारायणं जगौ ॥ ९ ॥

प्रतिहतगतिं कृत्वा, अनुरुध्यस्वानुतिष्ठेत्यर्थः । समं युगपत् । अवतरन्ति प्राप्नुवन्ति । उद्वर्तमानमुद्गतं मूलबन्धनं मूलनिबन्धनं यस्य तथोक्तम् । शिथिलबन्धनमित्यर्थः । पर्यवस्थापयितुम् ॥ संतानेति । संतानेन अविच्छेदेन वाहीनि प्रवहन्त्यपि दुःखानि प्रेयसि जने दृष्टे सलीलमिव । स्रोतःसहस्रैरनन्तैः स्रोतोभिः । उपलक्षणे तृतीया । संप्लवन्ते महोर्मीभवन्ति ॥ ८ ॥ वध्वा स्नुषायाः । एष इति । यस्मै यं जनकं सार्थ-यितुम् । 'क्रियार्थ–' (पा. २।३।१४) इति चतुर्थी । ब्रह्मपारायणं स्वरूपे गुणैश्च अनवभिन्नातिशयब्रह्मप्रयुक्तपरमात्मप्रतिपादकवेदान्तभागं जगौ उपदिदेश । रा

पाठा०–१ 'महानध्यवसायः'. २ 'समुत्पतन्ति'. ३ 'पुत्रं गृह्णे'.

टिप्प०–1 ब्रह्म॰ पारः स्वरूपमलक्षत्वम्, तत्सायनं प्राप्तिसाधनं विज्ञानशा-स्त्रमित्यर्थः ।

कौसल्या—एसो सो महाराअस्स हिअअणिव्विसेसो वच्छाए मे वहूए पिदा विदेहराओ सीरद्धओ । सुमरिदम्हि अणिव्वेदरमणीए दिअसे । हा देव्व ! सव्वं तं णत्थि । [एष स महाराजस्य हृदयनिर्विशेषो वत्सायाः मे वध्वाः पिता विदेहराजः सीरध्वजः । स्मारितास्मि अनिर्वेदरमणीयान्दिवसान् । हा देव ! सर्वं तन्नास्ति ।]

जनकः—(उपसृत्य।) भगवत्यरुन्धति ! वैदेहः सीरध्वजोऽभिवादयते ।

यथा पूतंमन्यो निधिरपि पवित्रस्य महसः
पतिस्ते पूर्वेषामपि खलु गुरूणां गुरुतमः ।
त्रिलोकीमाङ्गल्यामवनितललीनेन शिरसा
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ॥ १० ॥

अरुन्धती—अक्षरं ते ज्योतिः प्रकाशताम् । स त्वां पुनातु देवः परोरजसां य एष तपति ।

जनकः—आर्य गृष्टे ! अप्यनामयमस्याः प्रजापालकस्य मातुः ?

कञ्चुकी—(स्वगतम्) निरवशेषगतिनिष्ठुरमुपालब्धाः स्मः । (प्रकाशम्।) राजर्षे ! अनेनैव मन्युना चिरपरित्यक्तरामभद्रदर्शनां नार्हसि दुःखयितुमतिदुःखितां देवीम् । रामभद्रस्यापि दैवदुर्योगः कोऽपि । यत्किल समन्ततः प्रवृत्तबीभत्सकिंवदन्तीकाः पौरा न चाग्निशुद्धिमनल्पकाः प्रतियन्तीति दारुणमनुष्ठितं देवेन ।

एष इति योजना ॥ ९ ॥ हृदयनिर्विशेषः । अन्तरङ्ग इत्यर्थः । सीरः ध्वजो यस्य तथोक्तः । अनिर्वेदाश्च ते रमणीयाश्च, न विद्यते निर्वेदश्चित्तग्लानिर्येषु तथोक्ताः । रमणीया आनन्दहेतवः । तथाविधान्दिवसान्स्मारितास्मि दिवसविषयकस्मरणवती कृतास्मि । सर्वमेतदुपलभ्यमानं सर्वं नास्ति असत्कल्पम् । हा दुःख्यते ॥ अभिवादयते । प्रणामेनाशीर्वाचयतीत्यर्थः ॥ यथेति । पूतंमन्य आत्मविषयकपूतत्वप्रकारकज्ञानवान् । त्रिलोकीमाङ्गल्यां लोकत्रयमङ्गलहेतुभूतामुषसमिव प्रातःसंध्यादिदेवतामिव स्थिताम् । 'अवनितललीनेन शिरसा' इत्युपलक्षणमष्टाङ्गप्रणामस्य ॥ १० ॥ अक्षरं प्रकृतिपुरुषवत्स्वरूपस्वभावविकाररहितं ज्योतिः स्वयंप्रकाशं प्रकाशयतां प्रतिभासताम् । 'अक्षरमम्बरान्तधृतेः' (ब्र. सू. १।३।१०) 'ज्योतिश्चरणाभिधानात्' (ब्र. सू. १।१।४०) इत्यधिकरणद्वयार्थः प्रत्यभिज्ञापितः । देवः जगत्स्रष्टरादिलीलावान् । रजसां समस्तदोषजातेभ्यः परः । संबन्धसामान्ये षष्ठी । 'परोरजाः'

पाठा०–१ 'राएसी' (=राजर्षिः). २ 'मङ्गल्या'. ३ 'पौरजानपदा नाग्निशुद्धिं'.

जनकः—(सरोषम् ।) आः, कोऽयमग्निर्नामास्मत्प्रसूतिपरिशोधने ? कष्टमेवंवादिना जनेन राममद्रपरिभूता अपि पुनः परिभूयामहे ।

अरुन्धती—(निःश्वस्य ।) एवमेतत् । अग्निरग्निरिति वत्सां प्रति लघून्यक्षराणि । सीतेत्येव पर्याप्तम् । हा, वत्से !

शिशुर्वा शिष्या वा यदसि मम तत्तिष्ठतु तथा
विशुद्धेरुत्कर्षस्त्वयि तु मम भक्तिं द्रढयति ।
शिशुत्वं स्त्रैणं वा भवतु ननु वन्द्यासि जगतां
गुणाः पूजास्थानं गुणिषु न च लिङ्गं न च वयः ॥ ११ ॥

कौसल्या—अहो, सैमुम्मूलअंति विअ वेअणाओ । (इति मूर्च्छति ।)
[अहो, समुन्मूलयन्तीव वेदनाः ।]

इति वा पाठः । रजसः पर इति विग्रहः, बाहुलकात्समासः, पृषोदरादित्वादोकारश्च । य एष तपति स त्वां पुनातु । अनेन 'अन्तस्तद्धर्मोपदेशात्' (ब्र. सू. १।१।२०) इत्यधिकरणार्थः सूचितः । परो रजसामिलनेन 'उदेति ह वै सर्वेभ्यः पाप्मभ्यः' (छा. १।६।६) इति श्रुतिश्चोदिता । अनामयमारोग्यम् । प्रजापालकस्य मातुः राममातुः कौसल्यायाः । इदं च साभिप्रायम् । 'अनामय'मित्यनेन एवं दुःखिनी स्थिचिरं जीविष्यतीत्युपालम्भो व्यज्यते ॥ निरवशेषं निःशेषमतिनिष्ठुरं अनिन्द्यम् । अनेनैव मन्युना 'अप्यनामयं प्रजापालकस्य मातुः' इत्यनेन व्यज्यते, न क्रोधेन । दैवस्य भवितव्यताया दुर्योगः दुःखजननप्रग्राहः । यन्निल यस्माद्धेतोः प्रवृत्ता प्रसृता बीभत्सा जुगुप्सनीया किंवदन्ती जनश्रुतिः येषां तथोक्ताः । 'किंवदन्ती जनश्रुतिः' इत्यमरः । पौराः पुरे भवाः । तस्माद्दैवदुर्योगः कोऽपीति पूर्वेणान्वयः । अनल्पकाः अत्यल्पाः । अग्निशुद्धिं न च प्रतियन्ति न विश्वसन्ति च । इति पूर्वोक्ताद्धेतोः दारुणं परित्यागात्मकं रौक्ष्यम् ॥ अग्निशुद्धिरिति क इति योजना । प्रस्ताव इति शेषः । एवंवादिना अग्निशुद्धिरिति वादिना जनेन परिभूयामहे अवमन्यामहे । उपसर्गवशेन भवतेः कर्मणि लकारः । एतत्परिभूयामहे इत्येतत् । एवं जनलोकदशामग्राव एव । लघून्यक्षराणि लाघवापादकशब्दः सीतेत्येव पर्याप्तम् । वह्निसीतयोः पावनत्वे समकक्ष्यत्वान्प्रत्युत सीतायाः प्रकर्षोत्सीताशब्द एव परिपूर्ण इति भावः । शिशुरिति । त्वं मम शिशुर्वा शिष्यः वाऽसीति यत् तत्तिष्ठत्विति योजना । विशुद्धेः निर्दोषतायाः उत्कर्षः अतिशयः । तथा भक्तिं अन्यादृशीं पूजनीयताप्रतिपत्तिं त्वयि मम द्रढयति स्थिरां करोति । शिशुत्वं स्त्रैणं स्त्रीत्वं वा । 'स्त्रीपुंसाभ्यां नञ्स्नञौ' (पा. ४।१।८७) इति नञ्प्रत्ययः । भवतु स्यात्, ननु तावता वन्द्यत्वहानिः । जगतां वन्द्याऽसि अभिवादनीयासि । नन्वित्यवधारणे । गुणाः गुणिषु 'अहिंसा शौचमस्तेय'मित्याद्युक्तगुणवत्सु पूजास्थानमन्वयव्यतिरेकाभ्यां पूजाप्रयोजकाः । लिङ्गं

पाठा०–१ 'परिलघूनि'. २ 'जगतः'. ३ 'उन्मीलंति'.

जनकः—हन्त, किमेतत्।

अरुन्धती—राजर्षे! किमन्यत्?

स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसाः
स्मृतावाविर्भूतं त्वयि सुहृदि दृष्टे तदखिलम्।
विपाके घोरेऽस्मिन्न खलु न विमूढा तव सखी
पुरंध्रीणां चित्तं कुसुमसुकुमारं हि भवति ॥ १२ ॥

जनकः—हन्त, सर्वथा नृशंसोऽस्मि। यश्चिरस्य दृष्टान्प्रियसुहृदः प्रियदारानस्निग्ध इव पश्यामि।

स संबन्धी श्लाघ्यः प्रियसुहृदसौ तच्च हृदयं
स चानन्दः साक्षादपि च निखिलं जीवितफलम्।
शरीरं जीवो वा यदधिकमतोऽन्यत्प्रियतरं
महाराजः श्रीमान्किमपि मम नासीद्दशरथः ॥ १३ ॥

जटोपवीतादिकं न पूजाप्रयोजनकम् ॥ ११ ॥ वेदना दुःखानि। समुन्मूलयन्ति मूलमुत्पाटयन्ति। इति मूर्च्छति मूर्च्छामभिनयति ॥ हन्त, किमेतत्, शस्त्राभिघातादिकमन्तरा मूर्च्छा विस्मयनीयेत्यर्थः ॥ अन्यत्किम्, वक्ष्यमाणादन्यत्र किमपीत्यर्थः। **स राजे**ति। 'स राजा तत्सौख्यं स च शिशुजनस्ते च दिवसाः' इति यत्तदखिलं सुहृदि त्वयि दृष्टे सति स्मृतावाविर्भूतं कस्याप्यंशस्य प्रतीपेण स्मृतिविषयीभूतम्। 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इत्युक्तेः। घोरे भयंकरे अस्मिन्विपाके प्रकृतसीतात्यागरूपदैवपर्यवसाने तव सखी कौसल्या विमूढा नेति न। 'अप्यनामयमस्याः' इत्यादिभवद्वचनभङ्ग्याविष्कृतो भवन्मतरीत्या योऽस्याः कठिनचित्तताप्रयुक्तमूर्च्छाभावो वा नेत्यर्थः। पुरंध्रीणां चित्तं हि यस्मात्कुसुमवन्मृदु तस्माद्विमूढा नेति न ॥ १२ ॥ एवमरुन्धत्या बोधितोऽनुतपति-**हन्ते**ति। योऽहं चिरस्य दृष्टान् चिराद्दृष्टान्प्रियसुहृदो दशरथस्य प्रियान्नरप्रीतिविषयानमपि प्रीतियुक्तान् हि दारान् कौसल्यामस्निग्ध इव शत्रुरिव पश्यामि शत्रुकर्तृकदर्शनसदृशदर्शनवानस्मि सोऽहं सर्वप्रकारेण क्रूरोऽस्मि। हन्त अनुतप्यते। **स संबन्धी**त्यादि। श्रीमान् लक्ष्मीवान्महाराजः सार्वभौमः स दशरथः मम श्लाघ्यः संबन्धी अभूत्। असौ संबन्धीभूतो दशरथः प्रियसुहृद्भूत् प्रीतिमान् शोभनहृदयश्चाभूत्। 'सुहृद्दुर्हृदौ मित्रामित्रयोः' (पा. ५।४।१५०) इति 'हृदय'शब्दस्य हृदादेशः। तदन्तरङ्गत्वेन प्रसिद्धं हृदयं चाभूत्। चकारेण संबन्धिसुहृत्त्वसमुच्चयः। तदिति दशरथपरम्; विधेयप्राधान्यात्क्लीबत्वम्। एवं च तत् संबन्धिसुहृद्भूतदशरथः हृदयं चाभूदिति वा। स पूर्वोक्तत्रयात्मा दशरथः साक्षादानन्दश्च। साक्षाच्छब्देनानन्दहेतो-

---

पाठा०–१ 'दारान्स्निग्धं'.

कष्टमियमेव सा कौसल्या,—

यदस्याः पत्युर्वा रहसि परमन्त्रायितमभू-
दभूवं दम्पत्योः पृथगहमुपालम्भविषयः ।
प्रसादे कोपे वा तदनु मदधीनो विधिरभू-
दलं वा तत्स्मृत्वा दहति यदवस्कन्द्य हृदयम् ॥ १४ ॥

अरुन्धती—हा कष्टम् । अतिचिरनिरुद्धनिःश्वासनिष्पन्दं हृदयमस्याः ।

जनकः—हा प्रियसखि ! । (इति कमण्डलूदकेन सिञ्चति ।)

कञ्चुकी—

सुहृदिव प्रकटय्य सुखप्रदां
प्रथममेकरसामनुकूलताम् ।
पुनरकाण्डविवर्तनदारुणः
परिशिनष्टि विधिर्मनसो रुजम् ॥ १५ ॥

यानन्दयतीत्यानन्दयतीतरो व्यावर्त्यते । सामान्योक्त्या इत्यर्थः । निखिलं जीवितफलमपि च धर्माद्यनभ्युदयरूपं जीवनप्रयोजनं च । चकारः पूर्वसमुच्चायकः । शरीरमभूत् 'दुर्लभो मानुषो देहः' इत्युक्तं शरीरं चाभूत्, सकलधर्मसाधनत्वात् । जीवो वाऽभूत् जीवश्चाभूत् । तस्य हि ज्ञानानन्दमयत्वात्प्रेमास्पदत्वम् । अतो जीवादधिकः समस्तकल्याणगुणरत्नोदधित्वेनानन्दमयत्वेन च प्रकृष्टः प्रियतरः प्रियो नीरः प्रियतरः नक्तं तथाविधं यत्परं ब्रह्म तदभूत्, यत एव तत्तत्किं नाभूत्? सर्वमप्यभूदित्यर्थः । लोके सम्बन्धिसुहृदादीनां तत्तन्मात्रत्वमस्य तु सर्वदा सर्वविधत्वमिति भावः ॥ १३ ॥ यदस्या इति । अस्या वा पत्युर्दशरथस्य वा यत्परमन्त्रायितमभूद्रहसि गुह्यभाषणविचारो वा जातः । आचारचिन्तान्तरेऽपि च । तत्राह दम्पत्योर्नायापत्योः पृथगुपालम्भविषयोऽभूवं परस्परपरिहारेण परस्परविषये 'अयमेवमुक्तवान्, अयमेवं कृतवान्, इयमेवमुक्तवती, इयमेवं कृतवती' इत्यादिपरस्परापराधकथनपात्रमासम् । 'परमहितमभूत्' इति पाठोऽपि दृश्यते । प्रायस्य रहस्यपीडनापेक्षकर्मेति तदर्थः । शेषं पूर्ववत् । तदनु उपालम्भानन्तरं प्रसादानुग्रहः कोपानुग्रहो वा मदधीनमभूदित्यर्थः । स्मृत्वाऽलम्, तत्स्मरणेन साध्यं नास्तीत्यर्थः । यद्धृदयमवस्कन्द्याक्रम्य दहति भस्मीकरोति । तत्स्मृत्वाऽत्र कोपप्रसादयोरन्यविषयत्वं च पाठद्वये क्रमाद्विवक्षितम् । तत्र हि परस्परेत्युक्तिरुपलक्षणार्था ॥ १४ ॥ निरुद्धा सञ्चाररहिता श्वासाः प्राणवायवो यस्मिन् तथोक्तं निष्पन्दं च ॥ सुहृदिति । विधिः प्रथममादौ सुहृदिव मित्रमिव सुखप्रदामेकरसामेकप्रकारामनुकूलतां योगक्षेमहेतुभूतां प्रकटय्य

पाठा०–१ 'परम दूषितमभूत्'. २ 'निष्पन्द' ३ 'सुखमद'. ४ 'निधिरहो विशिनष्टि मनोरुजम्'.

कौसल्या—(आश्वस्य।) हा, वच्छे जाणइ! कहिं सि? सुमरामि दे णवविवाहलच्छीपरिग्गहेक्कमंगलं संफुल्लमुद्धमुहपुंडरीअं आरुहंतकौमुदीचंदसुंदरं। एहि मे पुणो वि जादे! उज्जोएहि उच्छंगं। सव्वदा महाराअ एव्वं भणादि—एसा रहुउलमहत्तराणं वहू अम्हाणं दु जणअसुदा दुहिदेव्व। [हा, वत्से जानकि! कुत्रासि? स्मरामि ते नवविवाहलक्ष्मीपरिग्रहैकमङ्गलं संफुल्लमुग्धमुखपुण्डरीकमारोहत्कौमुदीचन्द्रसुन्दरम्। एहि मे पुनरपि जाते! उद्द्योतयोत्सङ्गम्। सर्वदा महाराज एवं भणति—एषा रघुकुलमहत्तराणां वधूरस्माकं तु जनकसुता दुहितैव।]

कञ्चुकी—यथाह देवी,—

पञ्चप्रसूतेरपि तस्य राज्ञः
प्रियो विशेषेण सुबाहुशत्रुः।
वधूचतुष्केऽपि तथैव नान्या
प्रिया तनूजास्य यथैव सीता ॥ १६ ॥

जनकः—हा प्रियसख महाराज दशरथ! एवमसि सर्वप्रकारहृदयंगमः। कथं विस्मर्यसे?

प्रकाशयित्वा पुनरनन्तरमकाण्डेन निर्निमित्तेन विवर्तनेन व्यत्यस्तपरिपाकेन दारुणः सन् क्रूरः सन्मनसो रुजं हृदयपीडां परिशिनष्टि परिशिष्टां करोति। अकाण्डनिवर्तनेन दारुणोऽकाण्डनिवृत्तो भूत्वेत्यप्याहुः। सुहृदपि त्यक्त्वा गतश्चेन्मनःपीडां करोतीति साम्यम् ॥ १५ ॥ नवविवाहलक्ष्म्याः परिग्रहेण एकं मुख्यं मङ्गलं यस्य तथोक्तम्। कौमुद्यां कृत्तिकापौर्णमास्यां भवश्चन्द्रः कौमुदीचन्द्रः। आरोहन्ती प्रादुर्भवन्ती या कौमुदी चन्द्रचन्द्रिका तद्वत्सुन्दरमङ्गं यस्यास्तथोक्ताम्। उत्सङ्गमङ्कमुद्द्योतय उपवेशेन प्रकाशय। सर्वदा सर्वस्मिन्काले महाराजो दशरथः। एषा सीता रघुकुले महत्तरा ये मनुप्रभृतयस्तेषां वधूः स्नुषा। जनकसुता सीता, अस्माकं तु मम तु दुहितेव मदभिप्रायेण दुहितैवेत्येवं भणति ॥ देवी कौसल्या यथाह तथैवेति शेषः। **पञ्चप्रसूतेरि**ति। पञ्च प्रसूतयः पुत्राः यस्य तथोक्तस्यापि। तस्य राज्ञः पङ्क्तिरथस्य सुबाहुशत्रु' रामः विशेषेण प्रिय इष्टः। पञ्च प्रसूतयो यस्मिन् वृन्दे इति वा विग्रहः। निर्धारणे षष्ठी। 'तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य' (पा. ७।१।७४) इति पाक्षिकः पुंवद्भावः। पञ्चानां मध्ये रामः प्रिय इत्यर्थः। रामादयश्चत्वारः शान्ता चेति पञ्च। वधूचतुष्केऽपि सीतादिस्नुषाचतुष्टयेऽपि अस्य जनकस्य तनूजा सीता यथा तस्य राज्ञो दशरथस्य प्रिया तथा अन्या ऊर्मिलाप्रभृतिः राज्ञः

पाठा०—१ '°मंडणं पप्फुरंतसुद्धविहसिदं'. २ 'यथा हि शान्ता'. ३ 'तथैव'.

कन्यायाः किल पूजयन्ति पितरो जामातुराप्तं जनं
संवन्धे विपरीतमेव तदभूदाराधनं ते मयि ।
त्वं कालेन तथाविधोऽप्यपहृतः संवन्धबीजं च त-
द्घोरेऽस्मिन्मम जीवलोकनरके पापस्य धिग्जीवितम्॥१७॥

कौसल्या—जादे! जाणइ, किं करेमि? दिढवज्जलेवपडिवद्ध-णिच्चलं हदजीविदं मं मंदभाइणीं ण परिच्चअदि। [जाते जानकि! किं करोमि? दृढवज्रलेपप्रतिबन्धनिश्चलं हतजीवितं मां मन्दभागिनीं न परित्यजति।]

अरुन्धती—आश्वसिहि राज्ञि! बाप्पविश्रामोऽप्यन्तरेषु कर्तव्य एव। अन्यच्च किं न स्मरसि यदवोचदृष्यशृङ्गाश्रमे युष्माकं कुलगुरु-र्भवितव्यं तथेत्युपजातमेव, किंतु कल्याणोदर्कं भविष्यतीति?

कौसल्या—कुदो अदिकंदमणोरहाए मह एदं। [कुतोऽतिक्रान्त-मनोरथाया ममैतत्।]

प्रिया न। 'अस्य तनूजा सीता' इत्यनेन सीताया एव जनकाभिसंधिना तनूजात्वं नान्यासामिति व्यज्यते। वधूचतुष्केऽपीति निर्धारणे सप्तमीदर्शनात्॥१६॥ सर्वैः प्रकारैर्धर्मैः हृदयंगमः। कन्यायाः इति। संबन्धे कन्यावरसंबन्धे। कन्यायाः पितरो जनन्यः जनकाश्च जामातुर्वरस्याप्तं संनिहितबन्धुं जनं पूजयन्ति किल संभावयन्तीति प्रसिद्धम्। तदाराधनं पूजनं ते मयि विपरीतमभूत्। त्वत्कर्तृकम-द्विषयकपूजनं सत् प्रतिलोमं जातमित्यर्थः। तथाविधोऽपि त्वं कालेनापहृतः मया पूज्यमानं भवन्तं द्रष्टुं न्याय्य तावद्भाग्याभावेऽपि केवलं वा भवन्तं द्रष्टुं मदीय-दैवदुर्विपाको नाक्षम्यतेति भाव। संबन्धबीजं सीता चापहृतं लिङ्गविपरिणामः। पूर्वोक्तयोरभावेऽपि तादृशभवदभिमता सीतापि दैवेन नाक्षम्यतेति भावः। घोरे भयंकरे अस्मिन्नेवंविधबहुदुःखभाजने जीवलोकनिले पापस्य पूजनविपर्यासादिहेतु-भूतदुरितप्रचुरस्य मम जीवितं प्राणधारणं धिक्। तत्कर्मिका निन्देत्यर्थः। अत्रेदानीं भवत्पूजाद्यभावेऽपि यत्र तल्लाभो लोकान्तरे तत्र गमनस्यापि मदीयजी-वनयोनिदुरितप्रतिबन्धकमिति भाव.॥१७॥ दृढेन वज्रलेपेन बन्धकद्रव्यलेपेन यः प्रतिबन्धो विश्लेषानुत्पादस्तेन निश्चलं हतजीवितं निन्द्यजीवितम्॥ आश्वसिहि आश्वास दुःखलघूकरणं प्राप्नुहि। बाष्पस्य दुःखाश्रुणः विश्रामो विच्छेदोऽपि। 'अपि'शब्देन बाष्पादिकं समुच्चीयते। अन्तरेषु मध्ये मध्ये। अन्यच्च बाष्पविश्रामा-दन्यदपि। यत्कुलगुरुर्वसिष्ठः अवोचत्तन्न स्मरसि किम्? भवितव्यं तथेति परित्यागरूपेण भवनमपरिहार्यमिति हेतोः। उपजातमापाततो जातम्, न त्वन्त-तस्तथेत्यर्थः। कल्याणोदर्कं मङ्गलपर्यवसायि भविष्यतीति यदवोचत्तन्न स्मरसि किम्?

पाठा०-१ '°विधोऽस्य°'.

अरुन्धती—तत्किं मन्यसे राजपते! मृषेयं तदिति? न हीदं क्षत्रिये मन्तव्यम्।

आविर्भूतज्योतिषां ब्राह्मणानां
ये व्याहारास्तेषु मा संशयोऽभूत्।
भद्रा ह्येषां वाचि लक्ष्मीर्निषक्ता
नैते वाचं विप्लुतार्थां वदन्ति ॥ १८ ॥

(नेपथ्ये कलकलः सर्वे आकर्णयन्ति।)

जनकः—अये, अद्य खलु शिष्टानध्ययन इत्यस्खलितं खेलतां बटूनां कोलाहलः।

कौसल्या—सुलहसोक्खं दाणिं बालत्तणं होदि। (निरूप्य) अम्महे, एदाणं मज्झे को एसो रामभद्दस्स कौमारलच्छीसावट्टम्भेहिं मुद्धललिदेहिं अंगेहिं दारणो अम्हाणं लोअणे सीअलावेदि? [सुलभसौख्यमिदानीं बालत्वं भवति। अहो, एतेषां मध्ये क एष रामभद्रस्य कौमारलक्ष्मीसावष्टम्भैर्मुग्धललितैरङ्गैर्दारकोऽस्माकं लोचने शीतलयति?]

अरुन्धती—(स्वगतम्। सहर्षोत्कण्ठम्।) इदं नाम भागीरथीनिवेदितं रहस्यकर्णामृतम्। न त्वेवं विद्मः कतरोऽयमायुष्मतोः कुशलवयोरिति। (प्रकाशम्)

अतिक्रान्तमनोरथाया असंभाव्यामिलापविषयायाः॥ मृषेयमिति मिथ्यावचनमिति। आविर्भूतेति। आविर्भूतज्योतिषां परज्योतिर्विषयकापरोक्षज्ञानवतां ब्राह्मणानां विप्राणां ये व्याहारा उक्तयस्तेषु संशयः प्रामाण्यसंदेहो मा भूत् नोत्पत्तुमर्हः। हि यस्मादेषां ब्राह्मणानां वाचि भद्रा मङ्गलकरी लक्ष्मीः अर्थोपधायकत्वातिशयः। निषक्ता नित्यसक्तिनी भवति। एते आविर्भूतज्योतिषो ब्राह्मणाः विप्लुतार्थामसदर्थां वाचमेकामपि गिरं न वदन्ति नोच्चारयन्ति। पूर्वत्र बहुवचनं तदीयसर्ववाचामपि प्रामाण्यबोधनार्थम्, अत्रैकवचनं तु तदीयकस्यचिद्वचोऽप्यप्रामाण्यं नेति बोधनार्थमिति द्रष्टव्यम्। अत्र श्लोके 'सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत। अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधिवाचि॥' (ऋ. सं. ८।२।२३) इति श्रुतिः स्फोरिता॥ १८॥ शिष्टागमनप्रयुक्ताध्ययनाभावः शिष्टानध्ययनः॥ सुलभं सौख्यं यस्मिन्नपोढम्। अनेन 'वृद्धो जनो दुःखशतानि भुङ्क्ते' इत्युक्तवार्धकनिन्दा व्यज्यते। रामभद्रस्य कौमारलक्ष्म्या चन्द्रवदाह्लादकारिरामशैशवस्य योऽयमवष्टम्भः आलम्भनं तत्सहितैः। 'लक्ष्मी'पदेन शैशवस्य स्पृहणीयत्वं व्यज्यते। संव-

---

पाठा०—१ 'राजपुत्रि'. २ 'निषिक्ता'. ३ 'कलकलः'. ४ 'दाय'.

टिप्प०—1 'शिष्टागमनेऽनध्यायः' इति वचनाम्नकारी नामागमनहेतुकोऽध्यानध्यायो बटूनां पठनराहित्यम् इति भावः।

कुवलयदलस्निग्धश्यामः शिखण्डकमण्डनो
बटुपरिषदं पुण्यश्रीकः श्रियैव सभाजयन्।
पुनरपि शिशुर्भूत्वा वत्सः स मे रघुनन्दनो
झटिति कुरुते दृष्टः कोऽयं दृशोरमृताञ्जनम् ॥ १९ ॥

कञ्चुकी—नूनं क्षत्रियब्रह्मचारी दारकोऽयमिति मन्ये।

जनकः—एवमेतत्। अस्य हि,—

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतो
भस्मस्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम्।
मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठकं
पाणौ कार्मुकमक्षसूत्रवलयं दण्डोऽपरः पैप्पलः ॥२०॥

भगवत्यरुन्धति! किमित्युत्प्रेक्षसे कुतस्त्योऽयमिति?

अरुन्धती—अद्यैव वयमागताः।

न्यशब्दत्वात्सापेक्षत्वेऽपि समासः। मुग्धललितः सुन्दरसुकुमारः ॥ हर्षं इष्टागमा-त्प्रीतिः। उत्कण्ठा आकारादिविषयाभिलाषः। भागीरथीनिवेदितं गङ्गया कथितं रहस्यं गूढं यत्तनयोरमृतवद्द्भोग्यम्। तदिदं नामायुष्मतोः कुशलवयोर्मध्ये कतरोऽयमिति कुश इति वा लव इति वा न विद्मः न जानामि। 'अस्मदो द्वयोश्च' (पा० १।२।५९) इत्येकत्वे बहुवचनम्। कुवलयेति। शिखण्डकमण्डनः काकपक्षधरो बटूनां ब्रह्मचारिणां परिषदं सदः श्रिया कान्त्या सभाजयन्नलंकुर्वन्। अमृताञ्जनम् अमृतमयमञ्जनं शीतत्वादिभिः तद्धि रमणीयमिति कविसमयप्रसिद्धिः ॥ १९ ॥ मन्ये अनुमिनोमि। एतद्भवता संभाव्यमानमेव वस्तुभूतम्। चूडाचुम्बितेति। चूडाचुम्बितानि संयुक्ताग्राणि कङ्कपत्राणि बाणपक्षा यस्मिंस्तथोक्तम्। पृष्ठतोऽभितः पृष्ठे, द्वयोर्भागयोरित्यर्थः। भस्ममयं स्तोकमल्पं पवित्रं पावनं लाञ्छनं पुण्ड्रं यस्य स तथोक्तम्। उरः रौरवीं ऐणेयीं त्वचं धत्ते। मौर्व्यात्मकरशनया नियन्त्रितं माञ्जिष्ठं मञ्जिष्ठरक्तं वासः अधः उरसोऽधस्तात्। क्षत्रियब्रह्मचारिणां

पाठा०—१ 'तथा हि'.

टिप्प०—1 शिखण्डकः काकपक्षः कर्णयोरुपरि केशपाशः क्षत्रियाणां पञ्चदशाब्दं यावदिति प्रसिद्धिः, 'अजातव्यञ्जनो यस्तु युद्धकर्मविशारदः। ऊनषोडशवर्षश्च काकपक्षधरः स्मृतः' इत्युक्तेः।

2 चर्माणि राजन्येभ्यः पारस्करेण-'रौरवं राजन्यस्य' इत्यादिना।

3 'क्षत्रियस्य तु मौर्वी ज्या' इति मनुः।

4 'कार्पासं माञ्जिष्ठं क्षौमं क्षत्रियस्य' इति वसिष्ठः।

5 'ब्राह्मणो बैल्वपालाशौ क्षत्रियौ वटखादिरौ। पैप्पलौदुम्बरौ वैश्यौ' इत्यनेन विरोधोऽत्र।

जनकः—आर्य गृष्टे! अतिकौतुकं वर्तते । तद्भगवन्तं वाल्मीकिमेव गत्वापृच्छ । इमं च दारकं ब्रूहि वत्स! केऽप्येते प्रवयसस्त्वां दिदृक्षव इति ।

कञ्चुकी—यदाज्ञापयति देवः । (इति निष्क्रान्तः ।)

कौसल्या—किं मण्णेध एव्व भणिदो आअमिस्सदि वा ण वेत्ति? [किं मन्यध्वे एवं भणित आगमिष्यति वा न वेति?]

जनकः—भिद्यते वा सद्वृत्तमीदृशस्य निर्माणस्य ।

कौसल्या—(निरूप्य) कहं सविणआणिसमिदगिट्ठिवअणो विसज्जिदासेसतारिसदारओ इतोहिमुहं अवसरिदो एव्व स वच्छो? [कथं सविनयंनिशमितगृष्टिवचनो विसर्जिताशेषसदृशदारक इतोऽभिमुखमपसरित एव स वत्सः?]

जनकः—(चिरं निर्वर्ण्य) भोः, किमप्येतत्,—

महिम्नामेतस्मिन्विनयशिशिरो मौग्ध्यमसृणो
विदग्धैर्निर्ग्राह्यो न पुनरविदग्धैरतिशयः ।
मनो मे संमोहस्थिरमपि हरत्येष बलवा-
नयोधातुं यद्वत्परिलघुरयस्कान्तशकलः ॥ २१ ॥

मेखलेत्युक्तं 'माञ्जिष्ठं राजन्यस्य' इति च । पाणौ कार्मुकं धनुरक्षसूत्रवलयं जपमालिकावलयम् । अस्तीति शेषः 'अपरे पैप्पलः' इति पाठे अपरे पाणौ अश्वत्थदण्डः । 'अपरपैप्पलः' इति पाठे धनुर्दण्डादपरः, अन्य इत्यर्थः ॥ २० ॥ कुतस्त्यः कस्मादुद्भवः ॥ अतिशयितं कौतुकं विशिष्टवस्तुजिज्ञासोत्कण्ठ्यम् । प्रवयसो वृद्धाः । दिदृक्षवः द्रष्टुमिच्छवः ॥ यदाज्ञापयतीत्यत्र तदनुतिष्ठामीति शेषः । एवं भणितः प्रवयसस्त्वां दिदृक्षव इत्युक्तः सन् आगमिष्यति किमिति मन्यध्वे? किं संदिग्धे ॥ ईदृशस्य लोकोत्तरस्य निर्माणस्याकारस्य । निर्मीयते तन्निर्माणम् । कर्मणि ल्युट् । 'कृत्यल्युटो बहुलम्' (पा. ३।३।११३) इत्युक्तेः । सद्वृत्तं सदाचारो भिद्यते वा । छिन्नं भवति किमित्यर्थः । 'कर्मवत्कर्मणा—' (पा. ३।१।८७) इति यगात्मनेपदे ॥ सविनयं निशमितं श्रुतं गृष्टिवचनं येन तथोक्तः ॥ एतद्दृश्यमानं किमपि अपूर्वमित्यर्थः । तदाह—*महिम्नामित्यादि । विनयेन ज्ञानवृद्धशीलवृद्धसंनिधौ स्वानिकर्षपर्यवसाय्यपस्थानेन* शिशिरः शीतलः । मौग्ध्येन बाल्येन मसृणः पौरुषरहितः विदग्धैः सूक्ष्मदर्शिभिर्निर्ग्राह्यो निर्णेयः । अविदग्धैः पुनर्न ग्राह्यो निर्णेतुमशक्यः एतस्मिन्महिम्ना-

---

पाठा०—१ 'बालकं'. २ शिशुतामौग्ध्यमसृणो'.

टिप्प०—अत्र साम्यभावे भवभूतेरेव श्लोकः—'व्यतिषजति पदार्थानान्तरः कोऽपि हेतुर्न खलु बहिरुपाधीन्प्रीतयः संश्रयन्ते । विकसति हि पतङ्गस्योदये पुण्डरीकं द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः ॥' (मालती १।२७) इति ।

लवः—(प्रविश्य ।) अविज्ञातवयःक्रमौचित्यात्पूज्यानपि सतः कथमभिवादयिष्ये ? (विचिन्त्य ।) अयं पुनरविरुद्धः प्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य ।) एष वो लवस्य शिरसा प्रणामपर्यायः ।

अरुन्धतीजनकौ—कल्याणिन् ! आयुष्मान्भूयाः ।

कौसल्या—जाद ! चिरं जीव । [जात ! चिरं जीव ।]

अरुन्धती—एहि वत्स ! (लवमुत्सङ्गे गृहीत्वा । आत्मगतम् ।) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।

कौसल्या—जाद ! इदो वि दाव एहि । (उत्सङ्गे गृहीत्वा ।) अम्महे, ण केवलं दरविप्पट्टकंदोट्टमंसलुज्जलेण देहबंधणेण कवलिदारविंदकेसरकसाअकंठकलहंसघोसघग्घराणुणादिणा सरेण अ रामभद्दं अणुसरेदि । णं कठोरकमलगब्भप्पम्हलसरीरप्फस्सो वि तारिसो एव्व । जाद ! पेक्खामि दे मुहपुंडरीअं । (चुबुकमुन्नमय्य निरूप्य सबाष्पाकूतम् ।) राएसि ! किं ण पेक्खसि णिउणं णिरूवअंतो वच्छाए मे वहूए मुहचंदेण वि संवददि एव्व ? [जात ! इतोऽपि तावदेहि । अहो न केवलं दरविसृष्टकुवलयमांसलोज्ज्वलेन देहबन्धनेन कवलितारविन्दकेसरकषायकण्ठकलहंसघोषघर्घरानुनादिना स्वरेण च रामभद्रमनुसरति । ननु कठोरकमलगर्भपक्ष्मलशरीरस्पर्शोऽपि तादृश एव । जात ! पश्यामि ते मुखपुण्डरीकम् । राजर्षे ! किं न पश्यसि निपुणं निरूप्यमाणो वत्साया मे वध्वा मुखचन्द्रेणापि संवदत्येव ?]

मतिशयः स्वनिष्ठप्रकृष्टज्ञानतेजःप्रकृतिगुणादिमाहात्म्यानामुत्कर्षः । संमोहेन मूर्च्छया स्थिरमपि चाञ्चल्यरहितमपि मे मनश्चित्तं परिलघुरल्पः अयस्कान्तशकलः अयस्कान्तखण्डः अयोधातुं यद्वल्लोहपिण्डमिव हरति कर्षति । अत्र 'विनयशिशिरो मौग्ध्यमसृण' इत्यादिना सलिलहिमोपष्टम्भेन ज्योत्स्नीभवतां सूर्यतेजसां सादृश्यं व्यज्यते ॥ २१ ॥ क्रमः सत्कारार्थानुपूर्व्यं वयः स्थाविरादिकं वयःक्रमस्तस्यौचित्यं प्राप्तता ज्ञातं च तद्वयःक्रमौचित्यं तस्याभावः अज्ञातवयःक्रमौचित्यम् । अर्थाभावे अव्ययीभावः । 'अपदम्या' इति प्रतिषेधादम्भावो न । तथा च वयःक्रमौचित्यज्ञानाभावादित्यर्थः । कथमभिवादयिष्ये केन क्रमरूपप्रकारेण नमस्करिष्ये ? अविरुद्धः अविपरीतः । प्रकारोऽनुष्ठानविशेषः । सामान्यवृद्धविषयकप्रणामकरणरूप इति भावः । 'सभायां प्रत्येकं न नमस्कुर्यात्' इति गौतमस्मरणमिहाभिप्रेतम् ॥ उत्सङ्गे अङ्के ॥ दिष्ट्येत्यानन्दे । उत्सङ्गः केवलं न पूरितः, किंतु मनोरथोऽपि पूरित इत्यर्थः ॥ जातेति संबोधनम् । 'विप्पट्ट'मिति विस्तृतवाचकम् । 'कन्दोट्ट'शब्दः कुवलयवाची । घर्घरश्च कांस्यध्वनिस्तद्वदनुकरणं तथाविधेन । अनुसरति अनुकरोति । कठोरस्य

पाठा०—१ 'अज्ञातनामक्रमाभिजनान्'. २ 'संपूर्णः'.

जनकः—पश्यामि सखि! पश्यामि।

कौसल्या—अम्महे, उम्मत्तीभूदं विअ मे हिअअं कुदोमुहं विलवदि। [अहो, उन्मत्तीभूतमिव मे हृदयं कुतोमुखं विलपति।]

जनकः—

वत्सायाश्च रघूद्वहस्य च शिशावस्मिन्नभिव्यज्यते
[1]संवृत्तिः प्रतिबिम्बितेव निखिला सैवाकृतिः सा द्युतिः।
सा वाणी विनयः स एव सहजः पुण्यानुभावोऽप्यसौ
हा हा [2]देवि! किमुत्पथैर्मम मनः पारिप्लवं धावति॥ २२॥

कौसल्या—जाद! अत्थि दे मादा, सुमरसि वा तादं? [जात! अस्ति ते माता, स्मरसि वा तातम्?]

लवः—नहि।

कौसल्या—तदो कस्स तुमं? [ततः कस्य त्वम्?]

लवः—भगवतः सुगृहीतनामधेयस्य वाल्मीकेः।

कौसल्या—अयि जाद! कहिदव्वं कहेहि। [अयि जात! कथितव्यं कथय।]

लवः—एतावदेव जानामि।

समग्रस्य कमलस्य गर्भवदान्तरपत्रवत्पक्ष्मलः स्फीतः तादृश एव रामभद्रस्पर्शसदृश एव। चुबुकमधराधोदेशम्। निपुणं निरूप्यमाणः हेतुभिः पदुतरं विचार्यमाणः अयमिति शेषः। मुखं चन्द्रेण संवदत्येव। सीतामुखचन्द्रेति यौगिकसादृश्यप्रमाणविषयो भवति॥ पश्यामि सखि! पश्यामीति आदराद्द्विरुक्तिः॥ उन्मत्तीभूतमिव विभ्रान्तमिव कुतोमुखम्। यत्र क्वापि असंभाव्यविषये लग्नमिति यावत्। विलपति परिदेवयति। 'विलपते' इति च पाठः॥ वत्सायाा इति। अस्मिन् शिशौ लवे वत्सायाः सीताया रघूद्वहस्य रामचन्द्रस्य च संवृत्तिः संपर्कः। संबन्ध इत्यर्थः। प्रतिबिम्बितेवाभिव्यज्यते अभिव्यक्ता भवति। दर्पणादौ बिम्बवद्दृश्यत इत्यर्थः। निखिला कृत्स्ना आकृतिरवयवसंस्थानविशेषः सैव सीतारघूद्वहसंबन्धिन्येव द्युतिर्कान्तिः सा तयोरेव संबन्धिनी। वाणी लवस्य वाक् सा तयोरेव संबन्धिनी। विनयः प्रश्रयः स एव सहजः स्वाभाविकः। पुण्यश्चासौ पावनश्चासौ अनुभावः सर्वातिशयप्रभावः। असौ सीतारघूद्वहसंबन्ध्येव। अदूरविप्रकृष्टवाच्योऽदःशब्दः। 'अनुभावः प्रभावे च सतां च मतिनिश्चये' इत्यमरः। देवि सीते! मम मनः पारिप्लवं सत् चपलं सत् उत्पथैरमार्गैः धावति अनवस्थितं भवति। हा हा, दुःखित इत्यर्थः। देवीत्वेनैन देवभूसंगतामासाद्य कथमिदं संगच्छत इति व्यज्यते। अत एव उत्पथैरित्यु-

पाठा०—१ 'सम्पूर्णमिति'. २ 'देव'.

(नेपथ्ये ।)

भो भोः सैनिकाः ! एष खलु कुमारश्चन्द्रकेतुराज्ञापयति न केनचिदाश्रमाभ्यर्णभूमय आक्रमितव्या इति ।

अरुन्धतीजनकौ—अये, मेध्याश्वरक्षाप्रसङ्गादुपागतो वत्सश्चन्द्रकेतुर्द्रष्टव्य इत्यहो सुदिवसः ।

कौसल्या—वच्छलक्खणस्स पुत्तओ आणवेदित्ति अमियबिंदुसुंदराइं अक्खराइं सुणीअदि । [वत्सलक्ष्मणस्य पुत्रक आज्ञापयतीत्यमृतबिन्दुसुन्दराण्यक्षराणि श्रूयन्ते ।]

लवः—आर्य ! क एष चन्द्रकेतुर्नाम ?

जनकः—जानासि रामलक्ष्मणौ दाशरथी ?

लवः—एतावेव रामायणकथापुरुषौ ।

जनकः—अथ किम् ।

लवः—तत्कथं न जानामि ?

जनकः—तस्य लक्ष्मणस्यायमात्मजश्चन्द्रकेतुः ।

लवः—ऊर्मिलायाः पुत्रस्तर्हि मैथिलस्य राजर्षेर्दौहित्रः ।

अरुन्धती—आविष्कृतं कथाप्रावीण्यं वत्सेन ।

जनकः—(विचिन्त्य ।) यदि त्वमीदृशः कथायामभिज्ञस्तद्ब्रूहि तावत्पश्यामस्तेषां दशरथस्य पुत्राणां कियन्ति किंनामधेयान्यपत्यानि केषु दारेषु प्रसूतानि ?

कम् ॥ अत्र च 'ऋक्पूरब्धूःपथाम्—' (पा ५।४।७४) इति समासान्तः ॥ २२ ॥ कस्य त्वम् ? कस्माज्जात इत्यर्थः । सुगृहीतं सु प्रतिपादितं नामधेयं यस्य तथोक्तस्य वाल्मीकेरित्यस्माज्जात ॥ सैनिकाः सेनासमवायिनः । अभ्यर्णभूमयः समीपदेशाः । ता नाक्रमितव्या न केनापि स्प्रष्टव्या इति । आज्ञापयतीत्यर्थः ॥ मेध्याश्वस्य यज्ञाश्वस्य प्रसङ्गादवस्थानुरोधसम्बन्धाद्धेतो द्रष्टव्य इति सुदिवसः । चन्द्रकेतुदर्शनाच्छोभनदिवसोऽयं विस्मयनीय इत्यर्थः ॥ अमृतबिन्दुसुन्दराण्यक्षराणि सुधाप्लुत इव भोग्या वर्णाः ॥ दाशरथी दशरथपुत्रौ जानासि किमिति काक्वा योजनीयम् ॥ रामायणकथाया रामायणनामकवाक्यप्रबन्धस्य पुरुषौ प्रतिपाद्यौ ॥ अथ किमित्यङ्गीकारे ॥ तर्हि ऊर्मिलापुत्रत्वे मैथिलस्य मिथिलाधिपतेः आविष्कृतं प्रकाशितम् । वत्सेन लवेन ॥ कथायामभिज्ञः तत्प्रतिपाद्यार्थज्ञानवान् । किंनामधेयानीत्यारभ्य केषु प्रसूतानीत्यन्तस्य ब्रूहीत्यनेनान्वयः । पश्यामः । अस्मज्ज्ञातविषयस्त्वद्वचनं शृणुमः

पाठा०—१ 'पृच्छामः'.

लवः—नायं कथाविभागोऽस्माभिरन्येन वा श्रुतपूर्वः ।

जनकः—किं न प्रणीतः कविना ?

लवः—प्रणीतो न प्रकाशितः । तस्यैव कोऽप्येकदेशः प्रबन्धान्तरेण रसवानभिनेयार्थः कृतः । तं च स्वहस्तलिखितं मुनिर्भगवान्व्यसृजद्भगवतो भरतस्य तौर्यत्रिकसूत्रधारस्य ।

जनकः—किमर्थम् ?

लवः—स किल भगवान्भरतस्तमप्सरोभिः प्रयोजयिष्यतीति ।

जनकः—सर्वमिदमाकूततरमस्माकम् ।

लवः—महती पुनस्तस्मिन्भगवतो वाल्मीकेरास्था । यतः केषांचिदन्तेवासिनां हस्तेन तत्पुस्तकं भरताश्रमं प्रति प्रेषितम् । तेषामनुयात्रिकश्चापपाणिः प्रमादच्छेदनार्थमस्मद्भ्राता प्रेषितः ।

कौसल्या—जाद ! भादावि दे अत्थि ? [जात ! भ्रातापि तेऽस्ति ?]

लवः—अस्त्यार्यः कुशो नाम ।

कौसल्या—जेट्टोत्ति भणिदं होदि । [ज्येष्ठ इति भणितं भवति ।]

लवः—एवमेतत् । प्रसवानुक्रमेण स किल ज्यायान् ।

जनकः—किं यमावायुष्मन्तौ ?

इत्यर्थः ॥ कथाविभागः कथैकदेश. प्रणीतः किं न प्रबन्धः किं नोक्तः किमिति वा न प्रकाशितः न श्रावितो नाध्यापितश्च ॥ तस्य रामायणस्य कोऽपि अनिर्धारितः एकदेशोंऽशः । स च सप्तमे वक्ष्यमाणान्तर्नाटकार्थक इति ज्ञेयम् । प्रबन्धान्तरेण श्राव्यप्रबन्धातिरिक्तदृश्यप्रबन्धरूपकरूपेण वा रसवान् करुणाद्भुतरसप्रतिपादक· सर्वाकर्णनादितररसप्रतिपादकः अभिनेयः सत्त्वाङ्गिकादिचतुर्विधाभिनयप्रकारयोऽर्थः अभिधेयः यस्य तथोक्तः कृतः । मुनिर्वाल्मीकि· । तौर्यत्रिकसूत्रधारस्य नृत्तगीतवादित्रशास्त्राचार्यस्य भरतस्य भावरागतालशास्त्राचार्यत्वमूलकृत्तदाद्यक्षरघटितभरतनामकस्य तं प्रबन्धं अप्सरोभिः प्रयोज्यकर्तृभिः । प्रयोजयिष्यतीत्येतदर्थम् ॥ सर्वमिदं प्रणीतस्याप्रकाशनं प्रबन्धान्तरेण करणं भरतं प्रति प्रेषणं चाकूततरं गूढार्थकम् ॥ आस्था आवश्यकत्वप्रकारकेच्छा । अनुयात्रिकोऽनुचरः प्रमादस्यानवधानप्रयुक्तप्रतीतस्य च्छेदनार्थं निवृत्त्यर्थमस्मद्भ्राता मत्सहजः ॥ आर्यः पूज्यो ज्येष्ठ इति भणितं भवति अग्रज इति ध्वनितं भवति ॥ प्रसवानुक्रमेणोत्पत्तिप्रकारेण । ज्यायान् ज्येष्ठः । यमसाधारणपूर्वं जानुजत्वव्यवस्थापकजननानुपूर्वेण ज्येष्ठ इति भावः ॥ अत एव पृच्छति–**किं यमावित्ति** ॥

पाठा०—१ 'सन्दर्भान्त०', २ 'अपनोदनार्थं', ३ 'प्रसवक्रमेण', ४ 'यमजौ.'

टिप्प०—1 नाटकरूपेणेत्यर्थः, रसवान् करुणरसानुप्राणितश्रृङ्गाररसमयः ।

लवः—अथ किम् ।

जनकः—वत्स ! कथय कथाप्रपञ्चस्य कियान्पर्यन्तः ।

लवः—अलीकपौरापवादोद्विग्नेन राज्ञा निर्वासितां देवीं देवयजनसंभवां सीतामासन्नप्रसववेदनामेकाकिनीमरण्ये लक्ष्मणः परित्यज्य प्रतिनिवृत्त इति ।

कौसल्या—हा, वच्छे मुद्धमुहि ! को दाणिं दे सरीरकुसुमस्स झत्ति देव्वदुव्विलासपरिणामो एकाइणीए णिवडिदो । [हा वत्से मुग्धमुखि ! क इदानीं ते शरीरकुसुमस्य झटिति दैवदुर्विलासपरिणाम एकाकिन्या निपतितः ।]

जनकः—हा वत्से !

नूनं त्वया परिभवं च वनं च घोरं
तां च व्यथां प्रसवकालकृतामवाप्य ।
क्रव्याद्गणेषु परितः परिवारयत्सु
संत्रस्तया शरणमित्यसकृत्स्मृतोऽहम् ॥ २३ ॥

लवः—आर्ये ! कावेतौ ?

अरुन्धती—इयं कौसल्या । अयं जनकः । (लवः सबहुमानखेदकौतुकं पश्यति ।)

जनकः—अहो, निर्दयता दुरात्मनां पौराणाम् । अहो, रामभद्रस्य क्षिप्रकारिता ।

एतद्वैशसवज्रघोरपतनं शश्वन्ममोत्पश्यतः
क्रोधस्य ज्वलितुं झटित्यवसरश्चापेन शापेन वा ।

कथाप्रपञ्चस्य कथाविस्तरस्य पर्यन्तोऽवसानम् । यद्वा,–प्रपञ्चनं प्रकाशनं प्रपञ्चस्तस्य कोऽवधिः ? कियत्पर्यन्तं प्रकाशित इत्याशयः ॥ अलीको मिथ्याभूतः पौरापवादः पौरकर्तृकदोषकथनं तेनोद्विग्नेन सभ्रान्तेन राज्ञा रामेण निर्वासितां गृहान्निष्कासितां देवयजनसंभवां यागभूमिजातां परित्यज्य लक्ष्मणः प्रतिनिवृत्त इति यत् एष पर्यन्त इति योजना ॥ शरीरकुसुमस्य कुसुमसदृशशरीरस्य । दैवदुर्विलासस्य दैवदुश्चेष्टितस्य परिणामः फलोपधानम् । क इति दुःस्यते ॥ नूनमिति । क्रव्याद्गणेषु व्याघ्रादिषु परितः समन्तात्परिवारयत्सु सत्सु मण्डलीकृत्य व्याप्नुवत्सु सत्सु । संत्रस्तया त्वयाहं शरणमिति स्मृतः नून संभावये ॥ २३ ॥ दुरात्मनां दुर्बुद्धीनाम् । क्षिप्रकारिता असमीक्ष्यकारित्वम् ॥ एतद्वैशसेति । एतद्वैशसमेव महाव्यसनमेव वज्रस्याशने-

पाठा०–१ 'कीदृशः'. २ 'एकलिआए'. ३ 'असि'.

कौसल्या—(सभयकम्पम्।) भअवदि ! परित्ताअदु¹ । पसादेहि कुविदं राएसिं । [भगवति ! परित्रायताम्, प्रसादय कुपितं राजर्षिम्।]

लवः—

एतद्धि परिभूतानां प्रायश्चित्तं मनस्विनाम् ।

अरुन्धती—

राजन्नपत्यं रामस्ते पाल्याश्च कृपणा जनाः ॥ २४ ॥

जनकः—

शान्तं वा रघुनन्दने तदुभयं यत्पुत्रभाण्डं हि मे
भूयिष्ठद्विजबालवृद्धविकलस्त्रैणश्च पौरो जनः ॥ २५ ॥

(प्रविश्य सभ्रान्ता बटव ।)

कुमार कुमार ! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनास्माभिः स्वयं प्रत्यक्षीकृतः ।

लवः—अश्वोऽश्व इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते, तद्ब्रूत कीदृशः ।

घोरं पतन तीक्ष्णपतन शश्वदुत्पश्यतो मम क्रोधस्य शापेनानिष्टोपधायकसकल्पेन चापेन च मारकधनुषा च झटिति ज्वलितुमवसर प्राप्तशालता । राजर्षित्वादिति भाव ॥ प्रसादय प्रसन्न कुरु ॥ एतद्धिति । परिभूतानामवमतानां मनस्विना महामनसा प्रायश्चित्त कोपप्रतीकार । एतत् प्रसादनमित्यर्थं ॥ अपत्य राम कृपणजनाश्च ते पाल्याश्च रक्षणीया ॥ २४ ॥ शान्त वेत्यादि । वा अथवा । चापेन शापेन च ज्वलनाभावे इत्यर्थ । यद्यस्मात्पुत्रभाण्ड पुत्र एव भाण्ड मूलधन पुत्रभूतरामात्मकमूलधनम् । भूयिष्ठानि भूयासि द्विजा बाला शिशव वृद्धा स्थविरा विकला अन्धबधिरादय स्त्रैणं स्त्रीसमूह यस्य स तथोक्त पौरो जनश्च मे हि मदीया किल । तस्मात्तदुभयं चाप शापश्च शान्त भवतु निवृत्तं भवतु । रुषं न दधे कोपं न धारयामि । यद्वा,–यद्यस्माद्भूयिष्ठद्विजबालवृद्धविकलस्त्रैण पौरो जन । चकारेण राम समुच्चीयते । तदुभय पौरजनरामात्मकोभयं मे पुत्रभाण्ड पुत्रात्मकमूलधनवन्मम सरक्षणीयम्, तत्तस्मात् शान्त क्रोधेन ज्वलित्वा अलम् । रुष न दधे क्रोध न धारयामि। स्थैर्यद्योतनार्थं हि कथनम् ॥२५॥ बटव प्रविश्य । अत्र आहुरिति शेष । भूतविशेष प्राणिविशेष । जनपदेषु कोसलादिदेशेषु । आरण्यकत्वादेवमुक्ति । श्रूयते शाब्दबोधविषयो भवति । प्रत्यक्षीकृत चक्षुर्विषयीकृत । पशुसमाम्नाये पशुद्रव्यकयागप्रतिपादकवेदभागे, साङ्ग्रामिके युद्ध-

---

पाठा०–१ 'परित्ताहि परित्ताहि'.

बटवः—अये, श्रूयताम्,—

पश्चात्पुच्छं वहति विपुलं तच्च धूनोत्यजस्रं
दीर्घग्रीवः स भवति खुरास्तस्य चत्वार एव ।
शष्पाण्यत्ति प्रकिरति शकृत्पिण्डकानाम्रमात्रा-
न्किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः ॥२६॥

(इत्यजिने हस्तयोश्चाकर्षन्ति ।)

लवः—(सकौतुकोपरोधविनयम् ।) आर्याः ! पश्यत । एभिर्नीतोऽस्मि ।

(इति त्वरितं परिक्रामति ।)

अरुन्धतीजनकौ—महत्कौतुकं वत्सस्य ।

कौसल्या—अरण्णगब्भरूवालावेहिं तुम्हे तोसिदा अम्हे अ । भअवदि ! जाणामि तं पेक्खंती वंचिदा विअ । ता इदो अण्णदो भविअ पेक्खम्ह दाव पलाअंतं दीहाउं । [अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च । भगवति ! जानामि तं प्रेक्ष्यन्ती वञ्चितेव । तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत्पलायमानं दीर्घायुषम् ।

अरुन्धती—अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते ।

कञ्चुकी—(प्रविश्य ।) भगवान्वाल्मीकिराह 'ज्ञातव्यमेतदवसरे भवद्भि'रिति ।

काण्डे च । कीदृशः किंलक्षणः ? ॥ पश्चादित्यादि । सः अश्व इत्युच्यमानः विपुलं पुच्छं पश्चाद्वहति । 'वनमहिष. कोऽयमुभयत.पुच्छ' इत्यारण्यवासनानुरूपेण व्यावृत्त्यर्थं 'पश्चात्'पदम्; अन्यथा पुच्छस्य पश्चाद्वहनाव्यभिचारात् । 'विपुलम्' इत्यनेन खरव्यावृत्तिः । तस्य हि पुच्छं गोवद्रमूकृतं भवति । एवं च वक्ष्यमाणविशेषणानां तत्साधारणत्वेऽपि न दोषः । धूनोति चालयति । दीर्घग्रीवो भवति आयतकण्ठो भवति । तस्य खुराश्चत्वार एव, नाधिका इत्यर्थः । शष्पाणि बालतृणानि । अत्ति खादति । शकृत्पिण्डकान् पुरीषपिण्डकानाम्रमात्रान् रसालफलाद्युपरिमितान् प्रकिरति विक्षिपति । स पुनर्दूरं व्रजति गच्छति ॥ २६ ॥ कौतुकं हर्षः, उपरोधः बलात्क्रियमाणत्वम् । अरण्यगर्भाणां अरण्यचरशिशूनां रूपैरालापैश्च तोषिता यूयम् । अहं तं पश्यन्ती वञ्चितेति जानामि रामभद्रसंवादेन प्रलोभिताहमिति भावः । कञ्चुकी । यष्टिरित्यर्थः । अवसरे प्राप्तकाले । एतद्वाल्मीकिवाक्यमतिगम्भीरं गूढाशयं किमपि अपूर्वम् ॥ वृद्धानामरुन्धतीप्रभूतीनां वर्गः समूहः दृष्टं चक्षुर्विषयीकृतम् । नूनमाश्वमेधिकोऽयमश्व इत्यवगतं अनुमितम् । अश्वमेधाय प्रभवत्याश्वमेधिकः ॥ तत्काण्डमश्वमेधप्रतिपादकश्रुतिभागः । बालकाण्डं वा तत्रापि ह्यश्वमेधः

पाठा०—१ 'चाऽऽकर्षन्ति'. २ 'पश्यतु कौतुकं वत्सः ।'.

जनकः—अतिगम्भीरमेतत्किमपि । भगवत्यरुन्धति ! सखि कौसल्ये ! आर्य गृष्टे ! स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः ।

(इति निष्क्रान्तो वृद्धवर्गः ।)

(प्रविश्य)

बटवः—पश्यतु कुमारस्तावदाश्चर्यम् ।

लवः—दृष्टमवगतं च, नूनमाश्वमेधिकोऽयमश्वः ।

बटवः—कथं ज्ञायते ?

लवः—ननु मूर्खाः ! पठितमेव हि युष्माभिरपि तत्काण्डम् । किं न पश्यथ प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः ? तत्प्रायमेवान्यदपि दृश्यते । यदि चे विप्रत्ययस्तत्पृच्छथ ।

बटवः—भो भोः, किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति ?

लवः—(सस्पृहमात्मगतम् ।) अश्वमेध इति नाम विश्वजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः ।

(नेपथ्ये ।)

योऽयमश्वः पताकेयमथवा वीरघोषणा ।
सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः ॥ २७ ॥

लवः—(सगर्वमिति ।) अहो संदीपनान्यक्षराणि ।

प्रसक्त- । 'काण्डोऽस्त्री'त्युक्तेः क्लीबत्वम् । शतं कवचिनः शतं निषङ्गिणः शरधिवन्तः शतमित्यर्थः । शतं दण्डिनः शतं रक्षितार इत्येतन्न पश्यथ किमित्यर्थः । तत्प्रायमेवान्यदपि कवचिप्रभृति सुसदृशं चान्यदपि अनीकमित्यर्थः । विप्रत्ययो यदि संशयश्चेत् ॥ किंप्रयोजनः किंफलकः ? परिवृतः । रक्षितृभिरिति शेष- । पर्यटति परिवृतः संचरति परिगतो गच्छति ॥ अनागते वस्तुनीच्छा स्पृहा । सर्वक्षत्रपरिभावी सकलराजकुलपरिभवजनकः । उत्कर्षनिकष उपादेयवैलक्षण्यज्ञापकदृषद्विशेषः । ऊर्जस्वलः बलिष्ठ । अविचाल्यनिकष इत्यर्थः ॥ **योऽयमिति** । योऽयमाश्वमेधिकोऽश्वः । इयम् । अश्व इत्यर्थः । विधेयप्राधान्यात्स्त्रीत्वं पताकात्वं विधेयम् । सप्तावयवेषु लोकेषु एकवीरस्य एकेषु प्रधानेषु वीरयति पराक्रमत इत्येकवीरः तस्य । सप्तलोकेत्यत्र मध्यमपदलोपवत्समासः । पात्रादित्वं वा । वीरैक इत्यापत्तिवारणाय एकेषु वीरयतीति विग्रहोऽङ्गीकृतः । दशकण्ठकुलस्य रावणवंशस्य द्विट् शासिता । तस्य राघवस्य पताका विजयध्वज. । अथवा पूर्वोक्तातिरेकेण वीरघोषणा वीर इति जगदाकर्णनानुकूलव्यापारः ॥२७॥ गर्वः परोत्कर्षानादर. । संदीपनानि क्रोधजनकानि ।

पाठा०—१ 'एव बलमिदं'. २ 'इह न प्रत्ययः तद्गत्वा पृ°'.

टिप्प०—1 अत्र 'शत' पदं तन्न्यूनतापरिहारार्थम्, अनेकत्वव्यापकं वा, अन्यथा 'संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः' (५।१२) इत्यादिना विरोधः प्रसज्येत ।

बटवः—किमुच्यते ? प्राज्ञः खलु कुमारः ।

लवः—भो भोः, तत्किमक्षत्रिया पृथिवी यदेवमुद्घोष्यते ?

(नेपथ्ये ।) रे रे महाराजं प्रति कुतः क्षत्रियाः ?

लवः—धिग्जाल्मान्,

यदि नो सन्ति सन्त्येव केयमद्य विभीषिका ? ।
किमुक्तैरेभिरधुना तां पताकां हरामि वः ॥ २८ ॥

हे बटवः ! परिवृत्य लोष्टैरभिघ्नन्तो नयतैनमश्वम् । एष रोहितानां मध्ये-चरो भवतु ।

(प्रविश्य सक्रोधः ।)

पुरुषः—धिक्चपल ! किमुक्तवानसि ? तीक्ष्णतरा ह्यायुधश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते । राजपुत्रश्चन्द्रकेतुर्दुर्दान्तः, सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति तावत्त्वरितमनेन तरुगहनेनापसर्पत ।

बटवः—कुमार ! कृतं कृतमश्वेन । तर्जयन्ति विस्फारितशरासनाः कुमारमायुधीयश्रेणयः । दूरे चाश्रमपदमितः । तदेहि, हरिणप्लुतैः पलायामहे ।

'मनःप्रज्वलनं क्रोधः' इति ह्युक्तम् ॥ एवं पूर्वोक्तरीत्या उद्घोष्यत इति यावत्तत्किमक्षत्रिया पृथिवीत्यन्वयः ॥ महाराजं प्रति तदाभिमुख्येन कुतः कस्माद्देतो. क्व वा ॥ धिग्जाल्मानसमीक्ष्यकारिणः । भवद्विषयका निन्देत्यर्थः । अक्षत्रिया इत्यनुपपद्यते । क्षत्रिया न सन्तीति भवद्भिरुच्यते यदि तर्हि सन्त्येवेत्यवगन्तव्यम् । अद्य क्षत्रियसत्ताधिकरणेऽस्मिन्दिवसे इयं विभीषिका भयोत्पादनं का ? कीदृशीत्यर्थः । एभिरुक्तैरधुना किम् ? न किमपीत्यर्थ. । तां वः पताकां हराम्यन्यत्र प्रापयामि ॥ २८ ॥ अभिघ्नन्तस्तर्जयन्त· । रोहितानां मृगविशेषाणाम् ॥ आयुधश्रेणयः शस्त्रपङ्क्तयस्तीक्ष्णतरा हि । त्वत्तोऽपि क्रूरा इत्यर्थः । दृप्तां दर्पयुक्तां वाचं न सहन्ते । शिक्षणाभाववन्तो न भवन्तीत्यर्थः । सोऽपि चन्द्रकेतुरिति योजना । दुर्दान्तोऽमर्षशीलः अपूर्वारण्यदर्शनेनाननुभूतविपिनावलोकनेनाक्षिप्तहृदयो व्यासक्तमनाः तरूणां गहनेन दुर्गमसंनिवेशेनापसर्पत पलायध्वम् ॥ कृतमश्वेनेति । अश्वेन साध्यं किमपि नास्तीत्यर्थ. । गर्हाया द्विरुक्तिः । अज्ञानादेव वयमत्र प्रवृत्ता इति

पाठा०—१ 'ते सन्ति'. २ '°मध्ये वाऽरश्चरतु'. ३ 'ह्यायुधीय°'. ४ 'कृतमश्वेनानेन'. ५ 'विस्फुरितशस्त्राः'.

लवः—किं नाम विस्फुरन्ति शस्त्राणि । (इति धनुरारोपयन् ।)

ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-
मुद्भूरिघोरघनघर्घरघोषमेतत् ।
ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-
जृम्भाविडम्बि विकटोदरमस्तु चापम् ॥ २९ ॥

(इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे ।)

चतुर्थोऽङ्कः ।

भावः । विस्फारितशरासना घोषवद्धनुषः । तर्जयन्ति भयमुत्पादयन्ति । आश्रमपदं चाश्रमस्थानं च दूरे । विप्रकर्ष इत्यर्थः । हरिणानां यानि प्लुतानि अभूस्पर्शगमनानि । तत्सदृशगमनैरित्यर्थः । पलायामहे परागता भवामः । 'अय गतौ' तस्य परेत्युपसर्गपूर्वकत्वम् 'उपसर्गस्यायतौ' (पा. ८।२।१९) इति लत्वम् ॥ विस्फुरन्ति घोषयुक्तानि । धनुरारोपयन् । ज्यामिति शेषः । ज्याजिह्वयेत्यादि । ज्या मौर्वी सैव जिह्वा रसना तया वलयिता वेष्टिता । उत्कटकोटिरेवोत्तुङ्गाग्रभाग एव दंष्ट्रा यस्य तथोक्तम् । उद्भूरयोऽसंख्याता घोरा भयजनका घनाः सान्द्रा घर्घरघोषा यस्य तत्तथोक्तम् । एतच्चापम् । क्लीबत्वं विचारयितव्यम्, सामान्ये नपुंसकत्वं वा । अथवा,–'भयामृतसकृद्धस्त्रचापाभरणलाञ्छन'मिति नपुंसकशेषोक्तेः क्लीबत्वम् । ग्रासे कवलने प्रसक्तं उद्युक्तं हसत् हासयुक्तमन्तकवक्त्रयन्त्रं व्याघ्रादिमारणयन्त्रसदृशकृतान्तस्य कुहरं तस्य जृम्भाविडम्बि जृम्भानुकारि विकटं विषमं उदरं मध्यं यस्य तथाविधमस्तु । यस्य चापस्य तथाभवनं प्राप्तकालमित्यर्थः । जिह्वेव ज्या ज्याजिह्वेत्युपमालंकारो व्याख्येयः । कोटिदंष्ट्रेत्यत्र तु कोट्यात्मकं यद्दंष्ट्रासदृशमिति व्याख्येयम् । विशेष्यविशेषणभावस्य च कामचारत्वान्न दोष इत्याहुः ॥ २९ ॥

वाधूलवंशजनुषो भूसारनिवासराघवार्यस्य ।
उत्तररामचरित्रव्याख्यायामवसितस्तुरीयोऽङ्कः ॥

इति श्रीवाधूलवीरराघवविरचितायां भवभूतिभावतलस्पर्शिनीसमाख्यायामुत्तररामचरितव्याख्यायां चतुर्थोऽङ्कः ॥

पाठा०—१ 'मुद्गारि'.

पञ्चमाङ्कस्य कथावस्तु

ततोऽश्वसंरक्षकाः सप्तलोकैकवीरस्य रघुनन्दनस्य विजयध्वजरूपं दिव्यं मेध्याश्वमपहृतमवलोक्य तदपहारकेण लवेन समं योद्धुमारेभिरे। तत एकाकी लवोऽजितवीर्येण जृम्भकास्त्रेणासंख्येयां चमूं समरशिरसि गतसंज्ञतामापादयामास। तच्छ्रुत्वा चन्द्रकेतुः स्वयं लवेन सह योद्धुमुपतस्थौ। स तत्र लवमेकाकिनं पदातिनं च दृष्ट्वा 'पादचारिणा सह रथिनो न युध्यन्ति' इति क्षात्रधर्मस्तत्किमत्र शास्त्रमिति सुमन्त्रं पप्रच्छ। स च 'एष न्याय्यो धर्मः' इत्यादिदेश। ततो लवं रथारोहणं कुर्विति सुमन्त्रोक्ते 'अरण्यवासिनो वयमनभ्यस्तरथगतयः' इति लवस्तं जगाद। ततश्च तयोर्वीरोचितोक्तिप्रत्युक्तयः संवृत्ताः। चन्द्रकेतुरैक्ष्वाकुवीर्यं प्रशंसन् क्षात्रोध्वंसकपरशुरामस्य जेतारं रामचन्द्रं प्रति तव कटाक्षनिक्षेपोऽनुचितोऽत एव विरम समरातिप्रसंगात् इति लवं प्रत्याख्यातवान्। 'ब्राह्मणानां वाचि वीर्यं प्रथितम्, न तु बाहौ; शस्त्रग्राहिणो ब्राह्मणस्य जामदग्न्यस्य दमने रामचन्द्रस्य का नाम वीर्यस्तुतिः? एवमेव वालि-ताटकेन्द्रजिद्वधादौ राम-लक्ष्मणयोः कौशलस्य जनः सम्यगभिज्ञो वर्तते' इति रामलक्ष्मणापवादकस्य लवस्य वचनेन चन्द्रकेतुः क्रोधपराहतोऽभवन्। लवोऽपि समर एव दर्पनिकष इति मन्यमानस्तं युद्धयोग्यां समरभूमिमवतरावः इत्याह्वाययामास।

(नेपथ्ये)

भो भोः सैनिकाः ! जातमवलम्बनमस्माकम् ।

नन्वेष त्वरितसुमन्त्रनुद्यमानप्रोद्वल्गत्प्रजवितवाजिना रथेन ।
उत्खातप्रचलितकोविदारकेतुः श्रुत्वा वः प्रधनमुपैति चन्द्रकेतुः

(ततः प्रविशति सुमन्त्रसारथिना रथेन धनुष्पाणिः साद्भुतहर्षसंभ्रमश्चन्द्रकेतुः ।)

चन्द्रकेतुः—आर्य सुमन्त्र ! पश्य पश्य,—

किरति कलितकिंचित्कोपरज्यन्मुखश्री-
रविरतगुणगुञ्जत्कोटिना कार्मुकेण ।
समरशिरसि चञ्चत्पञ्चचूडश्चमूना-
मुपरि शरतुषारं कोऽप्ययं वीरपोतः ॥ २ ॥

आश्चर्यमाश्चर्यम्,—

मुनिजनशिशुरेकः सर्वतः संप्रकोपा-
न्नव-इव रघुवंशस्याप्रसिद्धिप्ररोहः ।

नेपथ्य इत्यादि । भो भोः सैनिकाः सेनासमवायिनः । जातमवलम्बनम्, आश्रयो लब्ध इत्यर्थः । **नन्विति** । सुमन्त्रनुद्यमानाः सुमन्त्रेण प्रेर्यमाणाः प्रोद्वल्गाः प्रकर्षेण चञ्चलाः प्रजविताः प्रकृष्टवेगयुक्ताः वाजिनोऽश्वा यस्मिंस्तथोक्तेन । उत्खातेषु निम्नोन्नतप्रदेशेषु प्रचलितकोविदारयुक्तध्वजवान् । प्रधनं युद्धं श्रुत्वा उपैति । ननु किल चूलिका । 'नेपथ्यान्तःस्थितैः पात्रैश्चूलिकाऽङ्कस्य सूचनम्' इत्युक्तेः ॥ १ ॥ **किरतीति** । कलितेनाहृतेन किंचित्कोपेन ईषन्मन्युना रज्यन्ती रक्तीभवन्ती मुखश्रीराननशोभा यस्य स तथोक्तः । अत्र प्रत्यर्थिनामकिंचित्करत्वात्किंचित्कोपेत्युक्तम् । चञ्चत्पञ्चचूडश्चलिताशिखण्डकः कोऽप्यपूर्वोऽयं वीरपोतः वीरशिशुः अविरतं विश्रान्तिरहितं यथा तथा गुणे ज्यायां गुञ्जन्त्यौ अव्यक्तशब्दवत्यौ कोटी अग्रे यस्य तथोक्तेन कार्मुकेण । करणत्वात्तृतीया । समरशिरसि युद्धरङ्गे चमूनामुपरि शरतुषारं बाणवर्षं किरति । तुषारो हि अतिसूक्ष्मसलिलवृष्टिः । अत्र 'रज्यन्मुखश्रीः कार्मुकेण' 'चञ्चत्पञ्चचूड' इत्येतैः 'शरतुषार'मित्यनेन च तडित्वतः शक्रचापयुक्तस्य चलिताभ्रस्य मेघशिशोरस्य च साम्यं व्यज्यते ॥ २ ॥ **मुनिजनेत्यादि** । एकः असहायः संप्रकोपात्प्रकृष्टमन्युना । लवकोपस्य तद्दृष्ट्याल्पत्वेऽपि चन्द्रकेतुबुद्ध्या महत्त्वाद्दोषः । सर्वतः समन्ताद्दलितानां करिकपोलग्रन्थीनां संधीनां टंकारेण दलनध्वनिनौ घोरं

पाठा०—१ 'प्रोद्वेल्लत्'. २ 'सैन्यकाये'. ३ '°ऽप्रसिद्धः प्र°'.

दलितकरिकपोलग्रन्थिटंकारघोर-
ज्वलितशरसहस्रः कौतुकं मे करोति ॥ ३ ॥

सुमन्त्रः—आयुष्मन् !

अतिशयितसुरासुरप्रभावं
शिशुमवलोक्य तथैव तुल्यरूपम् ।
कुशिकसुतमखद्विपां प्रमाथे
धृतधनुषं रघुनन्दनं स्मरामि ॥ ४ ॥

चन्द्रकेतुः—मम त्वेकमुद्दिश्य भूयसामारम्भ इति हृदयमपत्रपते ।

अयं हि शिशुरेकको मदभरेण भूरिस्फुर-
त्करालकरकन्दलीजटिलशस्त्रजालैर्बलैः ।
क्वणत्कनककिङ्किणीझणझणायितस्यन्दनै-
रमन्दमददुर्दिनद्विरदडामरैरावृतः ॥ ५ ॥

सुमन्त्रः—वत्स ! एभिः समस्तैरपि नालमस्य, किं पुनर्व्यस्तैः ?

चन्द्रकेतुः—आर्य ! त्वर्यतां त्वर्यताम् । अनेन हि महानाश्रितप्रमारोऽस्माकमारब्धः । तथा हि,—

आगर्जद्गिरिकुञ्जकुञ्जरघटानिस्तीर्णकर्णज्वरं
ज्यानिर्घोषममन्ददुन्दुभिरवैराध्मातमुज्जृम्भयन् ।

भयजनकं ज्वलितं शराणां सहस्रं यस्य तथोक्तम् । आनन्त्यवाची 'सहस्र'शब्दः । नवः प्ररूढ. रघुवंशस्य अप्रसिद्धिप्ररोह इव स्थितः अपख्यात्यङ्कुरवदिस्थितः मुनिजनशिशुः । मुनिजनाः शमप्रधानास्तेष्वपि बाल इत्यर्थः । मे कौतुकं हर्षं करोत्युत्पादयति ॥ ३ ॥ अतिशयितेति । तथैव तुल्यरूपम् । यथा रामेण तुल्यप्रभावस्तथैव तुल्याकार इत्यर्थः । तथाविधं कुशिकसुतमखद्विपां सुबाहुप्रभृतीनाम् । अत्र स्मृतिमदलंकारः ॥ ४ ॥ अपत्रपते लज्जते । अयं हीति । अयमेकक: शिशुः एकाकी बालः । मदभरेण वीरपानेन समुपजनितमदातिशयेन भूरि अधिकं स्फुरन्ति चलितानि करालानि क्रूराणि करकन्दलीषु करशाखाग्रेषु जटिलानि निबिडानि शस्त्रजालानि येषां तथोक्तैः । क्वणन्तीभिः शब्दवतीभिः कनककिङ्किणीभिः हेममयक्षुद्रघण्टिकाभिः झणझणायितैः शब्दविशेषयुक्तैरमन्दमदैरतिशयितदानवारिभिर्दुर्दिनैरन्धकारितैर्द्विरदैर्गजैः कारणैः डामरैः भयंकरैर्बलैः सैन्यैरावृतः ॥ ५ ॥ समस्तैः सहितैर्व्यस्तैः पृथक्स्थितैर्नालम् । न पर्याप्तिरित्यर्थः । आश्रितजनानामुपजीविजनानां प्रमारः मारणम् । आगर्जदिति । वीरः अयं लवः अमन्ददुन्दुभिरवैरतिशयित-

पाठा०—१ 'किमस्य'. २ 'ज्वरं'. ३ 'उत्तम्भयन्'.

वेल्लद्भैरवरुण्डखण्डनिकरैर्वीरो विधत्ते भुवं
तृप्यत्कालकरालवक्त्रविघसव्याकीर्यमाणामिव ॥ ६ ॥

सुमन्त्रः—(स्वगतम्।) कथमीदृशेन सह वत्सस्य चन्द्रकेतोर्द्वन्द्वसंप्रहारमनुजानीमः? (विचिन्त्य) अथवा इक्ष्वाकुकुलवृद्धाः खलु वयम्। प्रत्युपस्थिते रणे च का गतिः?

चन्द्रकेतुः—(सविस्मयलज्जासंभ्रमम्।) हन्त धिक्, अपावृत्तान्येव सर्वतः सैन्यानि मम।

सुमन्त्रः—(रथवेगं निरूप्य।) आयुष्मन्! एष ते वाग्विषयीभूतः स वीरः।

चन्द्रकेतुः—(विस्मृतिमभिनीय।) आर्य! किंनामधेयमाख्यातमाहायकैः?

सुमन्त्रः—लव इति।

चन्द्रकेतुः—

भो भो लव! महाबाहो! किमेभिस्तव सैनिकैः।
एषोऽहमेहि मामेव तेजस्तेजसि शाम्यतु ॥ ७ ॥

सुमन्त्रः—कुमार! पश्य पश्य,—

विनिवर्तित एष वीरपोतः
पृतनानिर्मथनात्त्वयोपहूतः।

स्तनयित्नुरवादिभावलीना-
मवमर्दादिव दृप्तसिंहशावः ॥ ८ ॥

(ततः प्रविशति धीरोद्धतपराक्रमो लवः ।)

लवः—साधु राजपुत्र ! साधु ! सत्यमैक्ष्वाकः खल्वसि । तदहं परागत एवास्मि ।

(नेपथ्ये महान्कलकलः ।)

लवः—(सावष्टम्भं परावृत्य ।) आः, कथमिदानीं भग्ना अपि पुनः प्रतिनिवृत्ताः पृष्ठानुसारिणः पर्यवष्टम्भयन्ति मां चमूपतयः ? धिग्जाल्मान्,—

अयं शैलाघातक्षुभितवडवावक्त्रहुतभु-
क्प्रचण्डक्रोधार्चिर्निचयकवलत्वं व्रजतु मे ।
समन्तादुत्सर्पद्घनतुमुलहेलाकलकलः
पयोराशेरोघः प्रलयपवनास्फालित इव ॥ ९ ॥

(सवेगं परिक्रामति ।)

चन्द्रकेतुः—भो भोः कुमार !

अत्यद्भुतादपि गुणातिशयात्प्रियो मे
तस्मात्सखा त्वमसि यन्मम तत्तवैव ।
तत्किं निजे परिजने कदनं करोषि
नन्वेष दर्पनिकषस्तव चन्द्रकेतुः ॥ १० ॥

पञ्चमी । उपहूत आहूतः । स्तनयित्नुरवात् मेघध्वनेः सिंहशावः सिंहशिशुरिव विनिवर्तित इत्येतत्पद्यस्यार्थः ॥ ८ ॥ **ततः प्रविशतीति** । धीरोद्धतो युद्धोद्धुरः पराक्रमो यस्येत्यर्थः । धीरोदात्तादयश्चत्वारो नायकाः प्रसिद्धाः, तेषु प्रायेण भटानामेव धीरोद्धतत्वमायाति । सर्वे भग्ना अपि पराजिता अपि पर्यवष्टम्भयन्ति समीपस्थिता भवन्ति । 'अवाच्चालम्बनाविदूर्ययोः' (पा. ८।३।६८) इति षत्वम् । **अयं शैलेत्यादि** । अयमोघः युष्माकं समूहः शैलाघातेन मन्दरसंघट्टनेन क्षुभितो विपर्यस्तः यः वडवावक्त्रहुतभुग्वाडवमुखाग्निस्तद्वत्प्रचण्डस्य तीक्ष्णस्य क्रोधार्चिर्निचयस्य कोपाग्निज्वालासमूहस्य कवलत्वं भक्ष्यत्वं व्रजतु । क इवेत्यत आह—पयोराशेरोघः प्रवाह इवेत्यर्थः ॥ ९ ॥ **अत्यद्भुतादिति** । मम त्वं सखा, तस्मान्मदीयं यद्वस्तु तत्तवैव त्वदीयमेव; तन्निजे परिजने किमर्थमेवं कदनं युद्धं करोषि ? तव

पाठा०—१ '°वृत्य युद्धाभिसारिणः'. २ 'असि'.

लवः—(सहर्षसंभ्रमं परावृत्य।) अहो, महानुभावस्य प्रसन्नकर्कशा वीरवचनप्रयुक्तिर्विकर्तनकुलकुमारस्य। तत्किमेभिरेनमेव तावत्संभावयामि।

(पुनर्नेपथ्ये कलकलः।)

लवः—(सक्रोधनिर्वेदम्।) आः, कदर्थीकृतोऽहमेभिर्वीरसंवादविघ्नकारिभिः पापैः। (इति तदभिमुखं परिक्रामति।)

चन्द्रकेतुः—आर्य! दृश्यतां द्रष्टव्यमेतत्,—

> दर्पेण कौतुकवता मयि बद्धलक्ष्यः
> पश्चाद्बलैरनुसृतोऽयमुदीर्णधन्वा।
> द्वेधा समुद्धतमरुत्तरलस्य धत्ते
> मेघस्य माघवतचापधरस्य लक्ष्मीम् ॥ ११ ॥

सुमन्त्रः—कुमार! एवैनं द्रष्टुमपि जानाति। वयं तु केवलं परवन्तो विस्मयेन।

चन्द्रकेतुः—भो भोः, राजानः!

> संख्यातीतैर्द्विरदतुरगस्यन्दनस्थैः पदाता-
> वत्रैकस्मिन्कवचनिचितैर्नद्धचर्मोत्तरीये।
> कालज्येष्ठैरपरवयसि ख्यातिकामैर्भवद्भि-
> र्योऽयं बद्धो युधि समभरस्तेन धिग्वो धिगस्मान् ॥१२॥

दर्पपरीक्षास्थानमेष चन्द्रकेतुरित्यर्थः ॥१०॥ प्रसन्ना प्रसादवती कर्कशा च कठिना च आपाततो हृद्या, पर्यालोचने तु कठिनेत्यर्थः। वीरवचनप्रयुक्तिः वीरवादप्रयोगः। संभावयामि पुरस्करोमि ॥ कदर्थीकृतः अनुचितव्यापारवान्कृतः। वीरसंवादस्य चन्द्रकेतोरुक्तिप्रत्युक्तिकाया युद्धस्य वा ॥ **दर्पेणेति**। कौतुकवता सामर्थ्यदर्शनेच्छायुक्तेन दर्पेण बलेन मयि बद्धलक्ष्यः दत्तचक्षुर्मयि व्यवसितलक्ष्यत्ववान्। उदीर्णधन्वा उत्क्षिप्तचापः। द्वेधा मयि बले चाभिमुखोऽयं लवः द्वेधा समुद्धतस्य चलितस्य मघवत्सबन्धिचापधरस्य वर्षाकालमेघस्य लक्ष्मीं श्रियं धत्ते ॥११॥ **संख्येति**। संख्यातीतैरसंख्येयैः। द्विरदतुरगस्यन्दनेषु तिष्ठन्तीति द्विरदतुरगस्यन्दनस्थास्तथाविधैः। कवचनिचितैर्वारबाणपिहितैः, अपरवयसि बार्धके ख्यातिकामैः विजयप्रशस्तिकामनावद्भिः कालज्येष्ठैर्वयोधिकैः, न तु शौर्येणेत्यर्थः। भवद्भिरेकस्मिन्नसहाये पदातौ पादचारिणि नद्धचर्मोत्तरीयेऽस्मिन् शिशौ विषये योऽयं समभरः

पाठा०—१ 'मेघ्य°'. २ 'अभिनववयःकाम्यकाये भवद्भिः'. ३ 'परिकरः'.

लवः—(सोन्माथम्।)आः, कथमनुकम्पते नाम ? (ससंभ्रमं विचिन्त्य।) भवतु, कालहरणप्रतिषेधाय जृम्भकास्त्रेण तावत्सैन्यानि संस्तम्भयामि। (इति ध्यानं नाटयति।)

सुमन्त्रः—तत्किमकस्मादुल्लोलाः सैन्यघोषाः प्रशाम्यन्ति ?

लवः—पश्याम्येनमधुना प्रगल्भम्।

सुमन्त्रः—(ससंभ्रमम्) वत्स ! मन्ये कुमारकेणानेन जृम्भकास्त्रमामन्त्रितमिति।

चन्द्रकेतुः—अत्र कः संदेहः ?

> व्यतिकर इव भीमस्तामसो वैद्युतश्च
> प्रणिहितमपि चक्षुर्ग्रस्तमुक्तं हिनस्ति।
> अथ लिखितमिवैतत्सैन्यमस्पन्दमास्ते
> नियतमजितवीर्यं जृम्भते जृम्भकास्त्रम्॥ १३॥

आश्चर्यमाश्चर्यम्,—

> पातालोदरकुञ्जपुञ्जिततमश्यामैर्नभो जृम्भकै-
> रुत्तप्तस्फुरदारकूटकपिलज्योतिर्ज्वलद्दीप्तिभिः।
> कल्पाक्षेपकठोरभैरवमरुद्व्यस्तैरभिस्तीर्यते
> लीनाम्भोदतडित्कडारकुहरैर्विन्ध्याद्रिकूटैरिव॥ १४॥

एकोषभारः बद्धः तेन वः धिक्। युष्माकमव्यवधानेन निन्दा, अस्माकं तु युष्मद्द्वारा ॥ १२ ॥ अनुकम्पते मम दौर्बल्यमाशङ्क्य मद्दुःखं परिजिहीर्षति। कालहरणप्रतिषेधाय कालयापननिवृत्तये संस्तम्भयामि निवृत्तव्यापाराणि करोमि। प्रशाम्यन्ति विरम्यन्ति॥ प्रगल्भं प्रौढम्॥ आमन्त्रितमाहूतम्॥ कः संदेहः ? आमन्त्रित इत्यत्र संशयः कः इत्यर्थः। मन्ये इत्यस्य संभावनावाचित्वात्तस्याश्चोत्कटैकतरकोटिसंशयरूपत्वात्। व्यतिकर इति। तमःसंबन्धी तामसः, विद्युत्संबन्धी वैद्युतश्च। तथाविधो व्यतिकरः संपर्कः। प्रणिहितमपि प्रयत्नेन निक्षिप्तमपि ग्रस्तं च तन्मुक्तं च। खञ्जकुब्जादिवत्समासः। तमसा ग्रस्तं ज्योतिषा मुक्तम्। तमसस्तत्कल्पत्वाद्ग्रस्तत्वम्, ज्योतिषि च कार्यकरत्वात्ततो मुक्तत्वम्। चक्षुर्हिनस्ति बाधते। नियतं निश्चितम्॥ १३॥ आश्चर्यमभूतपूर्वम्। पातालेति। पातालोदरमेव कुञ्जः गुहा तस्मिन्पुञ्जितानि संहतभावं प्राप्तानि यानि तमांसि तद्वत् श्यामैः उत्तप्तं स्फुरत्तेजिष्ठं च यदारकूटं त्रपुधातुविशेषस्तस्य यत्कपिलं पिशङ्गं ज्योतिस्तद्वज्ज्वलद्दीप्तिभिः, अत एव कल्पाक्षेपे कल्पावसाने कठोरेण दृढेन भैरवेण भीतिजनकेन मरुता व्यस्तैर्वियोजितैर्लीनाम्भोदानि तडित्कडाराणि च कुहराणि येषां तथोक्तः। कडारः कपिलः। विन्ध्याचलशृङ्गैरिव स्थितैः जृम्भ-

पाठा०—१ 'अकस्मात्सैन्यघोषः प्रशाम्यति'. २ 'अवस्तीर्यते'.

सुमन्त्रः—कुतः पुनरस्य जृम्भकाणामागमः स्यात्?

चन्द्रकेतुः—भगवतः प्राचेतसादिति मन्यामहे।

सुमन्त्रः—वत्स! नैतदेवमस्त्रेषु विशेषतो जृम्भकेषु; यतः,—

कृशाश्वतनया ह्येते कृशाश्वात्कौशिकं गताः।
अथ तत्संप्रदायेन रामभद्रे स्थिता इति॥ १५॥

चन्द्रकेतुः—अपरेऽपि प्रचीयमानसत्त्वप्रकाशाः स्वयं सर्वे मन्त्रदृशः पश्यन्ति।

सुमन्त्रः—वत्स! सावधानो भव। परागतस्ते प्रतिवीरः।

कुमारौ—(अन्योन्यं प्रति।) अहो, प्रियदर्शनः कुमारः। (सस्नेहानुरागं निर्वर्ण्य।)

यदृच्छासंवादः किमु गुणगणानामतिशयः
पुराणो वा जन्मान्तरनिविडबद्धः परिचयः।
निजो वा संबन्धः किमु विधिवशात्कोऽप्यविदितो
ममैतस्मिन्दृष्टे हृदयमवधानं रचयति॥ १६॥

कैर्नभः अभिलीयते आच्छाद्यते॥१४॥ कुतः पुनः कस्मात्पुरुषात्पुनरस्य लवस्य?॥ मन्त्रेषु विषये एतदागमनमेवं त्वन्मतरीत्या न घटते। जृम्भकास्त्रेषु विषये एतत्प्राचेतसादधिगम इत्येतद्विशेषत एव तु न घटते। कृशाश्वेति। **कृशाश्वतनया ह्येते** इति। एते अस्त्रदेवताविशेषाः कृशाश्वमुनिना आदौ जनिताः। हीति प्रसिद्धौ। कौशिकं विश्वामित्रम्। अथानन्तरं तत्संप्रदायेन विश्वामित्रोपदेशेन॥ १५॥ अपरेऽपि भवदुक्तेभ्योऽन्येऽपि प्रचीयमानसत्त्वप्रकाशाः व्याप्नुवत्संवित्प्रकाशाः। मन्त्रदृशः स्वयमेव संप्रदायेन विनापि॥ सावधानोऽनन्यमनाः भव॥ कुमारौ लवचन्द्रकेतू। प्रियं सुखजनकं दर्शनं यस्य स तथोक्तः। स्नेहः मैत्री॥ अनुरागो भोग्यताशालम्। **यदृच्छेति**। यदृच्छया दैवेन संवादः समागमः यस्य स तथोक्तः। यदृच्छया दैवेन संवाद एकरूपं यस्य तथोक्तो वा। रामादिगुणगणैरेकरूप इति हृदयम्। तथाविधो गुणगणानामतिशयः किमु? पुराणः पुरापि भवः। जन्मान्तरेष्वन्येषु जन्मसु निबिडबद्धः दृढारूढः परिचयो वासना किमु? विधिवशाद्दैवेच्छया अविदितः कोऽपि निजः संबन्धः जननसंबन्धः किमु? यत एवं ततो हृदयं कर्तृ अवधानं व्यापारान्तररहिततां रचयति करोति। अथवा एतस्मि-

---

पाठा०—१ 'अपि'. २ 'किमु किमु गुणा°'.

टिप्प०—1 यच्चोक्तं **रामायणे** (बा. स. २१।१३)—'सर्वास्त्राणि कृशाश्वस्य पुत्राः परमधार्मिकाः। कौशिकाय पुरा दत्ता यदा राज्यं प्रशासति॥ तेऽपि पुत्राः कृशाश्वस्य प्रजापतिसुतासुताः। नैकरूपा महावीर्या दीप्तिमन्तो जयावहाः॥ जया च सुप्रभा चैव दक्षकन्ये सुमध्यमे। ते सुतेऽस्त्राणि शस्त्राणि शतं परमभास्वरम्॥' इति।

सुमन्त्रः—भूयसां जीविनामेव धर्म एष यत्र स्वरसमयी कस्यचित्क्वचित्प्रीतिः, यत्र लौकिकानामुपचारस्तारामैत्रकं चक्षूराग इति । तदप्रतिसंख्येयनिबन्धनं प्रमाणमामनन्ति ।

अहेतुः पक्षपातो यस्तस्य नास्ति प्रतिक्रिया ।
स हि स्नेहात्मकस्तन्तुरन्तर्भूतानि सीव्यति ॥ १७ ॥

कुमारौ—(अन्योन्यमुद्दिश्य ।)

एतस्मिन्मसृणितराजपट्टकान्ते
मोक्तव्याः कथमिव सायकाः शरीरे ।
यत्प्राप्तौ मम परिरम्भणाभिलाषा-
दुन्मीलत्पुलककदम्बमङ्गमास्ते ॥ १८ ॥

किं चाक्रान्तकठोरतेजसि गतिः का नाम शस्त्रं विना
शस्त्रेणापि हि तेन किं न विषयो जायेत यस्येदृशः ।
किं वक्ष्यत्ययमेव युद्धविमुखं मामुद्यतेऽप्यायुधे
वीराणां समयो हि दारुणरसः स्नेहक्रमं बाधते ॥ १९ ॥

न्दृष्टे सति मम हृदय कर्म गुणातिशयादिषु त्रिषु अन्यतमावधानता अवधानं अवहितं करोतीति । द्विकर्माणि च ल्युडिस्यप्याहु ॥१६॥ **भूयसामि**त्यादि । यत्र यस्यां प्रीतौ । तारामैत्री मैत्री तारा कनीनिका तत्प्रेम वा ॥ चक्षूराग आदराद्वीक्षणम् । 'चक्षु प्रीतिर्मनेयन' इत्युक्तचक्षूराग इति च लौकिकानां जनानामुपचारो व्यवहारस्तादृशी कस्यचित्पुरुषस्य क्वचित्पुरुषे स्वरसमयी अकृत्ररसा अकृत्रिमा वा प्रीतिरिति यत् एष । विधेयप्राधान्यात्पुंस्त्वम् । भूयसा महीयसा जीविना प्राणभृता धर्म स्वभाव । अप्रतिसंख्येयनिबन्धनमविचारणीयमूल तत्प्रेम प्रमाण यथार्थोनुभवविषयमामनन्ति असकृद्वदन्ति । **अहेतुरि**ति । य अहेतुर्निष्कारणक पक्षपात आत्मीयत्वप्रतिसंधानमूलकानुकूलज्ञानरूपस्तस्य अहेतुकपक्षपातस्य प्रतिक्रिया निवर्तनव्यापार नास्ति न सभवति । स्नेहात्मक प्रेममय स तन्तु भूतानि प्राणिन अन्त सीव्यति अन्त स्यूतानि करोति ॥१७॥ **एतस्मिन्नि**ति । राजपट्ट नीलरत्न पट्ट यस्य तद्वत्कान्ते कमनीय एतस्मिन् लवे चन्द्रकेतौ वा । परिरम्भणाभिलाषादालिङ्गनेच्छया । उन्मीलत्पुलककदम्बं उद्यद्रोमाञ्चनिकुरम्बम् ॥१८॥ **किं चे**ति । किं च पूर्वोक्तादन्यत् । आक्रान्तकठोरतेजसि आक्रान्त प्राप्त कठोर पूर्ण तेज पराभिभवनसामर्थ्यं यस्य तस्मिन्विषये शस्त्र विना का गति शस्त्रसाधनयुद्धादृते किं कर्तव्यम् ? न किमपीत्यर्थ । तर्हि शरीरसौभाग्यानुरोधेन शस्त्रन्यास क्रियतामित्यत आह—**शस्त्रेणे**ति । यस्य शस्त्रस्य ईदृश महावीर, न जायेत तेन शस्त्रेणापि

पाठा०—१ 'भूयसा जीवधर्म एष यद्रसमयी' २ 'तमप्रतिसंख्येयमनिबधन प्रेमाण'.

सुमन्त्रः—(लवं निर्वर्ण्य साश्रमात्मगतम्।) हृदय! किमन्यथा परिप्लवसे?

मनोरथस्य यद्बीजं तद्दैवेनादितो हृतम्।
लतायां पूर्वलूनायां प्रसवस्योद्भवः कुतः? ॥ २० ॥

चन्द्रकेतुः—अवतराम्यार्य सुमन्त्र! स्यन्दनात्।

सुमन्त्रः—कस्य हेतोः?

चन्द्रकेतुः—एकस्तावदयं वीरपुरुषः पूजितो भवति। अपि च,—खल्वार्य! क्षत्रधर्मः परिपालितो भवति। न रथिनः पादचारमभियुञ्जन्तीति शास्त्रविदः परिभाषन्ते।

सुमन्त्रः—(स्वगतम्।) आः, कष्टां दशामनुप्रपन्नोऽसि।

कथं हीदमनुष्ठानं मादृशः प्रतिषेधतु।
कथं वाऽभ्यनुजानातु साहसैकरसां क्रियाम्॥ २१॥

चन्द्रकेतुः—यदा तातमिश्रा अपि पितुः प्रियसखं त्वामर्थसंशयेषु पृच्छन्ति तत्किमार्यो विमृशति?

सुमन्त्रः—आयुष्मन्! एवं यथाधर्ममभिमन्यसे।

किम्? न किमपीत्यर्थः। तर्हि सौकुमार्यवीर्ययोः प्राबल्यदौर्बल्यविचारेण सौकुमार्यानुसारेण शस्त्रन्यासः क्रियतामित्यत्राह—उद्यतेऽप्यायुधे युद्धविमुखं मामयमेव किं वक्ष्यति? यत एव ततः दारुणरसः क्रौर्यैकवेषः शूराणां समयः आचारः स्नेहक्रमं स्नेहव्यापारपरिपाटीं बाधते निवर्तयति ॥१९॥ अन्यथा संभाव्यविषयानुसारेण परिप्लवसे चञ्चलीभवसि? रामसादृश्यात्तदपत्यं लव इति किं शङ्कसे, इति भावः। **मनोरथस्ये**ति। मनोरथस्य अभिलष्यमाणलवनिष्ठरामापत्यत्वस्य यद्बीजं सीतारूपं, तदादितो हृतं गर्भिणीदशायामेव नष्टम्। 'लूनपूर्वायाम्' इति पाठे पूर्वं लूना छिन्ना तथाविधायाम्। भूतपूर्वनिर्देशात् लूनशब्दस्य पूर्वनिपातः। 'पूर्वलूनायाम्' इति पाठे तु पूर्वस्मिन् काले लूनेत्यर्थः। प्रसवस्य पुष्पस्य ॥ २० ॥ वीरपुरुषः लवः पूजितस्तावद्भवति। द्वयोरवतरणप्रयोजनयोः प्रथमं वीरपुरुषपूजा भवति। क्षत्रधर्मः खल्वपि परिपालितोऽनुष्ठितो भवति। पादचारं पदातिं रथिनो नाभियुञ्जन्तीति न युध्यन्तीति शास्त्रविदः क्षत्रधर्मप्रतिपादकार्थशास्त्रज्ञाः परिभाषन्ते नियच्छन्ति ॥ **कथं हीति**। इदमनुष्ठानं राजपुत्रस्य रथादवतरणं प्रतिषेधतु निषिध्यात्, निवर्तयेदित्यर्थः। साहसैकरसां साहसप्रकृत्येकवेशां

पाठा०—१ 'एकतः'. २ 'समनुगतः'. ३ 'न्याय्यमनु'.

टिप्प०—1 'न च हन्यात्स्थलारूढं न क्लीबं न कृताञ्जलिम्' (मनुः ७।९२) इति राजधर्मानुशासनम्।

एष सांग्रामिको न्याय्य एष धर्मः सनातनः ।
इयं हि रघुसिंहानां वीरचारित्रपद्धतिः ॥ २२ ॥

चन्द्रकेतुः—अप्रतिरूपं वचनमार्यस्य ।

इतिहासं पुराणं च धर्मप्रवचनानि च ।
भवन्त एव जानन्ति रघूणां च कुलस्थितिम् ॥ २३ ॥

सुमन्त्रः—(सस्नेहास्रं परिष्वज्य ।)

जातस्य ते पितुरपीन्द्रजितो निहन्तु-
र्वत्सस्य वत्स ! कति नाम दिनान्यमूनि ।
तस्याप्यपत्यमनुतिष्ठति वीरधर्मं
दिष्ट्यागतं दशरथस्य कुलं प्रतिष्ठाम् ॥ २४ ॥

चन्द्रकेतुः—(सकष्टम् ।)

अप्रतिष्ठे कुलज्येष्ठे का प्रतिष्ठा कुलस्य नः ।
इति दुःखेन तप्यन्ते त्रयो नः पितरोऽपरे ॥ २५ ॥

क्रियां अनुष्ठानमभ्यनुजानातु अनुमन्येत् ॥ २१ ॥ तातमिश्रा अपि, 'मिश्र'शब्दः पूज्यवाची । रामादयोऽपि अर्थसंशयेषु अनुष्ठेयानुष्ठेयसंदेहेषु पितुः प्रियसखं दशरथप्रियसखं त्वां पृच्छन्ति जिज्ञासां बोधयन्ति ॥ यथाधर्मं क्षत्रधर्मानतिक्रमेण । एष इति । संग्रामे भवः सांग्रामिकः, एष वीरपुरुषपूजारूपः न्याय्य उचितः । एष धर्मः क्षत्रधर्मपरिपालनरूपः सनातनश्चिरंतनः । इयं पूर्वोक्तद्वयी वीरचारित्र-पद्धतिः वीरव्यापारपरिपाटी ॥ २२ ॥ अप्रतिरूपं निस्तुलम् । **इतिहासमिति ।** इतिहासं रामायणभारतादिकम् । पुराणं 'सर्गश्च प्रतिसर्गश्च' इत्याद्युक्तलक्षणम् । धर्माः नित्यनैमित्तिकादयः प्रोच्यन्ते प्रकाश्यन्ते एभिरित्यर्थे 'करणाधिकरणयोश्च' (पा. ३।३।११७) इति ल्युट् । मन्वादिस्मृतयस्ता इत्यर्थः । कुलस्थितिं कुलमर्यादाम् ॥ २३ ॥ **जातस्येति ।** वत्स चन्द्रकेतो ! पितुर्जातस्य त्वत्पितुरस्मान्छिशोरिन्द्रजितो निहन्तुर्वत्सस्य लक्ष्मणस्य अमूनि दिनानि । एतावान् जीवितकाल इति यावत् । कति नाम कियन्ति नाम ? यद्वा,—वत्सस्य जातस्यामूनि दिनानि कति नामेत्यन्वयः । वत्सस्य लक्ष्मणस्य यज्जात जन्म तत्संबन्धिदिनानि । जन्मप्रभृतिदिनानीत्यर्थः । तस्याप्यपत्यं कर्तृ वीरधर्ममनुतिष्ठति अनुष्ठितं करोति । प्रतिष्ठामागत-मास्पदं प्राप्तं माहात्म्यं प्राप्तम् । 'प्रतिष्ठा स्थितिमाहात्म्ये' इति यादवः । दिष्ट्येत्या-

---

पाठा०—१ 'न्यायः'. २ 'दिष्ट्या गतं'. ३ 'रघुज्येष्ठे'.

टिप्प०—1 अत्र भावसाम्यद्योतकः कालिदासीयः श्लोकः 'नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः । न प्रकाममुजः श्राद्धे स्वधासंग्रहतत्पराः ॥' (रघु. १।६६) इति ।

सुमन्त्रः—अहह, हृदयमर्मदारणान्येव चन्द्रकेतोर्वचनानि ।

लवः—हन्त, मिश्रीकृतक्रमो रसो वर्तते,—

यथेन्दावानन्दं व्रजति समुपोढे कुमुदिनी
तथैवास्मिन्दृष्टिर्मम कलहकामः पुनरयम् ।
रणत्कारक्रूरक्वणितगुणगुञ्जद्गुरुधनु-
र्धृतप्रेमा बाहुर्विकचविकरालव्रणमुखः ॥ २६ ॥

चन्द्रकेतुः—(अवतरणं निरूपयन् ।) आर्य ! अयमसावैक्ष्वाकश्चन्द्र-केतुरभिवादयते ।

सुमन्त्रः—अहितस्यैव पुनः पराभवाय महानादिवराहः कल्पताम् । अपि च,—

देवस्त्वां सविता धिनोतु समरे गोत्रस्य यस्ते पति-
स्त्वां मैत्रावरुणोऽभिनन्दतु गुरुर्यस्ते गुरूणामपि ।
ऐन्द्रावैष्णवमग्निमारुतमथो सौपर्णमोजेऽस्तु ते
देयादेव च रामलक्ष्मणधनुर्ज्याघोषमन्त्रो जयम् ॥ २७ ॥

नन्दे ॥ २४ ॥ अप्रतिष्ठे इति । कुलज्येष्ठे रामे अप्रतिष्ठे अनास्पदे । अनपत्ये सतीति यावत् । त्रयः पितरः लक्ष्मणभरतशत्रुघ्नाः ॥ २५ ॥ हृदयमर्मणां हृदय-मध्यप्रदेशानां दारणानि छेदकानि, दुःखजनकानीत्यर्थः । यथेति । कुमुदिनी कुमु-द्वती सरस्योषधिर्वा इन्दौ चन्द्रे समुपोढे सति समुपागते सति यथाऽऽनन्दं संतोषं व्रजति तथा मम दृष्टिरस्मिन् चन्द्रकेतौ समुपोढे सति आनन्दं व्रजति । एवकारः सादृश्यद्योतनार्थः । रणत्कारेण रणदिति शब्देन क्रूरं भयंकरं क्वणितं घण्टादिरणितं येन तथोक्तेन गुणेन ज्यया गुञ्जदव्यक्तं गुरु महद्यद्धनुस्तस्मिन्धृतः प्रेमा कृता प्रीतिर्येन तथोक्तः । विकचानि विस्तृतानि, विकरालानि अतिदृढानि व्रणानि मुखे अग्रे यस्य तथोक्तः । अयं मम बाहुः पुनः बाहुस्तु । दृष्टिवैपरीत्यार्थः 'पुनः'शब्दः । कलहकामः युद्धाकाङ्क्षी । भवतीत्यर्थः । अतो रतिक्रोधस्थायिकयोः शृङ्गारवीरयोर्मेलनान्मिश्रितयोः रसयोः क्रमः परिपाटिर्वर्तत इति पूर्वेण संबन्धः । 'पुंभावं मनसा ययुः' इति न्यायेन कुमुदिनीदृष्टान्तात् शृङ्गाररसोत्पत्तिरिति द्रष्टव्यम् ॥ २६ ॥ अहितस्यैवानभिमतस्यैव पराभवायावमानायादिवराहः प्रलयार्णवमग्नभूमेरुद्धर्ता वराहरूपेणावतीर्णो भगवान् कल्पतां तस्मिन् समर्थो भवतु । देव इति । देवः सविता सूर्यः । धिनोतु प्रीणयतु ।

पाठा०—१ '°कृतो रसक्रमो'. २ '°लोल्वणरसः'. ३ 'सावित्रश्चन्द्र°'. ४ 'अर्जितं पुण्यमूर्जस्वि ककुत्स्थस्येव ते महः । श्रेयसे शाश्वतो देवो वराहः परिकल्पताम् ॥'. ५ 'पिता'. ६ 'ओजोऽस्तु'.

1 संततिर्वंशस्य प्रतिष्ठेत्यभिधीयते, अतः सांततिरहिते इत्याशयः ।

लवः—अतीव नाम शोभसे रथस्थ एव । कृतं कृतमत्यादरेण ।

चन्द्रकेतुः—तर्हि महाभागोऽप्यन्यं रथमलंकरोतु ।

लवः—आर्य ! प्रत्यारोपय रथोपरि राजपुत्रम् ।

सुमन्त्रः—त्वमप्यनुरुध्यस्व वत्सस्य चन्द्रकेतोर्वचनम् ।

लवः—को विचारः स्वेषूपकरणेषु ? किं त्वरण्यसदो वयमनभ्यस्तरथचर्याः ।

सुमन्त्रः—जानासि वत्स ! दर्पसौजन्ययोर्यदाचरितम् । यदि पुनस्त्वामीदृशमैक्ष्वाको राजा रामभद्रः पश्येत्तदायमस्य स्नेहेन हृदयमभिष्यन्दयेत् ।

लवः—अन्यच्च चन्द्रकेतो ! सुजनः स राजर्षिः श्रूयते । (सलज्जमिव ।)

यदि च वयमप्येवंप्रायाः क्रतुद्विषतामरौ
क इव न गुणैस्तं राजानं जनो बहु मन्यते ।
तदपि खलु मे स व्याहारस्तुरङ्गमरक्षिणां
विकृतिमखिलक्षत्राक्षेपप्रचण्डतयाकरोत् ॥ २८ ॥

मैत्रावरुणः वसिष्ठस्त्वामभिनन्दतु । इन्द्रस्य विष्णोश्च इदं ऐन्द्रावैष्णवम् । 'देवताद्वन्द्वे च' (पा. ७।३।२१) इति आनङ् । अग्नेर्मारुतस्य चेदमाग्निमारुतम् । 'इद्वृद्धौ' (पा. ६।३।२८) इति इत् । सौपर्णं गरुडदैवत्यमोजः पराक्रमः । ज्याघोष एव मन्त्रः । अयं पराभिभवं देयाद्दद्यात् । 'एतेर्लिङि' (पा. ७।४।२४) इत्येत्वम् ॥ २७ ॥ शोभसे हृद्यो भवसि । अत्यादरेण कृतम् । अवरोहणं न कार्यमिति भावः ॥ तर्हि मदवरोहणे अनिष्टे ॥ प्रत्यारोपय आरोपय । राजपुत्रं चन्द्रकेतुम् ॥ त्वमप्यनुरुध्यस्व यथा चन्द्रकेतुस्त्वद्वचनं रथादनवरोहणेनानुरोधितवान् तथा त्वमपि तद्वचनं रथारोहणेनानुसर ॥ स्वेषु स्वीयेषूपकरणेषु रथादिषु । अरण्ये सीदन्ति वसन्तीत्यरण्यसदः । 'सत्सूद्विष-' (पा. ३।२।६१) इत्यादिना क्विप् । अनभ्यस्तरथचर्याः अपरिचितरथगतयः ॥ दर्पसौजन्ययोः यदाचरितं पराक्रमसत्यमत्योरगुणोऽयमाचारस्तं जानासीत्यर्थः ॥ अयं लवः अस्य रामभद्रस्य हृदयमभिष्यन्दयेत् द्रावयेत् ॥ यदि चेति । वयमयं क्रतुद्विषतां यज्ञादिघातुकानामरौ शासितरि रामभद्रविषये एवंप्राया यदि प्रेमपात्रभूताश्चेत्क इव को वा तं राजानं रक्षकं तं रामभद्रं गुणैः शीलादिभिः हेतुभिः न बहु मन्यते, सर्वोऽपि तं संभावयतीत्यर्थः । सौजन्यस्य को विरोध इत्याह—तदपि तथापि अखिलक्षत्राक्षेपः सकलराजतिरस्कारस्तेन प्रचण्डतया क्रूरतया तुरङ्गमरक्षिणामश्वमेधाश्वरक्षकाणां विकृतिं मन्युं स व्याहारश्च 'ता पताकां हरामि वः' (४।२८)

पाठा०—१ 'कुमार, अति हि नाम'. २ 'यथोचितमाचरितं'. ३ 'तदा तस्य··· अभिष्यन्देत'. ४ 'वयमपि न खल्वेवंप्रायाः क्रतुप्रतिघातिनः'. ५ 'इह'.

चन्द्रकेतुः—किं नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्षः ?

लवः—अस्त्विहामर्षो मा भूद्वा । अन्यदेतत्पृच्छामि—दान्तं हि राजानं राघवमनुशुश्रुमः । स किल नात्मना दृप्यति, नाप्यस्य प्रजा वा दृप्ता जायन्ते । तत्किं मनुष्यास्तस्य राक्षसीं वाचमुदीरयन्ति ?

ऋषयो राक्षसीमाहुर्वाचमुन्मत्तदृप्तयोः ।
सा योनिः सर्ववैराणां सा हि लोकस्य निष्कृतिः ॥ २९ ॥

इति ह स्म तां निन्दन्ति । अथेतरामभिष्टुवन्ति,—

कामं दुग्धे विप्रकर्षत्यलक्ष्मीं
कीर्तिं सूते दुर्हृदो निष्प्रलान्ति ।
शुद्धां शान्तां मातरं मङ्गलानां
धेनुं धीराः सूनृतां वाचमाहुः ॥ ३० ॥

सुमन्त्रः—परिमूतोऽयं बत कुमारः प्राचेतसान्तेवासी । वदत्ययमभ्युपपन्नामर्षेण संस्कारेण ।

लवः—यत्पुनश्चन्द्रकेतो ! वदसि किं नु भवतस्तातप्रतापोत्कर्षेऽप्यमर्ष इति तत्पृच्छामि—किं व्यवस्थितविषयः क्षत्रधर्म इति ।

सुमन्त्रः—नैव खलु जानासि देवमैक्ष्वाकं येनैवं वदसि । तद्विरमातिप्रसङ्गात् ।

इत्यादिकः । अथवा तुरङ्गमरक्षिणां व्याहारः 'सप्तलोकैकवीरस्य' (४।२७) इत्युक्तिः मे विकृतिं मन्युं अकरोत् ॥ २८ ॥ दान्तमनहंकारमनुशुश्रुमः श्रुतवानस्मि । आत्मना स्वयं न दृप्यति नाहंकरोति, प्रजा वा दृप्ता न जायन्ते । राक्षसीं वाचं दृप्तवाचम् । तदाह—ऋषय इति । योनिः कारणम् । निष्कृतिः परिभवहेतुः ॥ २९ ॥ इतरां वक्ष्यमाणाम् । काममिति । काममभिलषितं दुग्धे प्रपूरयति । अलक्ष्मीं विप्रकर्षति दूरीकरोति । कीर्तिं गुणवत्ताप्रथां सूते जनयति । दुर्हृदः शत्रून् निष्प्रलान्ति अतिशयेन नाशयति । सूनृता वागिति शेषः । शुद्धां दोषशून्यां शान्तां कार्कश्यरहितां मङ्गलानां मातरं हेतुं धेनुं स्वरूपेण भोग्यां धीराः ध्यानशीलाः सूनृतां शुद्धामाहुरिति योज्यम् । इतीतरामभिष्टुवन्तीति पूर्वेणान्वयः ॥ ३० ॥ अभ्युपपन्नामर्षेण उत्पन्नासहनेन संस्कारेण वासनया । तातप्रतापोत्कर्षेऽप्यमर्ष इति यद्वदसि अत्रोच्यत इति शेषः । व्यवस्थितविषयः रामभद्रमात्रनियताधिकरणकः क्षत्रधर्मः क्षत्रियासाधारणपराक्रमातिशयादिः ॥ अतिप्रसङ्गादनिष्टप्रस-

---

पाठा०—१ 'निर्ऋतिः'. २ 'दुष्कृतं या हिनस्ति'. ३ 'तां चाप्येतां मातरं'. ४ 'परिपूतस्वभावोऽयं'.

सैनिकानां प्रमाथेन सत्यमोजायितं त्वया।
जामदग्न्यस्य दमने न हि निर्बन्धमर्हसि॥ ३१॥

लवः—(सहासम्) आर्य! जामदग्न्यस्य दमन. स राजेति १कोऽय-मुच्चैर्वादः?

सिद्धं ह्येतद्वाचि वीर्यं द्विजानां
बाह्वोर्वीर्यं यत्तु तत्क्षत्रियाणाम्।
शस्त्रग्राही ब्राह्मणो जामदग्न्य-
स्तस्मिन्दान्ते का स्तुतिस्तस्य राज्ञः? ॥ ३२॥

चन्द्रकेतुः—(सोन्मादमिव।) आर्य सुमन्त्र! कृतमुत्तरोत्तरेण।

कोऽप्येष संप्रति नवः पुरुषावतारो
वीरो न यस्य भगवान्भृगुनन्दनोऽपि।
पर्याप्तसप्तभुवनाभयदक्षिणानि
पुण्यानि तात! चरितान्यपि यो न वेद॥ ३३॥

लवः—को हि रघुपतेश्चरितं महिमानं च न जानाति, यदि नाम किंचिदस्ति वक्तव्यम्। अथवा शान्तम्,—

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु हुं वर्तते
सुन्दस्त्रीमथनेऽप्यकुण्ठयशसो लोके महान्तो हि ते।

अनाद्विरम विरतो भव। 'जुगुप्साविराम-' (वा १०७९) इति पञ्चमी। सैनिकानामिति। प्रमाथेन प्रकृष्टविलोडनेन ओजायितमोजस्वीभूतम्। भावे क्त। जामदग्न्यस्य दमने परशुरामस्य नेतरि रामभद्रे विषये। निर्बन्ध रूक्षवादम्॥३१॥ सिद्धमिति। द्विजाना विप्राणा वाचि वीर्यं पराभिभवसामर्थ्यमिति यत्। क्षत्रियाणा बाह्वोर्वीर्यमिति यत् एतत्सिद्ध प्रसिद्धं किल। जामदग्न्य शस्त्रग्राही ब्राह्मण। तस्मिन्दान्ते तस्य राज्ञ तद्दमनकर्तुरामभद्रस्य स्तुति गुणाभिधानिका का[2] न किमपीत्यर्थ॥३२॥ कोऽपीति। यस्य परशुरामश्च वीरो न। यज्ज्ञानविषयावीरत्ववान् भृगुनन्दन। य पुरुष सप्तानां भुवनानां समाहार सप्तभुवन, तस्याभय भयनिवारण तदेव दक्षिणा प्रत्युपकारनिरपेक्ष स्वाभ्युदयमुद्दिश्य दान सा पर्याप्ता पूर्णा येषु तथोक्तानि तातचरितानि पुण्यानि रामभद्रवृत्तलक्षणशुभकर्माणि शुभकर्माणि तथा तु न वेद न जानाति। एष नव पुरुषावतार कोऽपि। क्षेपेऽयं 'कि' शब्द। अत्र रामचरितलक्षणक्रतुना जगदभयदानमेव दक्षिणेति वर्णनाद्रूपकालंकार॥३३॥ यदि नाम किंचिदस्ति वक्तव्यम्। वक्तव्य किंचिदस्ति किमित्यर्थ। वृद्ध इति। अविचारणीयचरितास्ते वृद्धास्तिष्ठ तु। वयोमात्र तेषां गौरवहेतुरिति भाव। सुन्दस्त्रीमथने ताडकावधेऽपि अकुण्ठयशस अप्रतिहतकीर्तय। कुतोमुखानि

पाठा०—१ 'किं वण्यते'.

यानि त्रीण्यकुतोमुखान्यपि पदान्यासन्खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः ॥३४॥

चन्द्रकेतुः—आः तातापवादिन्! भिन्नमर्याद! अति हि नाम प्रगल्भसे।

लवः—अये, मय्येव भ्रुकुटीमुखः संवृत्तः।

सुमन्त्रः—स्फुरितमनयोः क्रोधेन। तथा हि,—

क्रोधेनोद्धतधूतकुन्तलभरः सर्वाङ्गजो वेपथुः
किंचित्कोकनदच्छदस्य सदृशे नेत्रे स्वयं रज्यतः।
धत्ते कान्तिमिदं च वक्त्रमनयोर्भङ्गेन भिन्नभ्रुवो-
श्चन्द्रस्योद्भटलाञ्छनस्य कमलस्योद्भ्रान्तभृङ्गस्य च ॥३५॥

लवः—कुमार कुमार! एह्येहि। विमर्दक्षमां भूमिमवतरावः।

(इति निष्क्रान्ताः सर्वे।)

इति पञ्चमोऽङ्कः।

पराङ्मुखानि पदानि पादन्यासपराङ्मुखानीति वाचा वक्तुमपि जुगुप्सया कुतोमुखानीत्युक्तम्। तदिदं शौर्यातिशयकार्यम्। अत्रा न्तमातङ्गो भूत्वा खरः स्थितः तदा रामभद्रस्यापकर्षणार्थं पदत्रयं निवृत्त तं जघानेति प्रसिद्धिः। इन्द्रसूनुनिधने वालिवधे यत्कौशलं नैपुण्यमन्तर्धानपूर्वकत्वरूपं तत्राप्यभिज्ञो जनः वर्तते। तूष्णीमिति परिहासे ॥३४॥ तातापवादिन् रामभद्रविषयदोषवादिन्। भिन्नमर्याद अतिक्रान्तसमुदाचार। भ्रुकुटीमुखः क्रोधप्रयुक्तभ्रूभङ्गयुक्तवदनः॥ अनयोर्लवचन्द्रकेत्वोः। क्रोधेनेति। उद्धताः धूताश्चलन्तः कुन्तलाः केशभराः यस्मिन् स तयोरुक्तः। कोकनदच्छदस्य रक्तारविन्दपत्रस्य रज्यतः रक्तीभवतः। भ्रुवोर्भङ्गेन भीनम्। अनयोरिदं वक्त्रं च। उद्भटलाञ्छनस्य प्रकटलक्षणः चन्द्रस्य उद्भ्रान्तभृङ्गस्य कमलस्य च कान्तिं धत्ते। वक्त्रमित्येकवचनोक्तिः संतानैक्यप्रयुक्तात्यन्तसारूप्यद्योतनाय। निदर्शनालंकारः ॥३५॥ एह्यागच्छ। विमर्दक्षमां युद्धयोग्यां भूमिमवतरावः। इति निष्क्रान्ताः सर्वे॥

वाधूलवंशजनुषो भूसारनिवासराघवार्यस्य।
उत्तररामचरित्रव्याख्यायामवसितः पञ्चमोऽङ्कः॥

इति श्रीवाधूलवीरराघवविरचितायां भवभूतिभावतलस्पर्शिनी-
समाख्यायामुत्तररामचरितव्याख्यायां पञ्चमोऽङ्कः।

पाठा०—१ 'अपराङ्मुखानि'; 'अकुतोभयानि'. २ 'चूडामण्डलबन्धनं तरलयत्याकूतजो वेपथुः'. ३ 'कान्तिमखण्डताण्डवितयोर्भङ्गेन वक्त्रं'. ४ 'उत्कट'.

८. लक्ष्मणः—संबन्धिनो वसिष्ठादीनेष तातस्तवार्चति ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ (उत्तर० १-१६)
विश्वामित्रः—अपि प्रवृत्तयज्ञोऽसौ विदेहाधिपतिः सुखी ।
गौतमश्च शतानन्दो जनकानां पुरोहितः ॥ (महावीर० १-१९)
९. रामः—जीवयन्निव ससाध्वसश्रमस्वेदबिन्दुरधिकण्ठमर्प्यताम् ।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥ (उ० रा० १-३४)
माधवः—जीवयन्निव समूढसाध्वसस्वेदबिन्दुरधिकण्ठमर्प्यताम् ।
बाहुरैन्दवमयूखचुम्बितस्यन्दिचन्द्रमणिहारविभ्रमः ॥ (मा० मा० ८-२)
१०. रामः—म्लानस्य जीवकुसुमस्य विकासनानि संतर्पणानि सकलेन्द्रियमोहनानि ।
एतानि ते सुवचनानि सरोरुहाक्षि ! कर्णामृतानि मनसश्च रसायनानि ॥
(उत्तररामं० १-३६)
माधवः—म्लानस्य जीवकुसुमस्य विकासनानि संतर्पणानि सकलेन्द्रियमोहनानि ।
आनन्दनानि हृदयैकरसायनानि दिष्ट्या मयाप्यधिगतानि वचोमृतानि ॥
(मालतीमाधं० ६-८)
११. रामः—जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
यां देवयजने पुण्ये पुण्यशीलामजीजनः ॥ (उत्तररामं० १-५१)
रामः—जनकानां रघूणां च यत्कृत्स्नं गोत्रमङ्गलम् ।
तत्राप्यकरुणे पापे वृथा वः करुणा मयि ॥ (उत्तररामं० ६-४२)
१२. आत्रेयी—मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ (उत्तररामं० २-५)
मा निषाद ! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥ (वा० मा० बाल० २-१५)
१३. शम्बूकः—चतुर्दश सहस्राणि चतुर्दश च राक्षसाः ।
त्रयश्च दूषणखरत्रिमूर्धानो रणे हताः ॥ (उत्तररामं० २-१५)
जटायुः—चतुर्दश सहस्राणि चतुर्दश च राक्षसाः ।
त्रयश्च दूषणखरत्रिमूर्धानो रणे हताः ॥ (महावीर० ५-१३)
१४. रामः—न किंचिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ (उत्तररामं० ६-१९)
विद्याधरः—न किंचिदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ॥ (उत्तररामं० ६-५)
शम्बूकः—इह समदशकुन्ताक्रान्तवानीरमुक्तप्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥
अपि च,—
दधति कुहरभाजामत्र भल्लूकयूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते सल्लकीनामिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥
(उत्तररामं० २-२०।२१)

श्रमणा–इह समदशकुन्ताक्रान्तवानीरमुक्तप्रसवसुरभिशीतस्वच्छतोया वहन्ति ।
फलभरपरिणामश्यामजम्बूनिकुञ्जस्खलनमुखरभूरिस्रोतसो निर्झरिण्यः ॥

अपि च,–

दधति कुहरभाजामत्र भल्लूकयूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते सल्लकीनामिभदलितविशीर्णग्रन्थिनिष्यन्दगन्धः ॥
(महावीर० ५–४०।४१

माधवः—फलभरपरिणामश्यामजम्बूनिकुञ्ज-
स्खलनतनुवरह्रामुत्तरेण स्रवतीम् ॥ (मालतीमाधव० ९।२४)

सौदा०–दधति कुहरभाजामत्र भल्लूकयूनामनुरसितगुरूणि स्त्यानमम्बूकृतानि ।
शिशिरकटुकषायः स्त्यायते सल्लकीनामिभदलितविकीर्णग्रन्थिनिष्यन्दगन्धः ॥
(मालतीमाधव० ९–६)

१५. शम्बूकः—गुञ्जत्कुञ्जकुटीरकौशिकघटाघुत्कारवत्कीचक-
स्तम्बाडम्बरमूकमौकुलिकुलः क्रौञ्चाभिधोऽयं गिरिः । (उ० २–२९)

माधवः—गुञ्जत्कुञ्जकुटीरकौशिकघटाघूत्कारसंवेल्लित-
क्रन्दत्फेरवचण्डधात्कृतिभृतप्राग्भारभीमैस्तटैः ॥ (मालती० ५–१९)

१६. तमसा—परिपाण्डुदुर्बलकपोलसुन्दरं
दधती विलोलकबरीकमाननम् । (उत्तरराम० ३–४)

कामन्दकी—परिपाण्डुपांसुलकपोलमाननं
दधती मनोहरतरत्वमागता । (मालतीमाधव० २–४)

१७. रामः—लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्यत्स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ (उत्तरराम० २–१६)

माधवः—लीलोत्खातमृणालकाण्डकवलच्छेदेषु संपादिताः
पुष्यत्पुष्करवासितस्य पयसो गण्डूषसंक्रान्तयः ।
सेकः शीकरिणा करेण विहितः कामं विरामे पुन-
र्न स्नेहादनरालनालनलिनीपत्रातपत्रं धृतम् ॥ (मालतीमाध० ९–३४)

१८. रामः—दलति हृदयं शोकोद्वेगाद्द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ (उत्तरराम० ३–३१)

माधवः—दलति हृदयं गाढोद्वेगं द्विधा तु न भिद्यते
वहति विकलः कायो मोहं न मुञ्चति चेतनाम् ।
ज्वलयति तनूमन्तर्दाहः करोति न भस्मसात्
प्रहरति विधिर्मर्मच्छेदी न कृन्तति जीवितम् ॥ (मालती० ९–१२)